आजादी का अमृत महोत्सव

आजादी का अमृत महोत्सव अनुवादप्रकल्प ग्रंथावली – 6

कारिकाकरः

अनुवादक

डॉ. कार्तिक भागवत

प्रधान संपादक

कुलगुरू,

कुलगुरू, क.का.सं.वि., रामटेक

संपादक

प्रो. कृष्णकुमार पाण्डेय

संचालक, संशोधन व प्रकाशन विभाग

राष्ट्रहिताय संस्कृतम्

कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय, रामटेक

राष्ट्रीय मूल्यांकन व प्रत्यायन परिषदद्वारा (NAAC) A+ श्रेणी प्राप्त

२०२५

शीर्षक	-	**कारिकाकर:**
अनुवादक	-	**डॉ. कार्तिक भागवत**
प्रधान संपादक	-	**कुलगुरू, क.का.सं.वि., रामटेक**
संपादक	-	**प्रो. कृष्णकुमार पाण्डेय कुलगुरू, क.का.सं.वि., रामटेक**

आजादी का अमृत महोत्सव अनुवाद प्रकल्प समिती

1.	डॉ. मधुसूदन पेन्ना	-	अध्यक्ष
2.	प्रा. नंदा पुरी	-	सदस्य
3.	प्रा. कृष्णकुमार पाण्डेय	-	सदस्य
4.	प्रा. ललिता चंद्रात्रे	-	सदस्य
5.	प्रा. हरेकृष्ण अगस्ती	-	सदस्य
6.	प्रा. कविता होले	-	सदस्य
7.	प्रा. प्रसाद गोखले	-	सदस्य
8.	प्रा. पराग जोशी	-	सदस्य

© (Copyright with Publisher)

प्रकाशक	-	कुलसचिव, क.का.सं.वि., रामटेक ४४११०६
प्रकाशन वर्ष	-	२०२५
आवृत्ती	-	प्रथम
आय.एस.बी.एन.	-	९७८-८१-१९२२७-३०-३
मूल्य	-	४४५.००
मुखपृष्ठ	-	श्री. उमेश पाटील
मुद्रक	-	मे. लाभ प्रिंट अँड पब्लिकेशन, नागपूर

The Kavikulaguru Kalidas University does not hold any responsibility regarding the content, language, originality, plagiarism or views expressed by the author of this book. The respective author is solely responsible.

प्रस्तावना

गुरुभ्यश्च ग्रहेभ्यश्च मया बद्धोऽयमञ्जलिः ।
प्रसन्नमनसस्ते मे सत्यां कुर्वन्तु भारतीम् ॥
सृष्ट्वाशेषविशेषयुक्तभुवनं संरक्ष्य सृष्टं जगत्
यत् संहृत्य समस्तभेदनिचयं स्वस्मिन् भवत्यद्वयम्।
तन्नत्वाखिलदोषपाशरहितं ब्रह्मप्रमोदार्णवं
सङ्गृण्हाम्यहमाकरात् सहृदयस्वान्तप्रियाः कारिकाः॥

सर्वप्रथमम् अहं गुरून् नमस्कृत्य अस्य अनन्तभेदवतः अस्य जगतः निर्मातारं रक्षितारं परमपुरुषं दिव्यानन्दसागररूपिणं ब्रह्म प्रणम्य डॉ. तिलक् एम् राव् वर्यैः निर्मितस्य 'कारिकाकरः' इति ग्रन्थस्य अनुवादम् आरभे। ग्रन्थकृता वेदः, वेदाङ्गम्, धर्मशास्त्रम्, पुराणम् इत्यादिभिः समृद्धः काव्यानाम् अतुलनीयसङ्ख्यया सुशोभितोऽसौ ग्रन्थः। मनुष्यस्य सर्वात्मनैव वर्णनं संस्कृतसाहित्येन साकार्यते। सर्वोपि विषयः श्लोकरूपेण प्रस्तुतः येन सहजतया अध्ययनं स्याद्। श्लोकानां महान्तमर्थं ये वदन्ति ते सूत्ररूपेण लब्धाः 'कारिका' इति पदेन व्यवह्रियन्ते। श्रूयते यत् – कारिका तु स्वल्पवृत्तौ बहोर्थस्य सूचिनी इति। संस्कृतसाहित्ये अगणिताः कारिका विद्यन्ते। शास्त्रं प्रविष्टेभ्यः छात्रेभ्यः ज्ञातव्यानां विषयाणां सारांशरूपेण इमाः कारिकाः उपकारिण्यः भवेयुः। लेखकेन अत्र केचन अंशाः सङ्कलिताः येषां स्मरणमन्येषां कृते सौलभ्यं जनयेत्।

ग्रन्थेस्मिन् आहत्य ५३४ कारिकाः सन्ति। ग्रन्थस्तु त्रिधा विभक्तः – दार्शनिककारिकाः, वैयाकरणकारिकाः, लाक्षणिककारिकाः। दार्शनिककारिकासु चार्वाकदर्शनप्रभृति वेदान्तपर्यन्तः तत्त्वज्ञानभागः तथा च सर्वदर्शनानां सङ्ग्रहः गूढतया प्रदर्शितः। तथा च व्याकरणकारिकासु वैयाकरणेन ज्ञातव्याः अंशाः सार्थाः प्रकटीताः सन्ति। व्याकरणाविदपि अनेन तान् अंशान् जानीयात्। नियमः तथा च गुरुः, आचार्यः, पुराणम् इत्येतेषां शब्दानाम् अर्थद्योतकाः श्लोका इह ग्रन्थे उल्लिखिताः। व्यक्तेः नित्याचरणसम्बन्धिन्यः कारिका अपि प्रस्तुता। अभ्यासं, सामंजस्यम् आचरणं च उपदिश्य ग्रन्थकर्त्रा धर्मग्रन्थानाम् अर्थविज्ञानाय बुद्ध्या इदं कार्यं प्रबन्धरूपेण कृतम्। उपवनात् यथा केषाञ्चनैव कुसुमानाम् आहरणं क्रियते तथा अत्र लेखकेन काश्चन एव आकर्षकाः कारिकाः सङ्गृहीताः। एष ग्रन्थः प्राधान्येन UGC-NET/SET इत्येवं स्पर्धापरीक्षाणां कृते उपयोगी वर्तते।

कारिकाकरस्य ग्रन्थकर्ता डॉ. तिलक् एम् राव् महोदयैः ग्रन्थस्यास्य भाषान्तरार्था अनुमतिः प्रदत्ता इति तेभ्यः धन्यवादान् समर्पयामि। तथा च कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः रामटेकम् इत्येतस्मै अपि अहं धन्यवादान् समर्पयामि यत् तेन स्वतन्त्रतायाः अमृतमहोत्सवे भारतीयभाषानुवादन्तर्गते अस्मिन् प्रकल्पे अहं नियुक्तः इति। तस्मै अपि धन्यवादान् वितीर्य गुरून् नत्वा भाषान्तरकार्यार्थं यथामति यत्नं करोमि।

***

प्रस्तावना

गुरुभ्यश्च ग्रहेभ्यश्च मया बद्धोऽयमञ्जलिः ।

प्रसन्नमनसस्ते मे सत्यां कुर्वन्तु भारतीम् ॥

गुरुभ्यश्च ग्रहेभ्यश्च मया बद्धोयमञ्जलिः ।

प्रसन्नमनसस्ते मे सत्यां कुर्वन्तु भारतीम् ॥

ध्यानमूलं गुरुमूर्ति पूजामूलं गुरुपद्म ।

मंत्रमूलं गुरुवाक्यं मोक्षमूलं गुरुकृपा ॥

मी प्रथमतः गुरु चरणी वंदन करून सर्व अनंत भेद असलेल्या या विश्वाची निर्मिती आणि रक्षण कर्त्याला दिव्यानंदाच्या सागररूपी ब्रह्माला माझा नमस्कार करून. डॉ तिलक एम् राव् निर्मित 'कारिकाकर' या ग्रंथाच्या अनुवादाला सुरुवात करतो. लेखकाने वेद, वेदांग, धर्मशास्त्र, पुराण इत्यादींच्या समृद्धीने आणि विकृत काव्यांच्या अतुलनीय संख्येने सुशोभित असा हा ज्ञानसागररूपी ग्रंथ साकारला आहे. माणसाच्या चौपदरी उद्देशाचे मार्गदर्शन करणे हे संस्कृत साहित्याचे वैशिष्ठ्य आहे. सर्व विषय प्रामुख्याने श्लोकांच्या रूपात मांडले आहेत जेणेकरुन सहज अभ्यास करता येईल. श्लोकांचा सर्वात मोठा अर्थ सांगणारे जे सूत्रांच्या रूपात अस्तित्वात आहेत, त्यांना कारिका असे म्हणतात. आणि असे ऐकले आहे की – **"कारिका तु स्वल्पवृत्तौ बहोरर्थस्य सूचिनी"** [कारिका हे छोट्या वृत्तीमध्ये अनेक अर्थांची सूची आहे] संस्कृत साहित्यातही कारिकांची संख्या अमर्यादित आहे. शास्त्रामध्ये प्रवेश केलेल्या विद्यार्थ्यांना ज्ञात असलेल्या विशिष्ट विषयांचे सार म्हणून या कारिका सहायक ठरतील. लेखकाने येथे प्रामुख्याने काही घटक एकत्रित केले आहेत ज्यांचे स्मरण करणे इतरांसाठी सोपे होईल.

ग्रंथामध्ये एकूण ५३४ कारिका आहेत, ग्रंथाचे तीन विभागात

विभाजन केले आहे, दार्शनिककारिका, व्याकरणकारिका तसेच लाक्षणिककारिका. दार्शनिककारिकामध्ये चार्वाक आणि इतर वेदान्ताचे तत्वज्ञान संबंधी संग्रह, सर्व दर्शनाचा गूढ सार दाखविला आहे. तसेच व्याकरणकरिकेत व्याकरणाच्या शाखेत प्रवेश करणाऱ्या विद्यार्थ्यांना कोणते घटक माहित असले पाहिजेत याचे अर्थपूर्ण वर्णन केले आहे. ज्या व्यक्तीला संस्कृत व्याकरणा संबंधी काही ज्ञान नसेल अस्या व्यक्तीला देखील व्याकरणाचे ज्ञानांजन प्राप्त करून दिले आहे. शिस्त त्यासोबतच लेखकांनी येथे गुरु, आचार्य आणि पुराण या शब्दांचा अर्थ सांगणारे श्लोकही संग्रहित केले आहेत. व्यक्तीच्या दैनंदिन जीवनामध्ये आचरणा संबंधी देखील कारिका दर्शिविल्या आहेत. अभ्यास, सामंजस्य आणि आचरणाचा उपदेश करून धर्मग्रंथांचा अर्थ जाणून घेण्याच्या हेतूने लेखकांनी हुशारीने हे काम एका प्रबंधाच्या रूपात लिहिले. फुलांनी भरलेल्या बागेत जशी काही फुले वेचली जातात, तशी लेखकांनी आकर्षक कारिका इथे प्रस्थापित केल्या आहेत. हा ग्रंथ विशेष करून शास्त्रीय विषया संबंधीत UGC-NET/SET या सारख्या स्पर्धा परीक्षाकरीत सर्वाधिक सहायक ठरेल.

कारिकाकारः या ग्रंथाचे लेखक **डॉ तिलक एम् राव्** यांच्या अनुमतीने मी या ग्रंथाचा अनुवाद करू शकेल त्यामुळे त्यांचे मनापासून आभार व्यक्त करतो, आणि **कवि कुलगुरुकालिदास संस्कृत विश्वविद्यालय, रामटेक.** विश्वविद्यालायचे ही मी मनापासून आभार व्यक्त करतो कारण आझादी का अमृतमहोत्स भारतीय भाषा अनुवाद अंतर्गत या प्रकल्पामध्ये कार्य करण्याची संधी दिली. सर्वांनी माझ्यावर विश्वास दाखवून मला या कार्यास निवडले म्हणून मी पुन्हा एकदा धन्यवाद समर्पित करतो. आणि गुरुवंदना करून यथामति या ग्रंथाचे अनुवाद करण्यास प्रारंभ करतो.

अनुक्रमणिका

विषयाः	कारिकासंख्या
प्रथमः अध्यायः	
दार्शनिककारिकाः	
1. चार्वाकीयाः	१-४
2. बौद्धीयाः	५-९
3. जैनीयाः	१०-१६
4. नैयायिकवैशेषिकीयाः	१७-३७
5. वैष्णवीयाः	३८-३९
6. पूर्वतन्त्रीयाः	४०-५०
7. सांख्यीयाः	५१-६२
8. उत्तरतन्त्रीयाः	६३-१३२
9. तन्त्रसाधारणसिद्धान्ताः	१३३-१७५
द्वितीयः अध्यायः वैयाकरणकारिकाः	१७६-२८०
तृतीयः अध्यायः लाक्षणिकादिकारिकाः	२८१-५३४
चतुर्थः अध्यायः	
परिशिष्टम्	
1. विषयानुक्रमणिका	
2. ग्रन्थऋणम्	

दार्शनिककारिकाः

दृश्यते यथार्थतत्त्वम् अनेन इति करणव्युत्पत्या व्युत्पन्नः अयं दर्शनशब्दः शास्त्रार्थे रूढः। सन्ति हि भारतीयपरम्परायां नैकानि दर्शनानि चार्वाकादिवेदान्तान्तानि जगत्तत्त्वप्रपञ्चनार्थं प्रवृत्तानि। तस्मिन् दर्शननिकरे विभागद्वयं प्रसिद्धं नास्तिकदर्शनम् आस्तिकदर्शनं चेति । तादृग्विभागहेतुः तु एवं स्यात्। नास्तिकास्तिकशब्दौ ईश्वराभ्युपगमानभ्युपगमे रूढौ। किन्तु न सः अर्थः अत्र विवक्षितः। यतः आस्तिकदर्शनेषु अन्यतमेन पूर्वमीमांसादर्शनेन फलप्रदातृत्वेन अपूर्वमङ्गीकृत्य तत्प्रदाता ईश्वरः दूरीकृतः। अतः न ईश्वराङ्गीकारानङ्गीकारौ नास्तिकः आस्तिकः इति विभागे निदाने। 'अस्ति परलोकः इति मतिः यस्य सः आस्तिकः' इत्यपि व्युत्पत्तिः दृश्यते। तदपि अत्र न सङ्गच्छते। बौद्धार्हतदर्शनाभ्यामपि कर्मसिद्धान्तस्य अङ्गीकारात्। अनया व्युत्पत्या स्यात् चार्वाकदर्शनं केवलं नास्तिकदर्शनम्। अतः वेदप्रामाण्याभ्युपगन्तारः आस्तिकाः इति सुकरः पन्थाः। उक्तं च मनुस्मृतौ 'नास्तिको वेदनिन्दकः' इति । अतः चार्वाकजैनबौद्धाख्यानि त्रीणि नास्तिकदर्शनानि अवशिष्टान्यन्यानि सर्वाणि आस्तिकदर्शनानि। सम्प्रति तत्तद्दर्शनप्रमेयप्र_काशिकाः काश्चन कारिकाः अत्र प्रदर्श्यन्ते।

यथार्थतत्वम् ज्याने सिद्ध होतो असा करणार्थे व्युत्पन्न दर्शन शब्द शास्त्रात रूढ आहे. भारतीय परंपरेमध्ये जगताच्या प्रपंचासाठी चार्वाक वेदान्त इत्यादि अनेक दर्शने प्रवृत आहेत. या दर्शनाशास्त्रामध्ये आस्तिकदर्शन तसेच नास्तिकदर्शन असे दोन विभाग प्रसिद्ध आहेत. या विभागांचा हेतु

असा आहे की, ईश्वराला स्वीकारावे की, नाही या अर्थी आस्तिक तसेच नास्तिक हे शब्द रूढ आहेत. परंतु असा अर्थ इथे अपेक्षित नाही, कारण आस्तिकदर्शनातील पूर्वमीमांसेत ईश्वराला अंगीकृत केले नाही. म्हणून ईश्वराचा अंगीकार अनंगीकार, आस्तिक आणि नास्तिक या विभागाचे निदान ठरवत नाहीत. 'अस्ति परलोकः इति मतिः यस्य सः आस्तिकः' [ज्यांच्या मते परलोक आहे ते आस्तिक] अशी व्युत्पत्तिः आस्तिक दर्शनाची दिसून येते, ते सुद्धा इथे ग्राह्य नाही. कारण बौद्ध आणि आर्हत दर्शनांनी कर्मसिद्धांताला स्वीकारले आहे. या व्युत्पत्तीने चार्वाकदर्शन हेच केवळ नास्तिकदर्शन आहे असे होईल. म्हणून वेदांना प्रमाण रूपाने स्वीकार करणारे आस्तिक असे म्हणणे उचित ठरते. मनुस्मृतीमध्ये असे म्हटले आहे की, 'नास्तिको वेदनिन्दकः' [नास्तिक हे वेद निंदक आहेत] म्हणून चार्वाक, जैन आणि बौद्ध हे तीन नास्तिकदर्शन आहेत आणि उर्वरित सर्व आस्तिकदर्शन आहेत. त्या त्या दर्शनांचे प्रमेय सांगणाऱ्या कारिका येथे दर्शविल्या आहेत.

चार्वाकीयाः-

चारू रमणीया वाक् उक्तिः यस्य सः चार्वाकः। तेषां यद्दर्शनं तत् चार्वाकदर्शनम् इत्यभिधीयते। लोके आयतं प्रसृतमित्यतः अस्य लोकायतमित्यपरं नाम। बृहस्पतेः अनुयायिनः चार्वाकाः अर्थकामौ एव परमपुरुषार्थौ मन्यमानाः पारलौकिकमर्थमपह्नुवानाः बोभूयन्ते। लोकान्तरस्य जन्मान्तरस्य च अविद्यमानत्वात् अस्मिन् जन्मनि एव सुखम् अनुभोक्तव्यम् इति अभिप्रायेण आहुः –

ज्यांची रमणीय वाणी आहे ते चार्वाक, त्यांचे दर्शन हे चार्वाकदर्शन या नावाने ओळखले जाते. अर्थ आणि काम हेच परमपुरुषार्थ असे मानणारे बृहस्पतीचे अनुयायी असलेले चार्वाक पारलौकिक अर्थापासून पुन्हा पुन्हा

दूर जात आहेत, परलोक तसेच दुसरा जन्म नसल्याने याच जन्मात सुखाचा उपभोग घ्यावा. या अभिप्रायेणे –

[ऋणं कृवा घृतं पिबेत्]

यावज्जीवं सुखं जीवेत् नास्ति मृत्योरगोचरः।

भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥१॥

॥सर्वदर्शनसङ्ग्रहः-चार्वाकमतम् ॥

तपश्चर्यादिक्लेशयुक्ते जीवने यापितेऽपि यतः मृत्युः अवश्यं भवति अतः ऋणं कृत्वा वा यावच्छक्यं तावत् सुखम् अनुभोक्तव्यम्। न पुनः जन्मान्तरसुखार्थं लोकान्तरसुखार्थं प्रयत्नः करणीयः। तस्य अविद्यमानत्वात्।

तपश्चार्येसारख्या क्लेशयुक्त जीवनामध्ये मृत्यु हा येतोच, म्हणून ऋण करून शक्य तेवढ्या सुखाचा उपभोग करून घ्यावा, पुढच्या जन्मात किंवा अन्यलोकात सुख उपभोगण्याकरिता पुन्हा प्रयत्न करू नका, कारण ते शक्य नाही.

तर्हि किम् भवतां मते पुराणादिषु प्रसिद्ध स्वर्गनरके न स्तः इति चेद्वदन्ति-

तरी तुमच्या मते पुराणामध्ये प्रसिद्ध असलेले स्वर्ग आणि नरक नाहीत काय, त्यावर ते [चार्वाक] म्हणतात –

अङ्गनालिङ्गनाजन्यसुखमेव पुमार्थता।

कण्टकादिव्यथाजन्यं दुःखं निरय उच्यते ॥२॥

॥सर्वदर्शनसङ्ग्रहः- चार्वाकमतम् ॥

शारीरं सुखमेव स्वर्गः। कण्टकादीनां स्पर्शात् जायमानं दुःखमेव नरकम्। यदि न विद्यते स्वर्गनरके नापि जन्मान्तरलोकान्तरे तर्हि पुण्यपापयोः अपि

अभावात् तत्प्रदाता ईश्वरः अपि न स्यात् मुक्तिरपि न स्यात् इति दर्शनान्तरवासनावशात् चिन्तयन्तं प्रत्याहुः –

शारीरिक सुख हेच स्वर्ग आहे, काट्याच्या स्पर्शाने झालेले दु:ख म्हणजेच नरक होय. जर स्वर्ग आणि नरक ही संकल्पना नाही, तर जन्मान्तर, लोकान्तर देखील नाही, तरी पुण्यपापाच्या अभावाने त्याचा फलदाता ईश्वर देखील नाही, मुक्तीसुद्धा नाही, असे मानणाऱ्या दुसऱ्या दर्शनाच्या संस्काराने प्रभावित झालेल्या लोकांसाठी ते म्हणतात -

लोकसिद्धो भवेद्राजा परेशो नापरः स्मृतः।

देहस्य नाशो मुक्तिस्तु न ज्ञानान्मुक्तिरिष्यते ॥३॥

॥ सर्वदर्शनसङ्ग्रहः - चार्वाकमतम् ॥

लोके यः राजा स एव ईश्वरः नान्यः। देहस्य नाशः एव मुक्तिः। यद्येवं, सर्वाणि अपि भूतेभ्यः एव उत्पन्नानि इति कारणात् केषाञ्चन पदार्थानां सचेतनत्वं केषाञ्चन पदार्थानाम् अचेतनत्वम् इत्यत्र किं नियामकम्?

या लोकात राजा व्यतिरिक्त दूसरा कोणीही ईश्वर नाही, आणि देहाचा नाश हीच मुक्ती आहे, सर्व काही भूतांपासून [पञ्चमहाभूत] उत्पन्न झाले आहे, तर मग काही पदार्थ सचेतन आणि काही पदार्थ अचेतन यांत नियमक असे काय?

अत्र चत्वारि भूतानि भूमिवार्यनिलोनलाः।

चतुर्व्यः खलु भूतेभ्यः चैतन्यमुपजायते।

किण्वादिभ्यो समेतेभ्यः द्रव्येभ्यो मदशक्तिवत्॥४॥

॥ सर्वदर्शनसङ्ग्रहः - चार्वाकमतम् ॥

पृथिव्यप्तोजोवाय्वाख्येभ्यः चतुर्व्यः भूतेभ्यः समुत्पन्ने शरीररूपे विशेषसङ्घाते तेभ्यः एव चैतन्यमुपजायते। विशिष्टसङ्घाते विशिष्टशक्तिः। यथा घटे जलाहरणादिशक्तिः। यथा वा किण्वादिसहितेभ्यः द्रव्येभ्यः एव मदशक्तिः

जायते तद्वत्। श्रुतेः भण्डधूर्तनिशाचराणां प्रलापमात्रत्वात् प्रत्यक्षस्यैकस्यैव प्रमाणत्वात् नास्ति देहातिरिक्तः श्रुत्युक्तः आत्मा इति चार्वाकसिद्धान्तः।

पृथ्वी, जल, तेज, आणि वायु या चार भूतांपासून उत्पन्न झालेल्या शरीररूपी संघातामध्ये यांपासूनच चैतन्य जागृत होतो. विशिष्ट संघातामध्ये विशिष्ट शक्ति असते. ज्याप्रकारे घटामध्ये पाणी साठविणे इत्यादि शक्ति आहे, ज्याप्रमाणे किण्वादीसहित द्रव्यांपासून मदशक्ती निर्माण होते त्याचप्रमाणे – श्रुतींचे अनुसरण करणाऱ्यांचा प्रलापमात्र आहे, प्रत्यक्ष हे एकच प्रमाण असल्याने देहाला सोडून दूसरा कोणताही आत्मा श्रुतीं मध्ये नाही, असा चार्वाक सिद्धांत आहे.

बौद्धीयाः -

नास्तिकदर्शनेषु अपरं दर्शनं बौद्धदर्शनम्। बौद्धमतस्य रूपद्वयम् इतिहासे दृश्यते। प्रथमं धार्मिकं रूपं, द्वितीयं दार्शनिक रूपम्। यत्र जनकल्याणाय आचारमार्गः एव प्राधान्येन प्रतिपादितः तत् धार्मिकं रूपम्। यत्र तर्कबद्धविचारसरणेः एव प्राधान्यं तत् दार्शनिक रूपम्। बुद्धः एतन्मतप्रवर्तकः। तेन निरूपितविषयसारः एवमुक्तः धम्मपदे –

नास्तिक दर्शनातील दुसरे एक दर्शन म्हणजे बौद्ध दर्शन होय. इतिहासामध्ये बौद्धमताची दोन रुपे दिसून येतात. पहिले धार्मिक रूप आणि दुसरे दार्शनिक रूप. जेथे जनकल्याणासाठी प्रतिपादित केले जाते ते म्हणजे धार्मिक रूप, आणि जेथे तर्कबद्ध विचारसारणीलाच प्राधान्य आहे ते दार्शनिक रूप होय. बौद्ध हे या मताचे प्रवर्तक आहेत, त्यांनी धम्मपदांमध्ये निरुपित केलेला विषयसार या प्रकारे मांडला –

सब्बपापस्स अकरणं कुसलस्स उपसम्पदा।

सचित्तपरियोदपनम् एतं बुद्धान सासनम् ॥५॥

पापाकरणं पुण्यसञ्चयः चित्तपरिशुद्धिः एतदेव बुद्धस्य शासनम्। हीनयान महायान वज्रयान इति रूपत्रयेण आचारप्रधानबौद्धमतस्य विकासः सम्बभूव। विचारप्रधानबौद्धमतं माध्यमिकाः योगाचाराः सौत्रान्तिकाः वैभाषिकाः इति भेदेन चतुर्धा विभक्तमुपलभ्यते।

पाप न करणे, पुण्याचा संचय करणे आणि चित्ताची शुद्धी हेच बुद्धाचे शासन आहे. हिनयान, महायान, वज्रयान या तीन रूपाने आचारप्रधानबौद्धमताचा विकास होतो. विचारप्रधानबौद्धमत माध्यमिक, योगाचार, सौत्रान्तिक, वैभाषिक या चार भेदाने विभक्त आहे.

माध्यमिकाः –

तेषु माध्यमिकाः सर्वशून्यवादिनः। शून्यमेव पारमार्थिमित्यङ्गी-कुर्वन्ति। यतः यदि जगत् सत् स्यात् तर्हि कारणापेक्षा न स्यात्। यदि असत् स्यात् तर्ह्यपि खपुष्पवत् कारणापेक्षा न स्यात् । न उभयात्मकं सदसदोः एकत्र अवस्थानासम्भवात्। अनुभयात्मकमपि न। तस्मात् एवं सदसदादिभ्यः भिन्नत्वात् शून्यम्।

त्यामध्ये माध्यमिक हे सर्वशून्यवादी आहे. ते शून्यालाच पारमार्थिक असे अंगीकृत करतात. म्हणून जग सत्य असले तरी कारणापेक्षा नाही, जर जग असत्य असेल तर त्याच्या कारणाची अपेक्षा नाही, कारण इथे कारणाची अपेक्षा करणे म्हणजे आकाशातील पुष्पाची कल्पना करण्यसारखे आहे. म्हणून जग आहे किंवा नाही या दोन्ही अवस्थांचा एकत्र संभव नाही, दोन्ही नाही असेही होऊ शकत नाही, त्यामुळे सत् किंवा असत् त्यांच्यापेक्षा भिन्न हे शून्य आहे.

योगाचाराः –

विज्ञानमात्रसत्ताभ्युपगन्तारः विज्ञानवादिनः एव योगाचाराः इत्यभिधीयन्ते। न एते विज्ञानातिरिक्तं किञ्चित्सत्त्वमङ्गीकुर्वन्ति। विज्ञानातिरिक्त-पदार्थानामसद्भावे हेतुः तु सहोपलम्भनियमः। सहोपलम्भनियमः एवं निरूपितः –

विज्ञानमात्रसत्ता मानणारे विज्ञानवादी हे "योगाचार" या नावाने संबोधले जातात. ते विज्ञानाला सोडून कोणतेच सत्व स्वीकारत नाहीत. विज्ञानव्यतिरिक्त पदार्थांचा असद्भाव हेतु सहोपलम्भनियम आहे. सहोपलम्भनियम अशा प्रकारे निरुपित केला आहे -

सहोपलम्भनियमादभेदो नीलतद्धियोः।
भेदश्च भ्रान्तिविज्ञानैदृश्यतेन्दाविवाद्वये ॥६॥
अविभागोऽपि बुध्यात्मा विपर्यासितदर्शनैः।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥७॥

नीलतद्धियोः विषयविज्ञानयोः सहोपलब्धिः दृश्यते। न हि अनयोः एकस्य अनुपलम्भे अन्यस्य उपलम्भः अस्ति। तथा च यद् येन सह नियमेन उपलभ्यते तत् तेन अभिन्नमेव। धिया सह विषयः नियमन उपलभ्यते इति कारणात् विषयः धिया अभिन्नः एव। नीलम् अन्यत् तद्धीः अन्या इति यत् भेदविज्ञानं तत् तु भ्रान्तिमूलकमेव। यथा एकस्मिन् अपि चन्द्रे भ्रान्तिकारणात् भेदविज्ञानं तद्वत्। पुनश्च 'यः यः प्रत्ययः सः सः बाह्यानालम्बनः यथा स्वप्नप्रत्ययः' इत्यनेन न्यायेन स्वाप्निकप्रत्ययवत् जागृत्प्रत्ययस्यापि बाह्यानालम्बनत्वं सिद्धयति। अतः विज्ञानमेव

तथ्यभूतम्। बुद्धिस्वरूपम् अविभक्तमेव यद्यपि तथापि अनादिभेदवासनया येषां दर्शनं विपर्यासितं तैः बुद्धिस्वरूपमेकं चेदपि ज्ञेयज्ञातृज्ञानरूपेण त्रिविधं लक्ष्यते। तदेव विज्ञानम् आलयविज्ञानं प्रवृत्तिविज्ञानमिति च कथ्यते। तत्र अहमास्पदं विज्ञानमालयविज्ञानम्। घटपटादिकं प्रवृत्तिविज्ञानम्। उक्तञ्च –

निळा वर्ण [विषय] आणि त्याची बुद्धी असणारे [विज्ञान] या दोघांमध्ये साधर्म्य दिसून येते. या दोघांमध्ये एक जर नसेल तर दूसरा असेल अस नाही. त्याचप्रमाणे जो ज्याच्या सोबत नियमितपणे उपलब्ध होतो तो त्या पेक्षा अभिन्नच असतो. बुद्धी सोबत विषय अनियमित राहतो त्यामुळे विषय आणि बुद्धी हे अभिन्नच आहे. निळा वर्ण वेगळा आणि त्याची बुद्धी वेगळी हे भेदविज्ञान आहे, तो भ्रांतीमुळ आहे, जसे एकाच चंद्राचे वेगवेगळे भेद दिसतात त्याचप्रमाणे विज्ञान हेच तथ्यभूत आहे.

तत्स्यादालयविज्ञानं यद्भवेदहमास्पदम्।
तत्स्यात्प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेत् ॥८॥

सौत्रान्तिकाः –

एते अनुमेयबाह्यसत्तावादिनः। यद्यपि एते सर्वास्तित्ववादिनः एव अर्थात् सर्वस्यापि सत्त्वमङ्गीकुर्वन्ति तथापि बाह्यपदार्थानां क्षणिकत्वात् न तेषां ज्ञानं प्रत्यक्षमपितु बुद्धिस्थज्ञानादनुमेयमिति तेषां सिद्धान्तः। समेषां वस्तूनां क्षणिकत्वात् न कस्यापि प्रत्यक्षज्ञानं सम्भवति। दृष्टे कस्मिँश्चित् वस्तुनि तत्संस्कारः चित्तमध्यास्ते। तादृशस्य संस्कारस्य उत्पादकं बाह्यं वस्तु तत्संस्कारसदृशमनुमीयते। एवं बाह्यपदार्थानामनुमानगम्यत्वाङ्गीकारात् बाह्यार्थानुमेयवादिनः एते।

हे अनुमेय बाह्यसत्तावादी आहेत. जरी ते सर्व सत्वांचा स्वीकार करत

असले, तरी सुद्धा त्यांच्यामते बाह्यपदार्थ क्षणिक असल्याने त्यांचे ज्ञान प्रत्यक्ष नाही तर बुद्धीस्थज्ञानद्वारे अनुमान करण्याजोगे आहे, असा त्यांचा सिद्धांत आहे. सर्व वस्तु या क्षणिक आहेत त्यामुळे कश्याचेच प्रत्यक्ष ज्ञान संभव नाही. एखादी वस्तु बघितल्यावर त्या वस्तूचे संस्कार आपल्या मनावर होतात,
आणि अशा संस्काराचे अशाप्रकारे बाह्यपदार्थांचे अनुमान गम्यत्व असल्याने यांना बाह्यार्थानुमेवादी असे म्हणतात.

वैभाषिकाः -

एते प्रत्यक्षबाह्यसत्तावादिनः। बाह्यसत्तापि स्वतन्त्ररूपेण विद्यत इति तेषां मतम्। यद्यपि सौत्रान्तिकवैभाषिकौ उभावपि सर्वास्तित्ववादिनौ एव। किन्तु वैभाषिकाः बाह्यसत्ता प्रत्यक्षम् इति ब्रुवते सौत्रान्तिकास्तु अनुमेया इति।

हे प्रत्यक्षबाह्यवादी आहेत. यांच्यामते बाह्यसत्ता स्वतंत्ररूप आहे. जरी सुद्धा सौत्रान्तिक आणि वैभाषिक सर्व अस्तित्व मानणारे आहेत तरी सुद्धा वैभाषिक हे बाह्यसत्ता प्रत्यक्ष आहे असे म्हणतात, सौत्रान्तिक हे अनुमेय असल्याचे सांगतात.

एते सर्वास्तित्ववादिनः वैभाषिकाः सौत्रान्तिकाश्च बाह्यं भूतं भौतिकं, आन्तरं चित्तं चैत्तं च वस्तु अभ्युपगच्छन्ति। तत्र भूतपदेन पृथिव्यप्ते-जोवाय्वाकाशर्तवः गृह्यन्ते। भौतिकपदेन रूपादयः विषयाः, चक्षुरादीनि इन्द्रियाणि च संगृह्यन्ते । एषु पृथिव्यादिचतुष्टयं भौतिकं च परमाणुसमुदायः एव, आकाशः च अभावमात्रमिति एषां मतम्। तथा च रूपविज्ञानवेदनासंज्ञासंस्काराख्याः पञ्चस्कन्धाः। तत्र सविषयेन्द्रियाणि

रूपस्कन्धः। तत्र आलयविज्ञानप्रवृत्तिविज्ञानप्रवाहः विज्ञानस्कन्धः। सुखाद्यनुभवः वेदनास्कन्धः। गौः अश्वः इत्यादि संज्ञास्कन्धः। रागद्वेषादयः संस्कारस्कन्धः। एषु विज्ञानस्कन्धः चित्तम् आत्मा इति, अन्ये चत्वारः चैत्तमिति च कथ्यन्ते। यत् सत् तत् क्षणिकं यथा विद्युदिति अनुमानेन समेषामेषां क्षणिकत्वं च साध्यते। सर्वं आन्तरं बाह्यं च वस्तु दुःखम्। तत्र आर्यबुद्धस्य अभिमतानि तत्त्वानि चत्वारि दुःखं समुदायः निरोधः मार्गः इति । समुदायः दुःखकारणम्। तदेव प्रतीत्यसमुत्पादः इति कथ्यते। इदं प्रतीत्य (प्राप्य) इदम् उत्पद्यते इति एतावन्मात्रस्य लोके दृष्टत्वात् प्रतीत्यसमुत्पादः इति नाम। प्रतीत्यसमुत्पादः द्विविधः बाह्यः आध्यात्मिकश्च। स च द्वाभ्यां कारणाभ्यां भवति, हेतूपनिबन्धतः प्रत्ययोपनिबन्धतश्च। तत्र बाह्यप्रतीत्यसमुत्पादः हेतूपनिबन्धतः यथा बीजात् अङ्कुरः अङ्कुरात्पत्रं पत्रात्काण्डं काण्डान्नालं नालाद्गर्भः गर्भाच्छूकः शूकात्पुष्पं पुष्पाफलम् इति। नात्र बीजादिषु चैतन्यमस्ति बीजस्य अहमङ्कुरमुत्पादयामि इति ज्ञानाभावात्। नान्यः चेतनः विद्यते यस्मिन् सति अत्र कार्यकारणभावः। केवलम् इदं प्राप्य इदम् उत्पद्यते इत्येवंरूपेण हेतुसरणिः दृश्यते। अतः अयं हेतूपनिबन्धः प्रतीत्यसमुत्पादः। द्वितीयः प्रत्ययोपनिबन्धः प्रतीत्यसमुत्पादः। प्रत्ययः समुदायः, तेन सिद्धः प्रतीत्यसमुत्पादः। यथा पृथिव्यप्तेजोवाय्वाकाशर्तूनां समुदायस्य सहकारात् बीजात् अङ्कुरः उत्पद्यते। आध्यात्मिकः प्रतीत्यसमुत्पादः अपि द्वाभ्यां कारणाभ्यां भवति हेतूपनिबन्धतः प्रत्ययोपनिबन्धतश्च। तत्र हेतूपनिबन्धः प्रतीत्यसमुत्पादः यथा अविद्यायाः संस्कारः संस्कारात् संस्कारात् विज्ञानं

विज्ञानात् नाम एवं रूपं षडायतनं (विज्ञानं पृथिव्यादिचतुष्टयं रूपं च) स्पर्शो (विषयेन्द्रियसंयोगः) वेदना(सखादिः) तृष्णा उपादानं(प्रवृत्तिः) भवः(धर्मादिः) जातिः(जन्म) जरा मरणं शोकः परिदेवना दुःखं दुर्मनस्यम् इत्यादीनां मिथो कार्यकारणभावेन उत्पत्तिः। एते घटीयन्त्रवदनिशमावर्तन्ते। प्रत्ययोपनिबन्धः प्रतीत्यसमुत्पादः यथा पृथिव्यप्तोजोवाय्वाकाशविज्ञानधातूनां समवायात् कायस्य उत्पत्तिः। सर्गादौ परमाणुषु स्कन्धेषु च क्रियोत्पत्त्या सवाङ्गातसिद्ध्या सृष्टिः भवति । दुःखदुःखकारणयोः संयमनं निरोधः। तयोः निरोधोपायः मार्गः। निरोधात् विमलज्ञानोदयः मुक्तिर्वा सिद्धयति। बौद्धाः प्रत्यक्षम् अनुमानं च प्रमाणत्वेन अङ्गीकुर्वन्ति। मतचतुष्टयसारः एवमुक्तः –

हे सर्वास्तित्ववादी वैभाषिक आणि सौत्रान्तिक बाह्यभूत वस्तुला आन्तर चित्त आणि चैत्त असे मानतात. तिथे भूतपदाने पृथ्वी, आप, तेज, वायु, आकाश आणि ऋतु यांचे ग्रहण केले जाते. भौतिक या पदाने रुपादी विषय, चक्षु इत्यादि इंद्रिय यांचे ग्रहण होते. या मध्ये पृथ्वी इत्यादि चार आणि भौतिक हे परमाणु समुदाय तर आकाश हे अभाव मात्र आहे, असे यांचे मत आहे. रूप, विज्ञान, वेदना, संज्ञा, संस्कार, हे पाच स्कंद आहेत. सविषय इंद्रिय रूप स्कंध आहे. आलयविज्ञान, प्रवृत्तिविज्ञान, प्रवाह हे विज्ञान स्कंध आहे. सुख इत्यादींचा अनुभव म्हणजे वेदना स्कंध आहे. गाय, अश्व इत्यादि संज्ञा स्कंध आहे. राग, द्वेष इत्यादि संस्कार स्कंध आहे. यामधील विज्ञानस्कंध हे चित्त आहेत आणि आत्मा असे चार चैत्त आहे. जे आहे ते क्षणिक आहे, ज्याप्रमाणे विद्युत, अनुमानाने यांचे क्षणिकत्व सिद्ध केले जाते. सर्व आंतर आणि बाह्य वस्तु दुःख आहे. आर्यबुद्धांच्या मताने चार तत्व आहे, दुःख, समुदाय, निरोध आणि मार्ग. समुदाय हे दुःखाचे कारण आहे. त्यालाच प्रतीत्समुत्पाद म्हणतात. हे प्राप्त करून अन्य काही

उत्पन्न होते, जगतामध्ये दिसत असल्या कारणाने याला प्रतीत्समुत्पाद या नावाने ओळखले जाते. हे दोन प्रकारचे आहेत, बाह्य आणि आध्यात्मिक. आणि त्याचे कारण आहेत, हेतुपनिबंध आणि प्रत्यायोपनिबंध. बाह्यप्रतित्यसमुत्पाद हेतुनिबंधाने जसे कि बिजाने अंकुर, अंकुराने पान, पानाने कांड, कांडाने नाल, नालाने गर्भ, गर्भाने शुक्र, शुक्राने पुष्प, आणि पुष्पाने फळ. मी अंकुर उत्पन्न करत आहे, या ज्ञानाच्या आभावाने बिजादीमध्ये चैतन्य नाही, इथे अन्य चेतन नाही ज्याने इथे कार्यकारणभाव असेल. केवळ याच्या प्राप्ती नंतर हे उत्पन्न होते, या प्रकारची हेतुसरणी दिसून येते. म्हणून हे हेतुपनिबंध प्रतीत्समुत्पाद आहे. दुसरे प्रत्यायोपनिबंध प्रतीत्समुत्पाद आहे. समुदाय प्रत्यय आहे. त्याने प्रतीत्समुत्पाद आहे, ज्याप्रमाणे पृथ्वी, आप, तेज, वायु, आकाश आणि ऋतु यांच्या समुदायांच्या सहकार्याने बिजापासून अंकुर उत्पन्न होते. आध्यात्मिक प्रतीत्समुत्पाद पण दोन कारणाने होते, हेतुपनिबंध आणि प्रत्यायोपनिबंधाने. हेतुपनिबंध प्रत्ययसमुत्पाद जसे अविद्या पासून संस्कार, संस्काराने विज्ञान, विज्ञानाने नाव, याप्रकारचे षडायतन [विज्ञान, पृथ्वी इत्यादि चार रूप] स्पर्श (विषयइंद्रियभोग) वेदना (सुखादि) तृष्णा उपादान (प्रवृत्ति) भव (धर्मादि) जाति (जन्म) जरा मरण शोक परिदेवना दुःख दुर्मनस्य इत्यादींमध्ये कार्यकारणभावाने उत्पन्न होते. हे घड्याळा प्रमाणे आवृत होते. प्रत्ययोपनिबंध प्रतीत्यसमुत्पाद जसे कि – पृथ्वी, जल, तेज, वायु, आकाश, विज्ञान आणि धातुच्या समवायाने काय ची उत्पत्ति होते. सर्ग, परमाणु आणि स्कन्धामध्ये क्रियेच्या उत्पत्तिने सवांगत सिद्धिने सृष्टि होते. दुःख आणि दुःखाचे कारण या दोघांचे संयमन निरोध आहे. त्यांच्या निरोधाचे उपाय मार्ग आहे. निरोधाने विमलज्ञानोदय अथवा मुक्ति सिद्ध होते. बौद्ध प्रत्यक्ष आणि अनुमान प्रमाणाला मानतात. मतचतुष्टयाच सार या प्रकारे -

मुख्यो माध्यमिको विवर्तमखिलं शून्यस्य मेने जगत्
योगाचारमते तु सन्ति मतयः तासां विवर्तोऽखिलः।
अर्थोऽस्ति क्षणिकस्त्वसावनुमितो बुध्येति सौत्रान्तिकः
प्रत्यक्ष क्षणभरं च सकलं वैभाषिको भाषते ॥९॥

जैनीयाः –

जैनमते सर्वज्ञः जितरागादिदोषः त्रैलोक्यपूजितः यथास्थितार्थवादी सिद्धपुरुषः अर्हन् इत्यभिधीयते। उक्तञ्च –

जैनांच्या मते सर्वज्ञ, जितरागादीदोष, त्रैलोक्यपुजित, यथास्थितार्थवादी असा सिद्धपुरुष अर्हन् या नावाने ओळखला जातो.

सर्वज्ञो जितरागादिदोषस्त्रैलोक्यपूजितः।
यथास्थितार्थवादी च देवोऽर्हन् परमेश्वरः ॥१०॥

तेन प्रसारितत्वात् अस्य आर्हतदर्शनमित्यपि नामान्तरम् । स एव तीर्थङ्करः इत्यपि कथ्यते। एतादृशाः तीर्थङ्कराः चतुर्विंशतिसंख्याकाः प्रसिद्धाः आर्हतदर्शने। अन्तिमतीर्थङ्करस्य वर्धमानस्य अस्ति 'जिन' इति नामान्तरम्। तेन प्रतिपादितत्त्वात् जैनमतमिति अस्य दर्शनस्याभिधानम्। नव पदार्थाः जैनैः अङ्गीकृताः जीवाजीवपुण्यपापास्रवसंवरनिर्जरबन्धमोक्षाख्याः।

तदुक्तम् –

त्यांनी प्रसारित केलेल्या दर्शनाला आर्हत दर्शन असे देखील म्हणतात. तसेच त्यांना तीर्थंकर असे सुद्धा म्हणतात. आर्हत दर्शनामध्ये एकूण चोवीस तीर्थंकर प्रसिद्ध आहेत. अंतिम तीर्थंकर हे वर्धमान आहेत आणि त्यांना “जिन” या नावाने सुद्धा ओळखले जाते. त्यामुळे आर्हत दर्शन हे जैन दर्शन

या नावाने प्रतिपादित झाले आहे. जीव, अजीव, पुण्य, पाप, स्रव, संवर, निर्जर, बन्ध, मोक्ष इत्यादि नऊ पदार्थ जैनांनी स्वीकारले आहेत.

जीवाजीवौ तथा पुण्यं पापमास्त्रवसंवरौ।

बन्धश्च निर्जरामोक्षौ नव तत्त्वानि तन्मते ॥११॥

॥ षड्दर्शनसमुच्चयः - ४७॥

जीवः चैतन्यमयः। ज्ञानं हि तस्य लक्षणम्। निसर्गतः सः अनन्तज्ञानविशिष्टः शरीरपरिमाणश्च। किन्तु कर्मावरणेन आवृतत्वात् चैतन्यस्वरूपं नावभासते। अजीवः भोग्यप्रपञ्चः। सत्कर्मपुद्गलः पुण्यम्। तद्विपरीतं पापम्। विषायाभिमुख्येन इन्द्रियाणां प्रवृत्तिः अस्रवः। शमदमादिरूपा प्रवृत्तिः संवरः। निर्जरयनि नाशयनि कल्मपमिति निर्जरः तप्तशिलारोहणादिः। बन्धः कर्म, मोक्षः कर्मनाशे सत्यलोकाकाशप्रविष्टस्य सततोर्ध्वगमनम्। संक्षेपतस्तु द्वावेव विभागौ जीवाजीवाख्यौ। तयोः प्रकारान्तरेण पञ्चधा विभागः विद्यते। पञ्चास्तिकायपदेन ते प्रसिद्धाः। अस्तिकायपदं पदार्थवाची। पञ्चास्तिकायाः च जीवास्तिकायः पुद्गलास्तिकायः धर्मास्तिकायः अधर्मास्तिकायः आकाशास्तिकायः इति। तत्र पूर्यन्ते गलन्ति इति व्युत्पत्या सिद्धः पुद्गलशब्दः परमाणुवाची। तत्समूहः पृथिव्यादिः अत्र विवक्षितः। सम्यग्दर्शनसम्यग्ज्ञान-सम्यक्चारित्र्याख्यरत्नत्रयसेवनेन पुनः जीवः शुद्धरूपं प्राप्नोति कैवल्यं च भजते। न एते ईश्वरमङ्गीकुर्वन्ति। कर्म एव स्वयं फलं प्रददाति इति तेषां नयः। एतन्मतसारः एवमुक्तः –

जीव चैतन्यमय आहे. ज्ञान हे त्याचे लक्षण आहे. निसर्गातः जीव हा अनंत ज्ञानाने विशिष्ट तसेच शरीर त्याचे परिणाम आहे. परंतु कर्माच्या आवरणाने

आच्छादित असल्याने त्याचे चैतन्य स्वरूप भासत नाही. अजीव हे भोग्यप्रपंच आहे. सत्कर्म पुद्गल हे पुण्य आहे. त्या विरुद्ध जे आहे ते पाप आहे. विषयाला अनुसरून इंद्रियांची प्रवृति ही अस्त्रव आहे. शम दम इत्यादि प्रवृत्ति म्हणजे संवर आहे. निर्जरयनि म्हणजे नाशयनि, नाशयनि म्हणजे कल्मप. या संबंधाने निर्जर हे तप्तशिलारोह आहे. बंध म्हणजे कर्म, मोक्ष म्हणजे कर्मनाश झाल्यावर सत्यलोक आणि आकाशामध्ये प्रविष्ट असलेल्याने सतत ऊर्ध्वगमन होते. संक्षेपाने जीव आणि अजीव हे दोन विभाग आहेत. त्यामध्ये अन्य पाच विभाग आहेत, आणि ते पाच अस्तिकाय या पदाने प्रसिद्ध आहेत. अस्तिकायपद हे पदार्थवाची आहे. जीवास्तिकाय, पुद्गलास्तिकाय, धर्मास्तिकाय, अधर्मास्तिकाय, आकाशास्तिकाय हे पाच प्रकारचे अस्तिकाय आहेत. येथे **पूर्यन्ते गलन्ति** या पदाने उत्पन्न झालेला पुद्गल शब्द परमाणुवाची आहे. त्याचा समूह पृथिव्यादि येथे विवक्षित आहे. सम्यकदर्शन, सम्यकज्ञान, सम्यकचारित्र्य या तीन रत्नांमुळे जीव पुन्हा शुद्धस्वरूप आणि कैवल्याला प्राप्त होईल. ते ईश्वराला स्वीकारत नाहीत. कर्म स्वतः फलदाता आहे असे त्यांचे मत आहे, या मतानुसार ते म्हणतात -

अस्त्रवो भयहेतुः स्यात् संवरो मोक्षकारणम् ।
इतीयमाहती दृष्टिरन्यदस्याः प्रपञ्चनम् ॥१२॥

उक्तपदार्थानां विषये सप्तभङ्गीनयः एतैः अङ्गीक्रियते। सप्तानाम् अस्तित्वादीनां भङ्गानां समाहारः सप्तभङ्गी तस्याः नयः सप्तभङ्गीनयः। यदि घटादीनामपि सर्वात्मना सदैकरूपत्वे, प्राप्यात्मनः तदेव स्वरूपमिति तदर्थं प्रयत्नः न स्यात्। अतः घटादिपदार्थानां विषये सप्तभङ्गीनयः अङ्गीकृतः। ते च सप्तभङ्गाः स्यादस्ति. स्यान्नास्ति. स्यादस्ति च नास्ति च.

स्यादवक्तव्यः स्यादस्ति चावक्तव्यश्च, स्यान्नास्ति चावक्तव्यश्च, स्यादस्ति च नास्ति च अवक्तव्यश्च। उक्तञ्च –

उक्तपदार्थाविषयी ते सप्तभंगीनय स्वीकारतात. (सप्तानाम् अस्तित्वादीनां भङ्गानां समाहारः सप्तभङ्गी तस्याः नयः सप्तभङ्गीनयः) सप्त अस्तित्ववादी भंगांचा समाहार म्हणजे सप्तभंगी होय, त्यांचा नय म्हणजे सप्तभंगीनय. जर घटादी पदार्थांमध्ये सदैव एकरूपता असेल तर भिन्न स्वरूप प्राप्त करण्याकरिता प्रयत्न करू नयेत. म्हणून घटादिपदार्थ विषयी ते सप्तभंगी स्वीकारतात. स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यः, स्यादस्ति चावक्तव्यश्च, स्यान्नास्ति चावक्तव्यश्च, स्यादस्ति च नास्ति च अवक्तव्य इत्यादि सप्तभंग आहेत.

तद्विधानविवक्षायां स्यादस्तीति गतिर्भवेत्।
स्यान्नास्तीति प्रयोगः स्यात्तनिषेधे विवक्षिते ॥१३॥
क्रमेणोभयविवक्षायां प्रयोगः समुदायवान् ।
युगपत्तद्विवक्षायां स्यादवाच्यमशक्तितः॥१४॥
आद्यावाच्यविवक्षायां पञ्चमो भा इष्यते।
अन्त्या वाच्यविवक्षायां षष्ठभङ्गसमुद्भवः॥
समुच्चयेन युक्तस्य सप्तमो भङ्ग इष्यते ॥१५॥

॥ब.सू०.न्यायनिर्णयः - २।२।६।३३॥

तत्र स्याच्छब्दस्य कथञ्चित् इत्यर्थः। अतः स्यादस्ति नाम कथञ्चिदस्ति इति। तत्र वस्तुनः अस्तित्वविवक्षायां स्यादस्तीति, नास्तित्ववाञ्छायां स्यान्नास्तीति, क्रमेणोभयवाञ्छायां स्यादस्ति च नास्ति च इति, युगपद्विवक्षायां अस्ति नास्ति इति शब्दद्वयस्य युगपद्वक्तुम् अशक्यत्वात् स्यादवक्तव्यः इति, आद्यचतर्थीविवक्षायां स्यादस्ति च अवक्तव्यश्च इति.

द्वितीयचतर्थयोः विवक्षायां स्यान्नास्ति च अवक्तव्यश्च इति, तृतीयचतुर्थयोः विवक्षायां अस्ति च नास्ति च अवक्तव्यश्च इति। एवम् एकत्वानेकत्वनित्यत्वानित्यत्वादिविषयेऽपि ऊह्यम्।

जैनमते विभागद्वयं विद्यते। श्वेताम्बरः दिगम्बरः इति । आचारगतभेदः एव ईदृशविभागहेतुः। तयोः मतयोः सिद्धान्तभेदं दर्शयति एषा कारिका –

तिथे स्यात् शब्दाचा काहीतरी असा अर्थ आहे. म्हणून स्यादस्ति म्हणजे "काहीतरी होऊ शकेल" असा अर्थ घ्यावा. येथे वस्तूंच्या अस्तित्वाची विवक्षा असताना स्यादस्ति, असण्याची अपेक्षा विवक्षित नसताना स्यान्नास्ति, क्रमशः दोन्ही विवक्षित शब्द म्हणजे स्यादस्ति व स्यान्नास्ति. दोन्ही शब्दांची एकत्रित विवक्षा असताना अस्ति तसेच नास्ति शब्दांचा वापर होतो. एकाच जागी दोन्ही शब्दांचा प्रयोग करणे योग्य नसेल तर फक्त "स्यात्" वापरावे. पहिल्या चार विवक्षा असताना स्यादस्ति तसेच अवक्तव्यश्च इत्यादि. द्वितीया तसेच चतुर्थेची विवक्षा असताना स्यान्नास्ति च अवक्तव्यश्च इति, तृतीये तसेच चतुर्थ पर्यन्तची विवक्षा असताना अस्ति च नास्ति च अवक्तव्यश्च याप्रमाणे असावे. अशाप्रकारे एकत्व, अनेकत्व, नित्यत्व, अनित्यत्व इत्यादि विषयांचा सुद्धा अध्याहार करावा.

जैनांच्या मते दोन विभाग आहेत. श्वेताम्बर आणि दिगम्बर. आचार पद्धतीमुळे असे दोन विभाग केले गेले आहेत. या दोन विभागांमधील सिद्धांतभेद या कारिका दर्शवितात –

भुङ्क्ते न केवली न स्त्री मोक्षमेति दिगम्बरः।
प्राहुरेषामयं भेदो महान् श्वेताम्बरैः सह ॥१६॥

केवलज्ञानसम्पन्नः न भुङ्क्ते। न स्त्री मोक्षमेति। तासामपि पुरुषजन्मप्राप्त्युत्तरमेव मोक्षः इति दिगम्बरः ब्रूते । श्वेताम्बरः एतत्सर्वं

निराकरोति।

केवलज्ञान संपन्न असले तरी स्त्रीला मोक्ष मिळत नाही. त्यांना पुरुषजन्म प्राप्त केल्यानंतरच मोक्ष मिळतो असे दिगम्बरांचे मत आहे. श्वेताम्बर या सर्वाचे निराकरण करतात.

नैयायिकवैशेषिकीयाः –

न्यायदर्शने प्राधान्येन प्रमाणचर्चा, वैशेषिकदर्शने प्राधान्येन पदार्थचर्चा विद्यते। तत्र न्यायदर्शनं गौतमीयम्। प्रथमेन न्यायसूत्रेण षोडश पदार्थाः निर्दिष्टाः येषां तत्त्वज्ञानात् निःश्रेयसं स्यात् ।

न्यायदर्शनामध्ये प्रधानतया प्रमाण चर्चा तसेच वैशेषिकदर्शनामध्ये पदार्थ संबंधी चर्चा आहे. न्यायदर्शन महर्षि गौतम प्रणीत आहे. प्रथम न्यायसूत्रद्वारा सोळा पदार्थ मानले गेले आहेत, यांच्या तत्त्वज्ञानाने मोक्ष प्राप्ती होते.

षोडश पदार्थाः –

प्रमाणं च प्रमेयं च संशयश्च प्रयोजनम् ।
दृष्टान्तोऽप्यथ सिद्धान्तोऽवयवस्तनिर्णयौ ॥१७॥
वादो जल्पो वितण्डा च हेत्वाभासाश्छलानि च।
जातयो निग्रहस्थानान्येषामेवं प्ररूपणा ॥१८॥

॥ षड्दर्शनसमुच्चयः - १४, १५॥

तत्र प्रमाणं तु चतुर्विधं प्रत्यक्षानुमानोपमानागमाख्यं प्रसिद्धम्। प्रमायां यत् प्रतिभासते तत् प्रमेयम्। तच्च आत्माद्यपवर्गान्तं द्वादश। संशयादीनां तु लक्षणमेवं निरूपितं षड्दर्शनसमुच्चये -

प्रमाण चार प्रकारचे आहेत. प्रत्यक्ष, अनुमान, उपमान आणि आगम (शब्द) इत्यादि. प्रमा (सन्देहरहित स्पष्ट ज्ञान) मध्ये जे दिसते त्याला प्रमेय असे म्हणतात. आणि ते आत्म्यापासून अपवर्गा पर्यन्त बारा आहेत. संशय इत्यादीचे लक्षण षड्दर्शनसमुच्चयामध्ये निरूपित केले आहे.

किमेतदिति सन्दिग्धः प्रत्ययः संशयो मतः।

प्रवर्तते यदर्थित्वात्तत्तु साध्यं प्रयोजनम् ॥१९॥

॥ षड्दर्शनसमुच्चयः - २५॥

अनिश्चयात्मकं ज्ञानं संशयः। यथा स्थाणुर्वा पुरुषो वा इति। पुरुषः यमधिकृत्य प्रवर्तते तत् प्रयोजनम्। यथा स्वर्गादिकम्।

अनिश्चयात्मक ज्ञानाला संशय असे म्हणतात. ज्याप्रमाणे – शाखारहित वृक्ष/शिलेला पाहून हा पुरुष आहे किंवा शिखारहित वृक्ष/शिला असा सन्देह निर्माण होणे. पुरुष ज्याच्यासाठी प्रवृत्त होतो त्याला प्रयोजन असे म्हणतात. जसे स्वर्गादि.

दृष्टान्तस्तु भवेदेष विवादविषयो न यः।

सिद्धान्तस्तु चतुर्भेदः सर्वतन्त्रादिभेदतः॥२०॥

॥ षड्दर्शनसमुच्चयः-२६॥

पण्डितापण्डितानां यस्मिन् अर्थे बुद्धिसाम्यं सः दृष्टान्तः। यद्वा दृष्टः अन्तः निश्चयः येन सः दृष्टान्तः भवति। यथा यत्र यत्र धूमः तत्र तत्र अग्निः इति अन्वयव्याप्तेः महानसः दृष्टान्तः। प्रामाणिकत्वेन अभ्युपगतः अर्थः सिद्धान्तः। यथा पञ्च ज्ञानेन्द्रियाणि इति। सिद्धान्ते सर्वतन्त्रादयः चत्वारः भेदाः विद्यन्ते।

पण्डित आणि अपण्डित या दोघामध्ये ज्या अर्थी बुद्धिसाम्य होते त्याला दृष्टान्त असे म्हणतात. अथवा (बुद्धिसाम्य) ज्याने निश्चित केला जातो तो

दृष्टान्त आहे. उदाहरणाच्या रूपात ते सांगतात – ज्याप्रमाणे जिथे जिथे धूर असतो तिथे तिथे अग्निच वास्तव्य आहे. या अन्वयव्याप्तिचा दृष्टान्त पाकशाला आहे. प्रामाणिक रूपाने स्वीकृत केला गेलेला अर्थ सिद्धान्त मानला जातो. जसे – पाच ज्ञानेन्द्रिय, सिद्धान्तामध्ये सर्वतन्त्रादि चार भेद आहेत.

प्रतिज्ञाहेतुदृष्टान्तोपनया निगमस्तथा।
अवयवाः पञ्च तर्कः संशयोपरमो भवेत् ॥२१॥
यथा काकादिसम्पातात् स्थाणुना भाव्यमत्र हि।
ऊर्धं सन्देहतर्काभ्यां प्रत्ययो निर्णयो मतः॥२२॥

॥ षड्दर्शनसमुच्चयः – २७, २८ ॥

परार्थानुमानवाक्यस्य एकदेशः अवयवः। ते च अवयवाः पञ्च प्रतिज्ञाहेतुदृष्टान्तोपनयनिगमनाख्याः। संशयोपरमः येन भवति सः तर्कः। यथा दूरस्थायां पुरुषाकृतौ काकोपवेशनादिकं संवीक्ष्य यद्ययं पुरुषः स्यात् न तत्र काकः आस्येत। तस्मात् न सः पुरुषः किन्तु स्थाणुः इति मनोव्यापारः तर्कः। सन्देहतर्काभ्यां यत् फलीभूतं ज्ञानम् उत्पद्यते सः निर्णयः अभिप्रेतः। यथा नायं पुरुषः किन्तु स्थाणुरेवेति विनिश्चयः।

परार्थ अनुमानामध्ये जे वाक्य प्रयुक्त होते, त्याच्या एकदेश अवयव मानला जातो. एकूण पाच अवयव आहेत – प्रतिज्ञा, हेतु, दृष्टान्त, उपनय आणि निगमन इत्यादि. संशय हे तर्काच कारण आहे. ज्याप्रमाणे दूरस्थित पुरुषकृतिला पाहून त्याच्यावर कावळ्याला बसलेले पाहून जर तो पुरुष होतो तर त्याच्यावर कावळा नाही बसत. त्यामुळे तो पुरुष नाही परंतु शिला/शाखारहित वृक्ष आहे, या प्रकारच्या मनोव्यापाराला तर्क असे म्हणतात. सन्देह आणि तर्काने जे फलित ज्ञान उत्पन्न होते, त्याला तर्क असे

म्हणतात. यथा - हा पुरुष नाही परंतु शिला/शाखारहित वृक्ष आहे, असा विशिष्ट निश्चय होणे.

आचार्यशिष्ययोः पक्षप्रतिपक्षपरिग्रहात्।

यः कथाभ्यासहेतुः स्यादसौ वाद उदाहृतः॥२३॥

यः - २९॥

तत्त्वनिर्णयार्थं वादिप्रतिवादिनोः पक्षप्रतिपक्षपरिग्रहपूर्वकं यत् सम्भाषणं तत् वादः।

विजिगीषुकथा या तु छलजात्यादिदूषणम् ।

स जल्पः सा वितण्डा तु प्रतिपक्षविवर्जिता ॥२४॥

॥षड्दर्शनसमुच्चयः - ३०॥

छलजात्यादिसमन्विता जेतुमिच्छोः या कथा सः जल्पः। यत्र परपक्षनिराचिकीर्षया प्रतिपक्षं नोपस्थाप्यते परपक्षविदलने हि यत्र तात्पर्यं भवति सा वितण्डा।

जेंव्हा छलादि भावनेने केवळ जिंकण्याची इच्छा असते तेंव्हा त्याला जल्प असे म्हणतात. जिथे परपक्षाला निराकृत करण्याच्या इच्छेने प्रतिपक्ष उपस्थापित न करता केवळ परपक्षाला पराभूत करण्यामध्ये तात्पर्य असते, त्याला वितण्ड असे म्हणतात.

हेत्वाभासा असिद्धाद्याश्छलं कूपो नवोदकः।

जातयो दूषणाभासाः पक्षादिर्दूष्यते न यैः॥ २५॥

॥षड्दर्शनसमुच्चयः - ३१॥

साध्यस्य असाधकः हेतुत्वेन अभिमतः हेत्वाभासः। स च सव्यभिचारादिभेदेन पञ्चविधः। अभिप्रायान्तरेण प्रयुक्तस्य अर्थान्तरं

परिकल्प्य दूषणं छलम्। यथा 'कूपो नवोदकः' इत्येवं नूतनाभिप्रायेण केनचिन्नवशब्दे प्रयुक्ते छलवादी नवशब्दस्य नवसंख्यार्थे शक्तिं मत्वा उक्तं प्रतिषेधति। जातिः दूषणाभासः यैः पक्षादिः न दूष्यते । यथा शब्दः अनित्यः कृतकत्वात् घटवत् इत्युक्ते अमूर्तत्वेन नित्याकाशसाधर्म्यात् नित्यः शब्दः किमर्थं न इत्याक्षेपः जातिः।

साध्याचा असाधक आणि हेतुत्वाने अभिमत म्हणजे हेत्वाभास होय. हेत्वाभास सव्यभिचारदि भेदाने पाच प्रकारचे आहेत. वक्त्याचे इष्ट अर्थाला सोडून अन्य अर्थ घेऊन दूषण करणे छल होय. ज्याप्रमाणे, कूपो नवोदकः (आड नव्या पाण्याने युक्त आहे) इथे कोणी नूतन या अर्थी नव शब्दाचा प्रयोग केलेला आहे. परंतु जेंव्हा कोणी छळवादी हे ऐकतो तर तो नव शब्द संख्यार्थी मानुन उक्त वाक्याचा प्रतिषेध करतो. जाति दूषणीय असून पक्षादि नाही. ज्याप्रमाणे, शब्द हे अनित्य आहे तर घटवत् म्हणजे अमूर्तत्वाने नित्याकाशसाधर्म्य येथे नित्य शब्दाचे प्रयोजन का नाही असा आक्षेप म्हणजे जाति.

निग्रहस्थानमाख्यातं परो येन निगृह्यते।

प्रतिज्ञाहानिसंन्यासविरोधादिविभेदवत् ॥२६॥

॥षड्दर्शनमुच्चयः - ३२॥

अपरः येन निगृह्यते तत् निग्रहस्थानमिति कथ्यते । यथा 'शब्दः नित्यः' इति श्रुत्वा परेण दूषणे उक्ते 'क्व एवमाह' शब्दः अनित्यः इत्युक्तिः। तत्र प्रतिज्ञाहान्याद्यनेके भेदाः विद्यन्ते।

दुसऱ्याला ज्याद्वारे पराजित केल्या जाते त्यास निग्रहस्थान म्हणतात. ज्याप्रमाणे, शब्द नित्य आहे असे ऐकून दुसऱ्याने त्यात दोष सांगितल्यावर शब्द अनित्य असे म्हणावे, याचे प्रतिज्ञाहानी इत्यादी अनेक भेद होतात.

न एतेषां तत्त्वज्ञानसमनन्तरमेव अपवर्गः। तत्त्वज्ञानात् दुःखजन्मप्रवृत्ति-

दोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः। तत्र मिथ्याज्ञानं नाम अनात्मनि देहादौ आत्मबुद्धिः। मिथ्याज्ञानेन अनुकूलेषु रागः प्रतिकूलेषु द्वेषः प्रादुर्भवति। ततः रागादयः दोषाः स्युः। दोषात् धर्माधर्मरूपा प्रवृत्तिः। अत्र प्रवृत्तिसाधनौ धर्माधर्मौ प्रवृत्तिशब्देन अभिहितौ। ततश्च प्रशस्तं निन्दितं वा जन्म। तस्मिन् सति दुःखप्रादुर्भावः। तत्र तत्त्वज्ञानात् मिथ्याज्ञाननाशः, ततः क्रमशः दोषप्रवृत्तिजन्मदुःखानां विनाशः इत्यभ्युपगम्यते। ततश्च दुःखाभावरूपस्य मोक्षस्य सिद्धिः।

या सर्व तत्त्वज्ञानाचे बोध झाल्याने उपरांत अपवर्ग (फलप्राप्ति/मोक्षप्राप्ति) झाली पाहिजे असे नाही. तत्त्वज्ञानाने दुःख, जन्म, प्रवृत्ति, दोष, मिथ्याच्या ज्ञान समनन्तर काळामध्ये मोक्षप्राप्ति आहे. मिथ्याज्ञान अर्थात् आत्मारहित देहामध्ये आत्मा असणे. मिथ्याज्ञान अर्थात अनुकूल विषयामध्ये राग आणि प्रतिकूल विषयामध्ये द्वेष उत्पन्न होने. त्याने रागादि द्वेष उत्पन्न होते. दोषाने धर्म आणि अधर्म मध्ये प्रवृत्ति होते. प्रवृत्तिसाधन इथे धर्म आणि अधर्म हे प्रवृत्ति या शब्दाने विवक्षित आहे. प्रशस्त आणि निंदित जन्म आणि त्याच्यात दुःखाचे प्रादुर्भाव होते. तत्त्वज्ञानाने मिथ्यानाश आणि त्याने दोष, प्रवृत्ति, जन्म आणि दुःखांचे विनाश होते. आणि त्याने दुःखाच्या अभाव रूप मोक्षाची सिद्धि होते.

वैशेषिकदर्शनमेव काणाददर्शनमिति अभिधीयते। गौतमेन प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानात् मोक्षः इत्युक्तं न्यायशास्त्रे। तत्तु कणादसम्मतमेव। किन्तु अत्र द्रव्यादिसप्तानां पदार्थानां निरूपणं विशेषेण कृतम्।अतः ईदृशं विशेषमुद्दिश्य प्रवृत्तत्वात् इदं वैशेषिकदर्शनमिति गीयते। अथवा विशेषरूपपदार्थस्य अङ्गीकारात् वैशेषिकम्।

वैशेषिक दर्शन हेच काणाद दर्शन या नावाने ओळखले जाते. गौतम ऋषींनी न्याय शास्त्रामध्ये प्रमाणादि सोळा पदार्थांना तत्त्वज्ञानाने मोक्ष

मिळतो असे सांगितले आहे. या विचाराशी कणाद ऋषि पण सम्मत आहेत. परंतु इथे द्रव्यादि सप्त पदार्थ विशेषरूपाने वर्णित केलेले आहेत. त्यामुळे विशेष उद्देशुन या शास्त्राची प्रवृत्ति राहण्याच्या कारणाने याला वैशेषिक दर्शन असे म्हणतात अथवा विशेषरूपाच्या पदार्थाच्या अङ्गीकाराने वैशेषिक दर्शन असे होय.

परमेश्वरज्ञानं श्रवणमननिदिध्यासनसाध्यम् ।तत्र मननम् अनुमानाधीनम्। अनुमानं च व्याप्तिज्ञानम् । व्याप्तिज्ञानार्थं पदार्थपरिज्ञानमपेक्षितम् । अतः पदार्थानां निरूपणं वैशेषिकदर्शने प्राधान्येन कृतम् । वैशेषिकैः सप्त पदार्थाः अङ्गीकृताः । ते च -

परमेश्वराविषयीचे ज्ञान श्रवण, मनन, निदिध्यासन्याने साध्य होते. मनन अनुमानाच्या अधीन आहे. अनुमान व्याप्तिज्ञान आहे. व्याप्तिज्ञान्यासाठी पदार्थपरिज्ञान अपेक्षित आहे. त्यासाठी वैशेषिक दर्शन मध्ये प्रधानतः पदार्थांचे निरूपण केले आहे. वैशेषिकांनि सात पदार्थ सांगितले आहे. आणि ते या प्रकारे आहे -

सप्तपदार्थाः -

द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।
समवायस्तथाऽभावः पदार्थाः सप्त कीर्तिताः ॥२७॥

॥ कारिकावली - २ ॥

तत्र पृथिव्यप्तेजोवाय्वाकाशकालदि-गात्ममनांसि नव द्रव्याणि । तेषु पृथिव्यप्तेजोवायवः नित्यानित्यभेदेन द्विविधाः । परमाणुरूपं नित्यम् कार्यरूपमनित्यम्। परमाणोः स्वरूपं वैशेषिकैः एवं निरूपितम् ।

नऊ द्रव्य सांगितले आहे – पृथ्वी, जल, तेज, वायु, आकाश, काल, दिशा, आत्मा आणि मन. यामध्ये पृथ्वी, जल, तेज, वायु हे दोन प्रकारचे आहे –

नित्य आणि अनित्य. परमाणुरूप नित्य आहे आणि कार्यरूप अनित्य. परमाणुचे स्वरूप वैशेषिक याप्रकारे सांगतात.

परमाणुः -

जालसूर्यमरीचिस्थं यत् सूक्ष्मं दृश्यते रजः ।
तस्य षष्ठस्तु यो भागः परमाणुः स उच्यते ॥२८॥

जालसूर्यमरीचिस्थं यत् सूक्ष्मं रजः दृश्यते, तस्य षष्ठतमः भागः परमाणुः । वैशेषिकैः त्र्यणुकात् उद्भूतरूपवत्त्वमङ्गीक्रियते । अतः द्व्यणुकादीनां दर्शनं न सम्भवति । परिदृश्यमानः च सूक्ष्मः अणुः सः त्र्यणुकं भवेत् उद्भूतरूपवत्त्वात्। अतः जालसूर्यमरीचिस्थं परिदृश्यमानं सूक्ष्मं रजः त्र्यणुकम् । तथा सति द्व्यणुकत्रयसवाङ्गातस्य तस्य षष्ठतमः भागः परमाणुः भवति । परमाणुलक्षणं वात्स्यायनेन एवमुक्तम् ।

सूर्यकिरणांमध्ये जे सूक्ष्म रजोकण दिसतात, त्याचा सहावा भाग म्हणजे परमाणु. वैशेषिकाने त्र्यणुक हे दृष्ट ज्ञान उत्पन्न होते असे म्हणतात. म्हणून द्व्यणुकाचे दर्शन संभव नाही होत. जो दृश्यमान अणु आहे तो त्र्यणुक (तीन अणुचे संघात/समुदाय) होय, असे असता म्हणाले जाते की द्व्यणुक/त्र्यणुक संघाताचा षष्ठतम भाग परमाणु असे म्हणाले जाते. परमाणुलक्षण वात्स्यायन या प्रकारे सांगितले आहे –

यस्मान्नाल्पतरमस्ति यः परमोऽल्पस्तत्र निवर्तते ।
यतश्च नाल्पीयोऽस्ति तं परमाणुं प्रचक्ष्महे ॥२९॥

॥ वात्स्यायनभाष्यम् ॥

उपान्त्यं द्रव्यं आत्मा स द्विविधः परमात्मा जीवात्मा चेति । परमात्मा एव ईश्वरः इति अभिधीयते । ईश्वरास्तित्वसाधने एवं हेतवः उपन्यस्ताः ।

उपान्त्य द्रव्य आत्मा आहे. यांचे दोन प्रकार आहेत – परमात्मा आणि जीवात्मा. परमात्मा हा ईश्वर आहे असे म्हणले जाते. ईश्वराच्या अस्तित्वसाधनासाठी हेतु उपन्यस्त केले जाते.

ईश्वरनिरूपणम् -

सापेक्षत्वादनादित्वाद्वैचित्र्याद्विश्ववृत्तितः।
प्रत्यात्मनियमाद्भुक्तेरस्ति हेतुरलौकिकः ॥३०॥

॥ न्यायकुसुमाञ्जलिः - १।४॥

अलौकिकः हेतुः अस्ति इति साध्यम्। अलौकिकः हेतुः नाम अदृष्टं कारणम्। कार्य हेतुमत् सापेक्षत्वात् (सहापेक्षया वर्तमानत्वात् कादचित्कत्वात् इत्यर्थः।) ननु हेतोः नित्यत्वे कार्यस्यापि नित्यत्वं स्यात् अतः कारणास्यापि कादचित्कत्वं वक्तव्यम् तदा हेतोः अपि अन्यः हेतुः तस्य पुनः अन्यः इति अनवस्था स्यात् इति चेद् अनादित्वात् ,न च अनवस्था कार्यकारणभावस्य अनादित्वात्। स्यात् सकारणं किन्तु एकजातीयमेव कारणं भवतु इति चेत् वैचित्र्यात् , विचित्रकारणाभावे कार्यस्य वैचित्र्यं न स्यात्। अस्ति च कार्यस्य वैचित्र्यम् अतः कारणस्य वैचित्र्यं विद्यत एव। अस्तु कारणस्य वैचित्र्यं किन्तु दृष्टः एव विचित्रः जगद्वैचित्र्यस्य। अतः अलौकिकः हेतुः न सिद्धयतीति चेत् विश्ववृत्तितः। दृष्टस्य वैचित्र्यस्य मात्रं हेतुत्वे प्रेक्षावतः विश्वस्य यागादौ प्रवृत्तिः न स्यात्। यतः क्षणिकत्वात् यागस्य कालान्तरभाविनः फलस्य भुक्तिः न स्यात्।

तस्मात् किञ्चित् अपूर्वमनेन जनयितव्यम् इति कल्प्यते। अस्तु तथापि तददृष्टं किं भोग्यनिष्ठम् उत भोकृनिष्ठम्? अतः आह प्रत्यात्मनियमाद्भुक्तेः, सुखदुःखसाक्षात्कारं प्रति नियमदर्शनात् प्रत्यात्मनियतम्। तस्य च अस्मदादिभिः ज्ञातुमशक्यत्वात् तदुपदेष्टा ईश्वरः सिद्ध्यति।

अलौकिक हेतु हा साध्य आहे. अलौकिक हेतु अर्थात अदृष्ट कारण. कार्य हेतुमत् होतो, कारण तो सापेक्ष असतो [कारण आहे म्हणून कार्य आहे त्याचा आभाव असताना नाही] जर हेतु नित्य असेल तर कार्य पण नित्य असते. म्हणून कारणाचे पण कदाचित्कत्व होईल तेंव्हा हेतुचे अन्य हेतु पुन्हा अन्य हेतु या प्रकारे अनवस्था होईल. म्हणून अनादीत्वात असे म्हणतात, कार्यकारणभावाने अनादि झाल्याने अनवस्था नाही होणार, कारण एकजातीय आहे असे जेंव्हा म्हणतात तेंव्हा वैचित्र्य कारणाने विचित्रकरणाच्या अभावाने कार्याचे वैचित्र्य नाही होणार. कार्याचे वैचित्र्य तर आहे म्हणून कारणाचे वैचित्र्य होणे आवश्यक आहे. कारणाचे वैचित्र्य असेल तरीपण जगतामध्ये सर्व विचित्रताला प्राप्त आहे. म्हणून अलौकिक हेतु सिद्ध नाही होणार, तेंव्हा हे विश्ववत्तित. केवल दृष्ट वैचित्र्याच्या हेतुमात्राने प्रेक्षावत् विश्वाची यागादिमध्ये प्रवृत्ति नाही होऊ शकत. कारण यागाच्या क्षणिक असल्याने कालान्तरभावि फळाची भुक्ति नाही होणार, अतः काही अपूर्व हे याने जनित झाले पाहिजे अशी कल्पना करतात. तददृष्ट भोग्यनिष्ठ होईल किंवा भोकृनिष्ठ? यावर म्हणतात, प्रत्यात्मनियमाद् भुक्तेः सुख, दुःख, साक्षात्काराच्या प्रति नियमदर्शनाच्या कारण प्रत्यात्मनियत. याचे आमच्याद्वारे जानना असंभव आहे. म्हणून त्याचा उपदेष्टा ईश्वर आहे असे सिद्ध होते. म्हणून अलौकिक हेतु सिद्ध नाही होणार. तेंव्हा म्हणतात विश्ववृत्तित. केवळ दुष्ट वैचित्र्य हेतूमात्राने प्रेक्षावत विश्वाची यागादीमध्ये प्रवृती नाही होणार कारण यागाचे क्षणिक झाल्याने कालांतरभावी फळाची भुक्ती नाही होणार. म्हणून काही अपूर्वच याने

जनित जाहले पाहिजे असि कल्पना करतात. तददुष्ट भोग्यनिष्ठ? यावर म्हणतात प्रत्यात्मनियमाद् भुक्ते. सुख, दुख, साक्षात्काराच्या प्रती नियम दर्शनाच्या कारणे प्रत्यात्मनियतम. याचे आपल्या द्वारे जाणून घेणे असंभव आहे. त्यामुळे त्याचे उपदेष्टा ईश्वर आहे असे सिद्ध होते.

कार्याऽऽयोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः।

वाक्यात् संख्याविशेषाच साध्यो विश्वजिदव्ययः॥३१॥

॥ न्यायकुसुमाञ्जलिः - ५। १॥

कार्यात्- कार्य सकर्तृकं कार्यत्वात् घटवत्। यथा घटस्य कर्ता कुलालः एवम् अस्य कार्यरूपस्य जगतः अपि कश्चन कर्ता भवदेव सः एव ईश्वरः।

कार्य सकर्तृक होत असते – कार्यत्वाच्या कारणात, घटा प्रमाणे तरह, यथा घटोत्पत्तिमध्ये घटाचा कर्ता कुम्भकार असतो, तथा या कार्यरूपी जगाचा कर्ता अवश्य कोणी असेल आणि तो ईश्वर आहे.

आयोजनात्- कर्मणः। परमाण्वादीनां जडानां स्वयंप्रवृत्यनुपपत्तेः, परमाणुपु आद्यकर्मणः प्रयत्नजन्यत्वात् तादृशप्रयत्नवत्त्वेन ईशरसिद्धिः।

कर्माचे - ज्या प्रकारे जेंव्हा परमाणुची स्वतःची प्रवृति होत नाही, त्यांच्या आद्यकर्माच्या प्रयत्नाद्वारे असल्याने त्याच प्रकारे प्रयत्नवत्वाने ईश्वर सिद्धी होते.

धृत्यादेः- क्षित्यादिब्रह्माण्डपर्यन्तं जगत् विधारकप्रयत्नाधिष्ठितम् गुरुत्ववत्त्वे सति अपतनधर्मकत्वात्तादृशप्रयत्नवत्त्वेन ईशरसिद्धिः। यथा चेतनेन विधृतत्वात् वियति विहङ्गमशरीरं पतनराहित्येन डयते तद्वत्। आदिपदेन नाशस्यापि परिग्रहः। ब्रह्माण्डनाशः प्रयत्नजन्यः नाशत्वात् घटनाशवत् ।

क्षित्यादि ब्रह्माण्डपर्यन्त्र त जगत्विधारकप्रयत्नाधिष्ठित आहे. गुरुत्वाच्या सोबत अपतनधर्मकत्व आहे म्हणून असा प्रयत्नवान ईश्वर आहे असे सिद्ध

होतो. ज्या प्रकारे चेतनाच्या करणाने पक्षी आकशामध्ये उडतात परन्तु चेतना रहित पक्षी उडुशकत नाहित. आदि या पदाने नाशाचे पण परिग्रह होतो. ब्रह्मांडाचा नाश प्रयत्नजन्य आहे, घटनाशाप्रमाणे.

पदात- व्यवहारात्। घटादिव्यवहारः स्वतन्त्रपुरुषप्रयोज्यः व्यवहारत्वात् आधुनिककल्पितलिप्यादिवत्। स स्वतन्त्रपुरुषः ईश्वरः।

व्यवहाराने - घटादी व्यवहार स्वतंत्र पुरुषप्रयोज्य आहे, व्यवहारकारणाने, ज्या प्रकारे आधुनिक काळामध्ये लिपींची कल्पना केलेली, तो स्वतंत्र पुरुष ईश्वर आहे.

प्रत्ययतः- वेदजन्यप्रमा वक्तृयथार्थवाक्यार्थज्ञानजन्या शाब्दप्रमाणत्वात् चैत्रवाक्यजन्यप्रमावत। अतः तादृशः वक्ता कश्चन भवेदेव। तस्य च असंसारित्वं वेदः असंसारिपुरुषप्रणीतः वेदत्वात् इति अनुमानेन सिद्धति। अतः ईश्वरसिद्धिः।

वेदाने जनित असंदेहात्मक ज्ञान अर्थात प्रमा वक्ताद्वारे प्रयुक्त द्वारे जनित यथार्थ ज्ञान जन्य आहे, शब्दप्रमाणाच्या कारणाने ज्या प्रकारे चैत्रा द्वारे उक्त वाक्यजनित प्रमा आहे. म्हणून या प्रकारचा कोणी वक्ता अवश्य ही असेल आणि तो असंसारी असेल, कारण वेद पण असंसारी पुरुषद्वारा प्रणीत केले आहे. या प्रकारे अनुमान केले जाते. म्हणून ईश्वराची सिद्धी या प्रकारे होते.

श्रुतेः- श्रुतिरपि ईश्वरकारणत्वं 'एको देवः सर्वभूतेषु गूढः' 'ईश्वरमुपासीत' इत्यादिना कण्ठतः ब्रवीति।

श्रुती पान ईश्वराच कारण आहे, 'एको देवः सर्वभूतेषु गूढः' [एकाच देव सर्व भुतामध्ये स्थित आहेत. 'ईश्वरमुपासीत' [ईश्वराची उपासना करा] या प्रकारे साक्षात कंठाने बोलले जाते.

वाक्यात्- वेदः पौरुषेयः वाक्यत्वात्। स च पुरुपः ईश्वरः।

वेद हा पौरुषेय आहे वाक्याच्या कारणाने, आणि तो पुरुष ईश्वर आहे.

संख्याविशेपात्- ड्यणुकपरिमाणजनिका संख्या अपेक्षाबुद्धिजन्या एकत्वान्यसंख्यात्वात्। तादृशापेक्षाबुद्धियुक्तत्वेन ईश्वरसिद्धिः।

दोन अणुच्या तुल्य परिणामद्वारा जनित संख्या अपेक्षाबुद्धीजन्य एकत्व अन्य संख्यात्वाची आहे, म्हणून या प्रकारची अपेक्षा बुद्धीत्वाच्या कारणाने ईश्वर सिद्ध होतो.

रूपादय चतुर्विंशतिः गुणाः। उत्पेक्षपणादीनि पञ्च कर्माणि। नित्यम् एकम् अनेकेषु समवायेन विद्यमानं परापरभेदेन द्विविधं सामान्यम्। नित्यसम्बन्धः गुणगुण्यादिषु विद्यमानः समवायः। प्रागभावादयः चत्वारः अभावाः। एतेषां पदार्थानां ज्ञानं प्रत्यक्षानुमानोपमानागमाख्यैः चतुर्भिः प्रमाणैः भवति। तत्र इन्द्रियाणि प्रत्यक्षप्रमाणानि। इन्द्रियार्थसन्निकर्षाज्जायमानं ज्ञानमपि प्रत्यक्षम् इति कथ्यते। प्रत्यक्षं द्विविधं लौकिकम् अलौकिकञ्चेति। लौकिकप्रत्यक्षं संयोगादिभिः सन्निकः जायते। अलौकिकप्रत्यक्षं त्रिविधात् सन्निकर्ष्षाज्जायते। ते च सन्निकर्षाः -

रुपाचे चौविस गुण आहेत, उत्क्षेपणादि पाच कर्म आहेत, नित्य एक, अनेकामध्ये समवाय संबंधाने विद्यमानावर आणि आणि अन्य असे दोन सामान्य आहे, नित्यसंबंध गुणगुण्यादीमध्ये विद्यमान समवाय आहे. प्रागभाव इत्यादि चार भाव आहेत, या पदार्थांचे ज्ञान प्रत्यक्ष, अनुमान, उपमान आणि आगम या चार प्रमाणाने होतो, प्रत्यक्ष द्विविध आहेत- लौकिक आणि अलौकिक. संयोगादीच्या द्वारे प्रत्यक्ष होतो, अलौकिक तीन सन्निकर्षाने होतो, उक्त सन्निकर्ष या प्रकारे.

अलौकिकप्रत्यासत्तयः -

अलौकिकस्तु व्यापारः त्रिविधः सम्प्रकीर्तितः।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥३२॥

॥ कारिकावली - ६३॥

सामान्यलक्षणा प्रत्यासत्तिः - प्रत्यासत्तिपदस्य सम्बन्धः इत्यर्थः। लक्षणपदेन स्वरूपमुच्यते। कश्चन पुरुषः महानसे अग्निं धूमं च दृष्ट्वा सकलधूमत्वेन सकलवह्नित्वेन ज्ञानं प्राप्य तयोः व्याप्तिं गृह्णाति यत्र यत्र धूमः तत्र तत्र अग्निः इति । अत्र सकलधुमवह्नयोः सन्निकर्पः धुमत्ववह्नित्वरूपसामान्यद्वारा सम्भवति इत्यतः इयं सामान्यलक्षणा प्रत्यासत्तिः।

प्रत्यासत्ति पदाचा संबंध हा अर्थ आहे, लक्षण पद स्वरूपाचे वर्णन करतो, कोणी पुरुष पाकशाळेमध्ये अग्नि आणि धूराला एक सोबत पाहतो आणि त्या दोघांचे सकल ज्ञान प्राप्त करून त्या दोघांच्या व्याप्ती ग्रहण करतो, यत्र यत्र धुमःतत्र तत्र अग्निः [जिथे जिथे धूर असतो तिथे तिथे अग्नि असतो] इथे सकल धुराचा आणि अग्नीचा सन्निकर्ष धुमत्व आणि वह्नित्वाच्या रूपसामान्यद्वारा होतो, त्यामुळे हा सामान्य लक्षण प्रत्यासत्ति आहे.

ज्ञानलक्षणा प्रत्यासत्तिः- एकस्य ज्ञानात्यत्र अपरस्य ज्ञानंतत्र ज्ञानलक्षणा प्रत्यासत्तिः। यथा गङ्गानदीदर्शनेन शीतलतायाः ज्ञानम्। यद्वा आम्रफलं दृष्ट्व चक्षुरिन्द्रियग्रहणायोग्यस्य माधुर्यस्य य ज्ञानम्।

एकाचे ज्ञान असल्याने दुसऱ्या कोणाचे ज्ञान होणे हे ज्ञानलक्षण आहे. यथा-गंगा नदीच्या ज्ञानाने शीतलतेचे ज्ञान होणे, अथवा आम्रफळ पाहुन चक्षु इंद्रियाने मधुरतेचे ज्ञान होणे.

योगजा प्रत्यासत्तिः- योगाभ्यासजनितःधर्मविशेषः। ततः ज्ञानम् उत्पाद्यते। याथ योगिनां परमाण्वादिनिखिलपदार्थज्ञानम।

योगभ्यासाने जनित धर्मविशेष, याच्या नंतर ज्ञानाची उत्पत्ती, यथा योग्यांचे परमाण्वादी निखिलपदार्थांचे ज्ञान होते.

सामान्यलक्षणप्रत्यासत्तिः सामान्यद्वारा भवतीति उक्तम्। सामान्यस्य लक्षणमेवमुक्तं प्राचीनैः - निःसामान्यत्वेसति विशेषान्यत्वेच सति समवेतत्वम् इति। किन्तु अस्य लक्षणस्य अन्वये सत्यपि आकाशत्वेजातिः नाङ्गीक्रियते एकव्यक्तिमात्रवृत्तिरूपबाधकस्य सत्त्वात्। न इदमेव जातेः बाधकम् अन्येऽपि सन्ति जातेः बाधकाः। तेषां सङ्ग्रहः अस्यांकारिकायां कृतः–

सामान्यलक्षण प्रत्यासत्ती सामान्यद्वारा होते असे म्हणले आहे. सामान्य का लक्षण प्राचीनद्वारा या प्रकारे म्हणाले आहे. निःसामान्यत्व, विशेषान्यत्व, सति समवेतत्व परंतु या लक्षणाचे अन्वय होऊन पण आकाशत्वा मध्ये जातीचा स्वीकार नाही होत. आकश हे एक आहे आणि अन्य आकशामध्ये जाती होत नाही. न केवळ हा एकच, जातीचे अन्य बाधक पण आहेत. त्यांचे संग्रह या कारिकामध्ये केला आहे.

जातिबाधकाः-

व्यक्तेरभेदस्तुल्यत्वंसङ्करोऽथानवस्थितिः।
रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः॥३३॥

एतेषु व्यक्तेरभेदः सङ्करः च जातित्वेबाधकौ। तुल्यत्वं जातेः भेदे बाधकम्। अनवस्था रूपहानिः असम्बन्धः च जातिमत्त्वेबाधकाः। अतः अत्र जातिश्च

जातिश्च जातिश्च जातिः इति एकशेषः। तत्र एकेन जातिपदेन जातित्वस्य अपरेण जातिभेदस्य अन्येन जातिमत्त्वस्य च ग्रहणम्।

यांच्या मधील व्यक्तिचा आणि सङ्कर ही जातीत्वातिल बाधक आहेत. तुल्यत्व जातीच्या भेदाचा बाधक आहे, अनवस्था, रूपहानि आणि असंबंध ही जातीचे बाधक आहेत. जातिश्च जातिश्च जातिश्च जातिः असा एकशेष केला आहे. तिथे एकजाती पदाने जातीत्वचे आणि अन्य जाती पदाने जातिभेदचे आणि तिसऱ्या जातीपदाने जातीमत्वचे ग्रहण होते.

व्यक्तेरभेदः - स्वाश्रयव्यक्तेरैक्यम्। बहुषु विद्यमानस्य एकस्य धर्मस्य य जातित्वेन सर्वैः वैंअभ्युपगतत्वात् एकव्यक्तौ जातिः नाभ्युपगम्यते। अतः एकव्यक्तिकत्वम् आकाशत्वादीनांजातित्वे बाधकम्।

स्वाश्रय व्यक्तिचे एकत्व. बहुत्र विद्यमान एक धर्माच्या जातित्वाचे भान होते. किन्तु एकच् व्यक्तिमध्ये जाति नाही होत. त्यामुळे एक व्यक्तित्व आकाशत्वादिच्या जातित्वाचे बाधक होते.

तुल्यत्वम् - अन्यूनानतिरिक्तवृत्तित्त्वम्। यथा बुद्धित्वज्ञानत्वयोः घटत्वकलशत्वयोः वा समानपदार्थवाचकर्थत्वात् तुल्यत्वम्। अतः तुल्यत्वंबुद्धित्वज्ञानत्वयोः घटत्वकलशत्वयोः भेदेभिन्नजातित्वे, बाधकं स्यात्।

न्यून आणि अतिरिक्तामध्ये सत्ता न होने तुल्यत्त्व आहे. तथा - बुध्दित्व आणि ज्ञानत्वाचे अथवा घटत्व आणि कलशत्वाचे समान पदार्थ वाचकत्व होत असल्याने तुल्यत्व आहे. म्हणुन एक व्यक्तित्व आकशत्वादिच्या जातित्वाचे बाधक होईल.

सङ्करः- परस्परात्यन्ताभावसमानाधिकरणधर्मयोः एकत्र समावेशः। यथा

पृथिव्यप्तेजोवाय्वाकाशानि पञ्चभूतानि पृथिव्यप्तेजोवायुमनांसि पञ्च मूर्तानि। तत्र भतू त्वं बहिरिन्द्रियग्राह्यविशेषगुणवक्त्वम्। मुर्तत्वम् परिच्छिन्न-परिमाणवक्त्वम्। भुतत्वंविहाय मनसि मुर्तत्वं, मुर्तत्वं विहाय गगनेभुतत्वं किन्तु तयोः पृथिव्यादिचतुष्टये सत्त्वात् सङ्करः। सङ्करः भुतत्वादीनां जातित्वे बाधकः। व्याप्यव्यापकाभावापन्नयोः जात्योः एव एकत्र समावेशः इति नियमः अङ्गीकृतः प्राचीनः यथा पृथिव्यां व्याप्यस्य पृथिवीत्वस्य व्यापकस्य द्रव्यत्वस्य समावेशः। अयंनियमः भुतत्वमुर्तत्वयोः विषयेनान्वेति इति सङ्करकरः दोषः। अयंनियमः नास्ति अतः साङ्कर्यं न जातिबाधकमिति नव्याः।

संकर-परस्पर अत्यन्ताभाव आणि सामानाधिकरण्य धर्माचा एकत्र समावेश संकर होतो. यथा - पृथ्वी, जल, तेज, वायु आणि आकाश हे पंचभूत आहे. पृथ्वी, जल, तेज, वायु आणि मन हे पंचमूर्त आहे. भूत अर्थात् बाह्येन्द्रियाने जो विशेष गुणाचे ग्रहण करते. मूर्तत्व अर्थात् परिच्छिन्न परिमाणवत्व आहे. मनामध्ये भूतत्व नाही मूर्तत्व आहे, गगनामध्ये भूतत्व आहे. मूर्तत्व नाही. किन्तु उनका पृथ्वी इत्यादि चारिमध्ये राहण्याने संकर आहे. संकर हा भूतत्वादिच्या जातित्वाचे बाधक आहे. व्याप्य आणि व्यापकाने युक्त जातिंचे एकत्र समावेश असा नियम प्राचीणानी स्वीकृत केला आहे. जसे की- पृथ्वीमध्ये व्याप्य पृथिवीत्व व्यापकाच्या द्रव्याचे समावेश. हा नियम भूतत्व आणि मूर्तत्वाचे विषयामध्ये अन्वित नाही होत हाच संकर दोष आहे. हा नियम नाही, अतः सांकर्य जातिबाधक नाही असे नव्यांचे मत आहे.

अनवस्था- अप्रामाणिकानन्तपदार्थकर्थ ल्पनाधाराविश्रान्त्यभावः अनवस्था। एषा जातेः जातिमत्त्वेबाधिका। घटपटादिषु घटत्वपटत्वादिजातिः तत्र पुनः इयं जातिः इयं जातिः इति अनगतु प्रतीत्या

काचित् अन्या जातिः तस्यांपुनः अन्या इति अनवस्था स्यात्। अतः घटत्वादीनां जातिमत्वे अनवस्था बाधिका।

अनवस्था-अप्रामणिक, अनंत पदार्था कल्पनाधाराच्या विश्रान्तिचे अभाव हाच अनवस्था आहे. हे जातिचे जातिमत्वाची बाधिका आह. घटामध्ये घटत्व, पटामध्ये पटत्व हे जाति आहे. तिथे पुनः घटत्वामध्ये घटत्वत्व त्यामध्ये पुन्हा घटत्वत्वत्व या प्रकारे अनवस्था होईल. अतः घटत्वादिच्या जातिमत्वामध्ये अनवस्था बाधक आहे.

रूपहानिः- रूपस्य विशेषलक्षणस्य हानिः। निस्समानत्वेसति सामान्यभिन्नत्वेसति समवेतत्वंहि विशेषत्वम्। यदि विशेषेषु विशेषत्वं जातिः स्यात्तदा विशेषाणां सामान्यरहितत्वाभावेन सामान्यलक्षणाभावः स्यात् अतः विषेशः न जातिमान्।

रूपाच्या विशेष लक्षणाची हानि रूपहानि होते. निस्समानत्व, सामान्यभिन्नत्व आणि समवेतत्व हे विशेषत्व आहे. जर विशेषामध्ये विशेष हे जाति असेल तर विशेषांचे सामान्यरहितत्वाभाव झाल्याने सामान्यलक्षणाचे अभाव होईल. म्हणून विशेष ही जाति नाही.

यद्वा- रूपस्य स्वतो व्यावर्तकर्तत्वरूपधर्मस्य हानिः रूपहानिः। परमाणुषुव्यावर्तकाः विशेषाः अभ्युपगताः। यः स्वयं व्यावृत्तः धर्मः सः एव स्वाश्रयव्यावर्तको भवति। तच्च विशेषाणामेकजातित्वे सति नोपपद्यते। एकजातीयानां परस्परभेदः प्रत्यक्षतोऽवगन्तव्यः। न च इह प्रत्यक्षसम्भवः। अतः अत्र जातिः नाभ्युपगन्तव्या।

रूपाची स्वतः व्यावर्तकत्वरूपधर्माची हानि रूपहानि होती. परमाणुमध्ये व्यावर्तक विशेष होत आहे. जो स्वयं व्यावृत्तधर्म आहे तोच स्वाश्रयव्यावर्तको भवति। विशेषाचे एकजातित्व झाल्यावर उत्पन्न नाही

होत. एकजातीचे परस्परभेद प्रत्यक्षतः समजले पाहिजे. इथे प्रत्यक्ष संभव नाही होत. अतः इथे जातिचे स्वीकार करू नये.

असम्बन्धः- यस्मिन्किञ्चिदपि वस्तुसमवायेन सम्बन्धेन न वर्तते यश्च कस्मिञ्चिदपि वस्तुनि समवायेन सम्बन्धेन न वर्तते तत्र असम्बन्धः। यथा समवाये अभावे च न किञ्चिदपि वस्तुसमवायेन वर्तते सोऽपि न कस्मिञ्चिदपि वस्तुनि समवायेन सम्बन्धेन वर्तते इति समवाये अभावेच असम्बन्धः अस्ति। स च असम्बन्धः समवायस्य अभावस्य च जातिमत्वे बाधकः।

ज्या मध्येकोणतीही वस्तु समवाय संबंधाने द्यमान हो, जो कोणीपण वस्तुमध्ये समवाय संबंधाने नाही होत. यथा - समावाय आणि अभावामध्ये कोणतीपण वस्तु समवाय संबंधाने विद्यमान नाही आणि कोणत्याही वस्तूमध्ये समवाय आणि अभावामध्ये असंबंध आहे. आणि तो असंबंध समवाय आणि अभावाचे जातिमत्वामध्ये बाधक आहे.

द्वितीयंप्रमाणम् अनुमानम्। तच्च व्याप्तिज्ञानरूपम्। तत्र त्रैविध्यं विद्यते त्रिविधमनुमानम-

पुर्ववत् शेषवत् सामान्यतो दृष्टञ्चेति । तदुक्तम्-

द्वितीयप्रमाण अनुमान आहे. तो व्याप्तीज्ञानावर निर्धार आहे, तो तीन प्रकारचा आहे - पूर्ववत, शेषवत, आणि सामान्यतः दृष्ठ -

पुर्ववच्छेषवचवै दृष्टं सामान्यतस्तथा।

तत्राद्यं कारणात्कार्यमनुर्यमानमिह गीयते॥३४॥

कार्यात्कारणानुमानं यच्च तच्छेषवन्मतम्।

यच्च सामन्यतो दृष्टं तदेवं गतिपूर्विका॥३५॥

पुर्ववत्- कारणेन कार्यानुमानं पुर्ववदिति गीयते। यथा मेघाच्छन्नमाकाशं दृष्ट्वा भविष्यति वृष्टिः इति।

कारणाने कार्याचे अनुमान होणे हे पूर्ववत म्हणले जाते, यथा मेघाकडे आकाश पाहून वृष्टि होईल असे बोलणे.

शेषवत्- कार्येण कारणानुमानं शेषवदिति कथ्यते। यथा पुर्वोदकविपरीतमुदकं, नद्याः पुर्णत्वं शीघ्रत्वं च दृष्ट्वा अनुमीयते भुता वृष्टिः इति।

कार्याने करणाचे अनुमान होणे हा शेषवत होतो, यथा पहिल्या पेक्षा भिन्न अधिक पाण्याची मात्रा, नदीचे शीग्रत्व आणि पूर्णत्व हे सांगता की त्या जागी वृष्टि झालेली आहे.

सामान्यतो दृष्टम्- यत्र अविनाभावेन विशेषणेन, विशेष्यमाणः धर्मी गम्यतेतत्र सामान्यतो दृष्टम्। यथा बलाकया (पक्षिविशेषः) सलिलानुमानम्। यद्वा देशान्तरप्राप्तिमान् आदित्यः, अचलचक्षुषः व्यवधानानुपपत्तौ दृष्टस्य पनदुर्शनाविषयत्वात्, देवदत्तवत्इति आदित्यस्य गमनानुमानम् ।

जिथे अविनाभावाच्या विशेषणाद्वारे विशेष्यमाण धर्मी लक्षित होतो, तिथे सामान्यतः दृष्ट हा अनुमान होतो. यथा बगळा नावाचा पक्षी पाहून सलिल [पाणी] चे अनुमान केले जाणे अथवा आदित्य (सूर्य) गतिमान् आहे हे अनुमित तेंव्हा केले जाऊ शकते जेंव्हा सूर्याची देशान्तर प्राप्ति लक्षित असेल. याच प्रकारे देवदत्त गतिमान् आहे हे त्याचे अन्यत्र अवस्थानाने अनुमित होते.

सन्दिग्धेसाध्येअनुमानं प्रवर्तते। सन्धिग्धसाध्यवत्त्वं यत्र भवति सः पक्षः इति कथ्यते। तल्लक्षणञ्च एवमुक्तम्–

संदिग्ध [संदेहसंहित] च्या सिद्धीच्या हेतु अनुमान प्रवृत होतो, संदिग्धसाध्यवत्व जिथे होतो त्याला पक्ष असे म्हणतात, पक्षाचे लक्षण या प्रकारे सांगितले आहे.

पक्षः -

प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितम्।
निश्चितं लोकसिद्धं च पक्षं पक्षविदो विदुः ॥३६॥

उक्तप्रकारस्य अस्य दर्शनस्य अध्ययनस्य फलमेवमुक्तम् –

तर्काध्ययनप्रयोजनम् -

मोहं रुणद्धि विमलीकुरुते च बुद्धिं
सुते च संस्कृतपदव्यवहारशक्तिम्।
शास्त्रान्तराभ्यसनयोग्यतया युनक्ति
तर्कश्रमो न कुरुते किमिहोपकारम् ॥३७॥

॥ विश्वगुणादर्शचम्पुः॥

*उत्पादयत

वैष्णवीयाः -

द्वैतम् -

वैष्णवदर्शनेषु प्रसिद्ध दर्शनं द्वैतदर्शनम्। यच्च श्रीमदानन्दतीर्थवर्यैः जगति प्रसारितम्। मतेऽस्मिन् विष्णुरेव परमात्मा। स

च अनन्तगुणयुक्तः। जीवः अज्ञानादिदोष दूषितः स्वकर्मानुसारेण नीचोच्चभावं गतः सन् स्वादिलोकाननुभवति। जीवः तत्त्वतः परमात्मनः भिन्नः। न केवलं संसारस्थिती जीवेषु नीचोच्चभावः, मुक्तावस्थायामपि नीचोच्चभावः विद्यते। परमभक्त्या मोक्षः प्राप्यते। स च मोक्षः चतुर्विधः कर्मक्षयः उत्क्रान्तिः अर्चिरादिमार्गः भोगः चेति। तत्र भोगे पुनः चातुर्विध्यम् - सालोक्यं सामीप्यं सारूप्यं सायुज्यं चेति। तन्मतसारप्रदर्शकः अयं श्लोकः –

दर्शनामध्ये प्रसिद्ध दर्शन द्वैत दर्शन आहे, जो श्रीमन् आनंद आचार्य द्वारा विश्वामध्ये सर्वत्र प्रसिद्ध आहे, याच्यामध्ये विष्णुला परमात्मा मानले गेले आहे, जो अगणित गुणणी युक्त आहे, जीव हा अज्ञानादी दोष दूषित आहे, स्वतच्या कर्माच्या कारणाने नीचोच्चभाव प्राप्त जल आहे, आणि स्वर्गादी लोकाचे अनुभव करतो, जीवतत्व परमात्म्याने भिन्न आहे, केवळ संसारामधील स्थितजीवामध्ये नीचोच्चभाव नाही, तर मुक्तावस्थामध्ये पण नीचोच्चभाव आहे, परमभक्तिने मोक्षाची प्राप्ती होऊ शकते, वैष्णव मोक्ष चार प्रकारचे आहेत. कर्मक्षय, उत्क्रांती, अर्चिरादीमार्ग आणि भोग. भोग पान चार प्रकारचे होतात. सालोक्य, सामीप्य, सारुप्य आणि सायुज्य, या मताचे साररूपश्लोक प्रस्तुत करतात. -

श्रीमन्मध्वमते हरिः परतमः, सत्यं जगत्, तत्त्वतो
भेदो, जीवगणा हरेनुचरा नीचोच्चभावं गताः।
मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधनम्
अक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः॥३८॥

विशिष्टाद्वैतम् –

वैष्णवदर्शनेषु अपरं दर्शनं विशिष्टाद्वैतदर्शनम्। रामानुजाचार्या

अस्य प्रसारकाः। अत्र हि तत्त्वत्रयमङ्गीक्रियते। चित् अचित् ईश्वरः चेति। चित् जीवः, अचित् प्रकृतिः, चिदचित्तत्त्वद्वयोपेतः सर्वान्तर्यामी ईश्वरः। स एव स्वतन्त्रसत्। जीवः जगत् च नित्यौ तथ्यभूतौ चेदपि ईश्वराधीनौ। सः ईश्वरः एव ब्रह्मा। स च सगुणः। प्रलयकालेऽपि जीवः जगच्च सूक्ष्मरूपेण भवतः इत्यतः चिदचिद्रपवैशिष्टययुक्तः एव सर्वदा ईशः भवति। अर्थात् ब्रह्म न केवलमद्वैतमपितु चिदचिद्विशिष्टाद्वैतम्। एतन्मते जीवः अणुः ब्रह्मणः भिन्नः च। जीवब्रह्मणोः अंशांशिभावसम्बन्धः विद्यते। परमात्मनः प्राप्तये भक्तिरेव साधनम्। यद्यपि मुक्तः जीवः ब्रह्मतुल्यः भवति तथापि न ऐक्यं सम्पद्यते, ब्रह्मस्वरूपं ब्रह्मगुणान् च प्राप्नोति जीवः। एतन्मतसारं प्रपञ्चयत्ययं श्लोकः -

वैष्णव दर्शनामध्ये अन्य दर्शन अर्थात विशिष्ठ अद्वैत दर्शन. रामानुचार्य याचे प्रचारक आहेत, इथे तीन तत्व स्वीकृत केले जाते, चित् आणि अचित् दोनि तत्वासंहित ईश्वर. तोच स्वतंत्रसत् आहेत जीव आणि जगत, नित्य आणि तथ्यभूत असले तरी पण ईश्वराधीन आहे. तो ईश्वरच ब्रम्हा आहे, आणि तो सगुण आहे, प्रलयकळामध्ये पण जीव आणि जगत सुक्ष्म रूपात असतात, म्हणून चिदचिद्रपवैशिष्टययुक्त ईश सर्वदा असतो. अर्थात ब्रम्ह केवळ अद्वैत नाही तरीपण चिदचिद्रविशिष्ट अद्वैत. यांच्या मतानुसार जीव अणु आहे आणि तो ब्रम्ह से भिन्न आहे, जीव आणि ब्रम्ह यांच्यात अंशाशीभाव संबंध आहे. परमात्म्याच्या प्राप्तीसाठी भक्ति हेच एक साधन आहे, यद्यपि मुक्त झालेला जिव ब्रम्हतुल्य होतो तथापि यांच्यात एक्य नाही होत. ब्रम्हस्वरूप आणि ब्रम्हगुणांना जीव प्राप्त करतो. यांच्यामतांच्या संग्राहाच एक श्लोक प्रस्तुत करतात. -

श्रीमल्लक्ष्मणयोगिनस्तु भुवनं सत्यं तदीशः श्रियः
कान्तो ब्रह्म स एव सोऽखिलतनुः भिन्नस्ततश्चेतनाः।

सत्यासंसृतिरीशनिग्रहकृता मुक्तिस्तु भक्त्यादिना
तत्प्राप्तिः परमे पदे तदनुभूत्याख्येति सञ्चक्षते ॥३९॥

पूर्वतन्त्रीयाः -

पूर्वमीमांसाशास्त्रस्य आधारभूतानि जैमिनिप्रणीतानि सूत्राणि। स च मीमांसासूत्रग्रन्थः द्वादशलक्षणी इति नाम्ना अभिधीयते। (द्वादशानां लक्षणानाम् अध्यायानां समाहारः द्वादशलक्षणी) तानि च द्वादशलक्षणानि -

जैमिनी ऋषिणी प्रणीत केलेले सूत्र मीमांसाशास्त्रवर आधारित मानले जाते, तो मीमांसासूत्रग्रंथ द्वादशलक्षणी [बारा लक्षणांचा \ अध्यायाचा समूह] या नावाने ओळखला जातो, आणि तो बार लक्षण या प्रकारे -

धर्मो द्वादशलक्षण्या व्युत्पाद्यस्तत्र लक्षणैः।
प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकः॥४०॥
अधिकारोऽतिदेशश्च सामान्येन विशेषतः।
ऊहो बाधश्च तत्रं च प्रसङ्गश्चोदिताः क्रमात् ॥४०॥

१ धर्मप्रमाणम् २ धर्माधर्मभेदौ ३ शेषशेषिभावः ४ क्रत्वर्थपुरुषार्थभेदेन प्रयुक्तिविशेषः ५ श्रुत्यर्थपाठनादिक्रमभेदः ६ अधिकारविशेषः ७ सामान्यातिदेशः ८ विशेषातिदेशः ९ ऊहः १० बाधः ११ तन्त्रम् १२ प्रसङ्गः इति।

१ धर्मप्रमाणम् २ धर्माधर्मभेदौ ३ शेषशेषिभावः ४ क्रत्वर्थपुरुषार्थभेदेन प्रयुक्तिविशेषः ५ श्रुत्यर्थपाठनादिक्रमभेदः ६ अधिकारविशेषः ७ सामान्यातिदेशः ८ विशेषातिदेशः ९ ऊहः १० बाधः ११ तन्त्रम् १२ प्रसङ्गः

इति।

धर्मनिरूपणार्थं प्रवृत्तमिदं मीमांसाशास्त्रम् । स च धर्मः यागादिरेव। तादृशः धर्मः वैदैकगम्यः। तस्मात् वेदार्थपरिज्ञानं नितान्तमपेक्षितम्। तदर्थावगमनविधिः पूर्वमीमांसायां प्रदर्शितः। स च वेदः पञ्चविभागात्मकः। तदुक्तम्

धर्माच्या निरूपणासाठी हे शास्त्र प्रवृत आहे, आणि ते धर्म यागादी आहे, असा धर्म वेदैकगम्य आहे, त्यामुळे वेदर्थाचे परिज्ञान नितांत अपेक्षित आहे, त्या हेतु अवगमनविधी पूर्वमीमांसामध्ये सांगितले आहे, आणि ते वेद पाच विभागात आहेत.

विध्यर्थवादसन्मन्त्रनामधेयविभेदतः।

सर्वेषामपि धर्माणां वेदा एव तु बोधकाः॥४१॥

॥ शिवतत्त्वरत्नाकरः - २।९॥

विधिः मन्त्रः नामधेयम् अर्थवादः निषेधः (अयमन्तिमः कारिकायां न प्रदर्शितः) इति पञ्चविभागाः। तेषां लक्षणानि -

विधि, मन्त्र, नामधेय, अर्थवाद आणि निषेध हे पाच विभाग आहेत. त्यांचे लक्षण या प्रकारे आहेत –

स्वतः प्रवर्तयन् धर्मे राजाज्ञेव विधिः स्मृतः।

निहितार्थस्तावकः स्यादर्थवादोऽभिधानवान् ॥४२॥

तत्र मन्त्रास्त्वनुष्ठेयस्यार्थस्य प्रतिपादकाः।

नामांशोऽयं तु यागादिकर्मणामभिधायकः॥४३॥

॥ शिवतत्त्वरत्नाकरः - २।१०, ११॥

विधिः प्रवर्तकः निषेधस्तु तु निवर्तकः इति पुनः निषेधस्य लक्षणं न उक्तम्।

विधि प्रवर्तकर्त आणि निषेध निवर्तक आहे, अतः पुनः निषेधाचे लक्षण

सांगितले नाहीत.

विधिः -

अज्ञातार्थज्ञापकः वेदभागः विधिः। यथा 'ज्योतिष्टोमेन यजेत स्वर्गकामः' इति। ज्योतिष्टोमयागस्य स्वार्थत्वं न मानान्तरेण प्राप्तमित्यतः तद्बोधकमिदं वाक्यं विधिः भवति। तत्र च उत्पत्तिविनियोगाधिकारप्रयोगख्याः चत्वारः विभागाः। लिङ्तव्यदादिप्रत्ययैः वेदे विधिः ज्ञाप्यते। यथा विधौ उत्पत्त्यादयः विभागाः एवं प्रकारान्तरेण विधेः त्रैविध्यं प्रसिद्धम् अपूर्वविधिः नियमविधिः परिसंख्याविधिः चेति । तेषां च लक्षण-मेवमुक्तम् -

अज्ञात अर्थाला प्रकाशित करणारा वेद भाग विधि होतो, यथा - 'ज्योतिष्टोमेन यजेत यज्ञकाम। ज्योतिष्टोम याग हा स्वर्गप्राप्तिसाठी होतो असे बोलण्यासाठी हे वचनाला मानले पाहिजे. इथे उत्पत्ति, विनियोग, अधिकार आणि प्रयोग हे चार भाग आहेत. लिङ्, तव्यत् इत्यादि प्रत्ययाने विधि ज्ञापित केले जाते.

यथा विधिचे चार विभाग सांगितले आहेत, त्यासारखे अन्य प्रकारे विधिचे त्रैविध्य प्रसिद्ध आहे. अपुर्वविधि, नियमविधि आणि परिसंख्याविधि. यांचे लक्षण या प्रकारे सांगितले आहे –

अपूर्वादिविधिः -

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति।

तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥४४॥

॥तन्त्रवार्तिकम् - १।२।४॥

अपूर्वविधिः- यस्य यदर्थत्वं प्रमाणान्तरेण अप्राप्तं तस्य तदर्थत्वबोधकः यो विधिः सोऽपूर्वविधिः। यथा 'यजेत स्वर्गकामः' इति। यागस्य स्वार्थत्वं न

प्रमाणान्तरेण प्राप्तं किन्तु अनेन विधिना एव प्राप्तमित्यतः अयमपूर्वविधिः।

ज्याचे कारण अन्य कोणी प्रमाणाने प्राप्त नाही त्याचा बोध करणे म्हणजे अपूर्वविधी होय. यथा - यजेत स्वर्गकामः - इथे याग याचे स्वर्ग हे प्रयोजन हे कथन अन्य प्रमाणद्वारा सिद्ध नाही, त्यामुळे हे अपूर्वविधी आहे.

नियमविधिः- पक्षे अप्राप्तस्य प्रापकः यः विधिः सः नियमविधिः। यथा 'व्रीहीन् अवहन्ति' इत्यादि। न अनेन विधिना अवघातस्य वैतुष्यार्थत्वं बोध्यते। अवघाते सति वैतुष्यम् अवघाताभावे वैतुष्याभावः इत्यन्वयव्यतिरेकाभ्यां वैतुष्यावघातयोः कार्यकारणभावस्य लोकतः सिद्धत्वात्। तस्मात् न तद्बोधनार्थः विधिः। वैतुष्यस्य नानोपायसाध्यत्वात् यस्यां दशायामवघातं परिहृत्य उपायान्तरं ग्रहीतुमारभते तस्यां दशायामवघातस्य अप्राप्तत्वात्, तदा अस्य विधेः अवट्टातेनैव तुषविमोकः कर्तव्यः इति नियमनार्थं प्रवृत्तिः।

पक्षामध्ये **जो विधी अप्राप्त आहे तो नियम विधी असतो. उदा -** व्रीहीन् अवहन्ति – धान्य कुठने, या विधिने अवघाताचे वैतुष्यार्थत्व ज्ञापित नाही होत. अवघाताने वैतुष्य आणि अवघात न करने त्याचा अभाव या प्रकारे वैतुष्य आणि अवघाताचा कार्यकारणभाव लोकामध्ये सिद्ध आहे. अतः त्याच्या बोधनासाठी विधिची आवश्यकता नाही. वैतुष्य तर विभिन्न प्रकाराने साध्य आहे, अतः ज्या दशेमध्ये अवघाताला सोडून अन्य उपायाचा स्वीकार केला तर त्या विधिने ही तुषविमोक (धान्याचे बाह्यावरणाचे निष्कासन) केले पाहिजे असा नियम करण्यासाठी इथे विधि प्रवृत्त होते.

परिसंख्याविधिः -

उभयस्य युगपत् प्राप्तौ इतरव्यावृत्तिपरः विधिः परिसंख्याविधिः। यथा 'पञ्च पञ्च नखा भक्ष्याः' इति। इदं वाक्यं न भक्षणविधिपरम्। भक्षणस्य रागतः प्राप्तत्वात्। नापि नियमविधिपरम्। पञ्चनखापञ्चनखभक्षणस्य युगपत्प्राप्तेः पक्षे एकस्य प्राप्त्यभावः। अतः इदं वाक्यम् पञ्च पञ्चनखभिन्नानां निवृत्तिपरम्।

दोघांच्या उगपत प्राप्ती असून इतराचे व्यावृत्तिरूप विधी परिसंख्या होते, यथा-पञ्च पञ्च नखा भक्ष्याः[पाच नखाचे पाच पशू भक्ष्य करणे योग्य] इथे भक्षण विधीचे समर्थन केले जात नाही. भक्षणाची इच्छा या अर्थी प्राप्ती आहे. न की नियम संगत आहेत, पाच नखाचे आणि त्यांच्या पेक्षा भिन्न असे दोन्ही पशूंची प्राप्ती असता पक्षामध्ये एकाच्या प्राप्तीच्या अभावी सांगितले जात आहे. म्हणून हे वाक्य पाच नख असणाऱ्या पेक्षा इतरांची निवृती सांगणार सिद्ध होत.

मन्त्रः -

प्रयोगसमवेतार्थस्मारकाः मन्त्राः। अनुष्ठानसम्बद्धस्य द्रव्यस्य देवतायाश्च स्मारकाः मन्त्राः। एते एव मन्त्राः इति ज्ञापकानि मन्त्रलिङ्गानि अस्यां कारिकायां सङ्गृहीतानि। येन च सुलभतया मन्त्राणां परिज्ञानं भवति -

प्रयोगसमवेतार्थस्मारक मन्त्र होय. अनुष्ठानाने संबन्धी द्रव्य आणि देवतांचे स्मारक हे मन्त्र आहे. हाच मन्त्र आहे या प्रकारचे ज्ञापक लिङ्ग इथे या कारिके द्वारे प्रस्तुत केले जात आहे, ज्याने मन्त्रांचे परिज्ञानामध्ये सुलभता येऊ शकते–

मन्त्रलिङ्गानि -

उत्तमामन्त्रणास्यन्तत्वान्तरूपाधभावतः।

मन्त्रप्रसिध्यभावाच्च मन्त्रतैषा न युज्यते ॥४५॥

अग्नये जुष्टं निर्वपामि' इत्यत्र उत्तमपुरुषरूपं लिङ्ग विद्यते। 'अग्ने यशस्विन्यशसे समर्पय' इत्यत्र अग्ने इति आमन्त्रणरूपलिङ्गम्। 'उर्वी चासि वस्वी चासि' अत्र असि इति अस्यन्तरूपमन्त्रलिङ्गम्। 'इषे त्वा ऊर्जे त्वा' इत्यत्र त्वान्तरूपलिङ्गम। अन्येऽपि केचन मन्त्रप्रकाराः सन्ति। 'अग्नीदग्नीन्विहर' इत्यत्र प्रैषरूपमन्त्रः। 'अधस्स्विदासीदुपरिस्विदासीत् ' इत्यादयः विचाररूपमन्त्राः। 'अम्बे अम्बिके अम्बालिके न मा नयति कश्चन' इत्यादयः परिदेवनात्मकमन्त्राः। 'पृच्छामि त्वां परमन्तं पृथिव्याः' इत्यादयः प्रश्नात्मकाः मन्त्राः। 'वेदिमाहुः परमन्तं पृथिव्याः' इत्यादयः उत्तररूपाः मन्त्राः। एतद्भिन्नेषु मन्त्रता न युज्यते।

अग्नये जुष्टं निर्वपामि' इथे उत्तम पुरुषरूष लिङ्ग विद्यमान आहे 'अग्ने यशस्विन्यशसे समर्पयर्प' - अग्ने हा आमन्त्रणरूपलिङ्ग आहे. 'उर्वी चासि वस्वी चासि' - असि हा अस्यन्तरूपमन्त्रलिङ्ग आहे. 'इषे त्वा ऊर्जे त्वा' - त्वान्तरूपलिङ्ग। अन्य पण काही मन्त्रप्रकार आहेत. 'अग्नीदग्नीन्विहर' - प्रपै रूपमन्त्र। 'अधस्स्विदासीदुपरिस्विदासीत्' इत्यादि विचाररूपमन्त्र. 'अम्बेअम्बिके अम्बालिके न मा नयति कश्चन' इत्यादि परिदेवनात्मकमन्त्र। 'पृच्छामि त्वांपरमन्तं पृथिव्याः' इत्यादि प्रश्नात्मक मन्त्र। 'वेदिमाहुः परमन्तंपृथिव्याः' इत्यादि उत्तररूप मन्त्र। यांच्या भिन्न मन्त्रता नाही होत.

नामधेयम् -

विधेयार्थपरिच्छेदकं नामधेयम्। यथा 'उद्भिदा यजेत पशुकामः' इत्यत्र

उद्भिच्छब्दः यागनामधेयम्।

विधेयार्थ परिच्छेदक नामधेय होतो. यथा - 'उद्भिदा यजेत पशुकामः' इथे उद्भिच्छब्द यागनामधेय आहे.

निषेधः -

पुरुषस्य निवर्तकं वाक्यं निषेधः। तत्र 'न कलञ्जं भक्षयेत्' इत्यादीनि उदाहरणानि। निषेधवाक्येषु सामान्यतः नञः प्रत्ययार्थेन सह अन्वयः सम्भवति। कदाचित् प्रत्ययार्थभिन्नेन सहापि अन्वेति। नञः प्रत्ययार्थभिन्नेन सह अन्वयः पर्युदासः इति प्रत्ययार्थेन सह अन्वयः प्रसज्यप्रतिषेधः इति च अभिधीयते। एतमंशं विशदयति एषा कारिका -

पुरुषाच्या निवृत्तिचे वाक्य निषधे होतो. न कलञ्जंभक्षयेत्–इत्यादि उदाहरण आहेत. निषेध वाक्यामध्ये सामान्यतः नञाचे प्रत्ययार्थाबरोबर अन्वय संभव आहे. कदाचित्प्रत्ययार्थ भिन्नाबरोबर पण अन्वय होतो. नञाचे प्रत्ययार्थ भिन्नाबरोबर अन्वय पर्युदास होतो. आणि प्रत्ययार्थाबरोबर अन्वय प्रसज्जप्रतिषधे होतो. या अर्थी या कारिका आहेत –

पर्युदासः सः विज्ञेयो यत्र पूर्वपदेन नञ्।
प्रतिषेधः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥४६॥

अत्र पूर्वपदोत्तरपदशब्दौ मीमांसकैकपरिभाषया सङ्केतितार्थौ। उत्तरपदशब्देन आख्यातप्रत्ययः गृह्यते। तत्रापि लिङ्त्वम् । तद्व्यतिरिक्तं सर्वं धातुः प्रत्ययः इत्यादिः पूर्वपदेन गृह्यते। अतः शाब्दीभावनासम्बद्धः नञर्थः प्रतिषेधः। यथा 'न कलञ्जं भक्षयेत्' इति। शाब्दीभावनेतरार्थसम्बद्धः नञर्थः पर्युदासः। यथा 'अब्राह्मणमानय' इति ।

अत्र च ब्राह्मणापेक्षया आनयनक्रियापेक्षया च शाब्दीभावनायाः 'न कलञ्जं भक्षयेत्' इत्यत्र इव प्राधान्येऽपि समासवृत्तिबलात् नञर्थस्य ब्राह्मणेनैव सम्बन्धः। अतः अब्राह्मणपदस्य ब्राह्मणभिन्नः तत्सदृशः इत्यर्थः। असमस्तनञ्-स्थले यद्येवं पर्युदासः इष्यते तर्हि तत्र किञ्चित् प्रमाणमपेक्षते। तच्च उपक्रमविरोधः विकल्पप्रसक्तिश्च। उपक्रमविरोधे तु नघटितवाक्यस्य उपक्रमेणासम्बन्धात् प्रकृतहानाप्रकृतकल्पना च स्यादिति गौरवम्। यथा नेक्षेतोद्यन्तमादित्यमित्यादौ तस्य व्रतमित्युपक्रमात् पर्युदासाश्रयणम्। विकल्पे तु शास्त्रस्य पाक्षिकाप्रामाण्यम् अपूर्वद्वयकल्पनाप्रसङ्गः इत्यादयः दोषाः सम्भवन्ति। अतः 'यजतिषु ये यजामहं करोति नानुयाजेषु' इत्यादौ विकल्पप्रसक्तौ पर्युदासाश्रयणम्।

इथे उक्त पुर्वोत्तर शब्द मीमांसक द्वारा परिभाषित संकेथार्थ आहे. उत्तरपद शब्दाने आख्यातप्रत्ययाचे ग्रहण हेते तिथे पण लिङ्गत्. व्यतिरिक्त सर्व – धातु, प्रत्यय – पुर्वपदाने गृहीत होतो. अतः शाब्दीभावना संबन्ध नञाचे अर्थ प्रतिषधे होतो. यथा - न कलञ्जं भक्षयेत् – इत्यादि। शाब्दीभावनाने इतरार्थ संबन्ध पर्युदास होतो. यथा – अब्राह्मणम् आनय। इथे समासवृत्ति झाल्याने ब्राह्मण आणि आनयनक्रियाची अपेक्षा शाब्दीभावनाचे न कलञ्जंभक्षयेत् सारखे प्रधानाने अन्वित होऊन पण ब्राह्मणाबरोबर अन्वय आहे. त्यामुळे ब्राह्मण पदाने ब्राह्मण भिन्न ब्राह्मण सदृश असा अर्थ प्राप्त होतो. समासरहित नञाने प्रयोगसंहित असा पर्युदा इष्ट आहे तेंव्हा तिथे प्रमाणाची आवश्यकता आहे – जसे उपक्रमविरोध आणि विकल्पप्रसक्ति. उपक्रमविरोधामध्ये नञ घटित वाक्याचे उपक्रमाने संबन्ध न झाल्याने प्रकृतहाना आणि प्रकृतकल्पना होणार हा गौरव होईल. यथा– नेक्षेतोद्यन्तमादित्यम् इथे त्याचे व्रत असे उपक्रम असल्याने इथे पर्युदासाचे आश्रय घेतला आहे. विकल्पामध्ये तो शास्त्राचे पाक्षिक अप्रामाण्य आणि

अपुर्व असे दोन कल्पनांचे प्रसंग असे दोष संभव आहेत. अतः 'यजतिषु ये यजामहं करोति नानुयाजेषु इत्यादिमध्ये विकल्प प्रसक्त होतो पर्युदासाश्रयण केले आहे.

अर्थवादः -

प्राशस्त्यनिन्दान्यतरपरवाक्यमर्थवादः। स च त्रिधा विभक्तः गुणवादः अनुवादः भूतार्थवादः चेति। तदुक्तम् -

स्तुति आणि निन्दा या दोघांचे कथन जिथे होते त्याला अर्थवाद म्हणले जाते. तो तीन प्रकारचा आहे -

विरोधे गुणवादः स्यात् अनुवादोऽवधारिते।
भूतार्थवादस्तध्दानाद् अर्थवादस्त्रिधा मतः॥४७॥

गुणवादः -

प्रमाणान्तरविरोधे सति अर्थवादः गुणवादः इत्यभिधीयते। यथा 'आदित्यो यूपः'। अत्र अभेदस्य प्रत्यक्षविरोधात् लक्षणया आदित्यवत् उज्ज्वलरूपः गुणः प्रतिपाद्यते इति स्वीकारः।

प्रमाणान्तर विरोधासहित अर्थवाद गुणवाद मानला जातो, यथा – आदित्यो युपः – इथे अभेदाच्या प्रत्यक्षविरोधाने लक्षणाने आदित्यसारखे उज्ज्वल रूप गुणाला प्रतिपादित आहे हा अर्थ स्वीकृत केला आहे.

प्रमाणान्तरावगतार्थबोधकः। यथा 'अग्निः हिमस्य भेषजम्' । अत्र अग्नेः हिमविरोधित्वं प्रत्यक्षावगतम्।

प्रामाणान्तराने अवगत अर्थाचा बोधक. यथा – अग्निः हिमस्य भेषजम् – इथे अग्निचे हिमाबरोबर विरोध प्रत्यक्ष अवगत आहे.

भूतार्थवादः- प्रमाणान्तरविरोधतत्प्राप्तिरहितार्थावबोधकः भूतार्थवादः। यस्य प्रमाणान्तरेण बाधः बोधः वा न भवति स भूतार्थवादः। यथा 'इन्द्रो वृत्राय।

प्रमाणान्तरविरोध आणि त्याचे प्राप्तिरहित अर्थबोधक भूतार्थवाद होतो. ज्याचे अन्य प्रमाणाने बाध किंवा बोध नाही होत, तो भूतार्थवाद होतो, यथा – इन्द्रो वृत्राय वज्रमुदयच्छत।

एते विधिमन्त्रादयः यागार्थाः एव। स च यागः द्विविधः प्रकृतियागः विकृतियागः चेति। यत्र समग्राङ्गोपदेशः सा प्रकृतिः। यथा दर्शपूर्णमासादिः। यत्र न सर्वाङ्गोपदेशः सा विकृतिः यथा सौर्यादिः। विकृतियागेषु प्रकृतेः अङ्गानि अतिदिश्यन्ते। अतिदेशो नाम –

हे विधिमन्त्र यागासाठी होते. तो याग दोन प्रकारचे आहेत. प्रकृतियाग आणि विकृतियाग. जिथे समग्र अंगाचे उपदेश आहे तो प्रकृति सारखे– दशपुर्णमासादि. आणि जिथे समग्र अंगाचे उपदेश नाही तो विकृति जसे की–सौर्यादि। विकृतियागामध्ये प्रकृतिचे अगं अतिदिष्ट केले जाते. अतिदेश अर्थात-

प्राकृतात् कर्मणो यस्मात् तत्समानेषु कर्मसु ।
धर्मप्रदेशो येन स्यात् सोऽतिदेश इति स्थितिः॥४८॥

यागाः स्वर्गादिफलानि उद्दिश्य अनुष्ठीयन्ते। यागसमनन्तरमेव स्वर्गादिफलस्य प्राप्तिः न भवति। यागात् अपूर्वम् उत्पद्यते। ततः काले गते सति अपूर्वात् स्वर्गादिफलानां प्राप्तिः। तत्र अपूर्वस्य लक्षणेमेवमुक्तम् -

यज्ञ स्वर्गादि फळांच्या उद्देश्याने केले जाते, यज्ञाच्या समाप्ती नंतर लगेचच स्वर्गाची प्राप्ति नाही होत. यागाने अपुर्वाची उत्पत्ति होते. त्याच्या नंतर

समयाच्या भावाने अपुर्वाने स्वर्गादि फळाची प्राप्ति होती. अपुर्वाचे लक्षण असे सांगितले आहे –

अपूर्वम् -

कर्मानुष्ठानसमनन्तरं फलप्रापकम् अपूर्वं किञ्चित् उत्पद्यते इति मीमांसकनयः। अपूर्वं फलप्रदायकत्वेन अङ्गीकुर्वन्तः एते ईश्वरास्तितां नाङ्गीकुर्वन्ति । अपूर्वलक्षणमेवमुक्तम् -

कर्मानुष्ठाना नंतर लगेचच फलप्रापक अपुर्व असे काही उत्पन्न होते. असे मीमांसकांचे मत आहे. अपुर्वाला फलप्रदायकाच्या रूपामध्ये अंगीकार करणारे ईश्वराच्या अस्तित्वाला स्वीकारत नाही. अपुर्वाचे लक्षण या प्रकारे सांगतात –

कर्मभ्यः प्रतियोग्यस्य कर्मणः पुरुषस्य वा।

योग्यता शास्त्रजन्या या सा परापूर्वमुच्यते ॥४९॥

॥ तन्त्रवार्तिकम् ॥

प्रधानकर्मणामङ्गकर्मणां वा करणात्प्राक् स्वर्गादिप्राप्त्ययोग्याः पुरुषाः क्रतवश्च स्वर्गकार्यायोग्याः तदुभयीमप्ययोग्यतां व्युदस्य शास्त्रजन्या पुरुषगता क्रतुगता वा योग्यता शास्त्रेऽपूर्वमित्यभिधीयते। फलप्रेप्सया क्रियमाणानि एतानि कर्माणि स्वर्गादिहेतुकानि भवन्ति। ईश्वरार्पणबुध्या अनुष्ठीयमानानि मोक्षकारणानि भवन्ति। पूर्वमीमांसा यद्यपि प्राधान्येन कर्मनिरूपणपरा तथापि अत्र आत्मास्तिता अङ्गीकृता। आत्मनः विषये सम्यक्परिज्ञानं वेदन्ताध्ययनेन भवतीति कुमारिलभट्टः ब्रवीति।

प्रधान अथवा अगं कर्म केल्याने पहिले स्वर्गादि प्राप्तिच्या अयोग्य पुरुष आणि यज्ञ स्वर्ग कार्याचे अयोग्य असे दोन्हीपण प्रधान अथवा अंग कर्म केल्याने पहिले स्वर्गादि प्राप्तिच्या अयोग्य पुरुष आणि यज्ञ स्वर्गकार्याच्या

अयोग्य असे दोन्ही पण अयोग्यता सोडून शास्त्रजन्य पुरुषगत अथवा क्रतुगत योग्यता अपूर्व होते. अर्थात् - यज्ञ केल्याने साक्षात् स्वर्गप्राप्ति नाही होत. फलाच्या प्राप्तिची इच्छाने केले गेलेले कर्म स्वर्गादि हेतु सांगितलेले आहे. ईश्वरार्पण बुद्धिने अनष्ठित कर्म मोक्षकारक होते. यद्यपि पुर्वमीमांसा प्रधानरूपाने कर्मनिरूपणपरा आहे. तथापि इथे आत्माचे अस्तित्व स्वीकृत आहे. आत्म्याच्या विषयामध्ये उचित परिज्ञान वेदान्ताच्या अध्ययनाने होते – असे कुमारिल भट्ट यांचे वक्तव्य आहे -

इत्याह नास्तिक्यनिराकरिष्णुः आत्मास्तितां भाष्यकृदत्र युक्त्या।
दृढत्वमेतद् विषयश्च बोधः प्रयाति वेदान्तनिषेवणेन ॥५०॥

॥ श्लोकवार्तिकम्॥

सांख्याः -

भारतीयदर्शनेषु नितान्तं प्रधानमपरं दर्शनं सांख्यम्। इदं च कापिलं दर्शनम्। संख्याशब्दवाच्यविवेकविज्ञानस्य पञ्चविंशतिसंख्याकानां तत्त्वानां च निरूपकत्वात् इदं दर्शनं सांख्यपदेन अभिधीयते। तदुक्तम् -

भारतीय दर्शनामध्ये प्रधानतम दर्शन सांख्य आहे. हे कपिलमुनि प्रणीत असल्या कारणाने कापिल दर्शन या नावाने पण ओळखले जाते. या दर्शनामध्ये सांख्या पदवाच्य विवेकविज्ञान पंचवीस तत्त्वांचे निरूपण असल्या कारणाने यह सांख्य या नावाने ओळखले जाते. असे म्हणले जाते की -

संख्या प्रकुर्वते यस्मात् प्रकृतिं च प्रचक्षते।
तत्त्वानि च चतुर्विंशत् तेन सांख्यं प्रकीर्तितम् ॥५१॥

पञ्चविंशतितत्त्वानि च -

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।

षोडशकस्तु विकारः न प्रकृतिः न विकृतिः पुरुषः॥५२॥

॥ सांख्यकारिका - ३॥

तत्र प्रकृतिः प्रथमा। ततः महान् (बुद्धिः), महतः अहंकारः, ततः पञ्च तन्मात्राणि, चक्षुः रसना घ्राणं श्रोत्रं त्वगाख्यानि पञ्च ज्ञानेन्द्रियाणि, वाक्पाणिपादपायूपस्थाख्यानि पञ्च कर्मेन्द्रियाणि, मनः एतानि जायन्ते। पञ्चभ्यः तन्मात्रेभ्यः पञ्च पृथिव्यादीनि भूतानि उत्पद्यन्ते। पुरुषः पञ्चविंशः। तत्र प्रकृतिः केवलमुत्पादिका न तस्याः कस्माच्चित् उत्पत्तिः अस्ति अतः सा केवला प्रकृतिः। महदाद्याः सप्त प्रकृतिविकृतयः। यतः ताः अन्येषा मुत्पादिकाः सत्यः अन्येभ्यः उत्पद्यन्ते। अन्ये सर्वे विकृतयः। यतः न ताभ्यः केऽपि उत्पद्यन्ते। पुरुषः तु न कमपि उत्पादयति नो वा कस्माच्चित् उत्पद्यते अतः न प्रकृतिः न विकृतिः। तद्दृश्यताम् ।

प्रकृति प्रथम होती. त्याच्या उपरान्त महत् अर्थात् बुद्धि, अहंकार, पञ्च तन्मात्रा, चक्षु(नेत्र)-रसना(जिह्वा)-घ्राण(नासिका)-श्रोत्र(कर्ण)-त्वग् [त्वचा] हे पाच ज्ञानेन्द्रिय, वाक्(वाणी)-पाणि(हस्त)-पाद(चरण)-पायु- उपस्थ हे पाच कर्मेन्द्रिय आणि मन हे आहे. पाच तन्मात्राने पाच पृथिव्यादि भुतांची उत्पत्ति होते. पुरुष हा अन्तिम तत्त्व आहे. प्रकृति केवल उत्पादिका आहे, न की त्याची कसाने उत्पत्ति आहे, अतः एव तो प्रकृति आहे. महदादि सप्त प्रकृतिविकृति आहे. कारण ते अन्यांना पण उत्पन्न करते. आणि अन्याने उत्पन्न होते. अवशिष्ट सभी विकृत्या आहे. कारण त्यांच्याकडून कोणी उत्पन्न नाही होत. पुरुष न कोणाकडून उत्पन्न होतो आणि न ही कोणाला उत्पन्न करतो, अतः वह न प्रकृति आहे, न ही विकृति. - हे पहा

			प्रकृती	
	पुरुषः			
			महत्	
			अहङ्कारः	
मनः	ज्ञानेन्द्रियाणि	कर्मेन्द्रियाणि		तन्मात्राणि
				महाभूतानि

अयं सृष्टिक्रमः अनया कारिकया प्रदर्शितः।

सृष्टीचा क्रम या प्रकारे स्पष्ट् होतो.

सृष्टेः क्रमः -

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः।

तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि ॥५३॥

॥ सांख्यकारिका - २२॥

एतेषां तत्त्वानां ज्ञानं प्रमाणैः भवति । सांख्यदर्शने प्रत्यक्षम् अनुमानम् आप्तवचनञ्चेति प्रमाणत्रयम् अङ्गीक्रियते। अन्येषां सर्वेषामपि प्रमाणानामत्रैवान्तर्भावः। ये पदार्थाः इन्द्रियग्राह्याः तेषां ज्ञानं प्रत्यक्षप्रमाणेन, इन्द्रियाग्राह्याणामनुमानेन, सर्वथा परोक्षभूतानां ज्ञानं

शब्देन उत्पद्यते। उक्तं च

या तत्त्वांचे ज्ञान प्रामाणाने होते. सांख्यदर्शनामध्ये प्रत्यक्ष, अनुमान आणि आप्तवचन हे तीन प्रमाण स्वीकृत आहे. अन्य सभी प्रमाणांचे अन्तर्भाव यांच्यातच होते. जो पदार्थ इन्द्रियग्राह्य आहे, त्यांचे ज्ञान प्रत्यक्ष प्रमाणाने, इन्द्रिय अग्राह्याचे अनुमानाने आणि सर्वथापरोक्षभुताचे ज्ञान शब्दाने उत्पन्न होतात. असे बोलले जाते की-

प्रमाणानि -

दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥५४॥

॥ सांख्यकारिका - ४॥

सांख्याः कार्यकारणयोः अभेदं अङ्गीकुर्वन्ति। कारणमेव कार्यरूपेण परिणमते। तत्र परिणामः द्विविधः सदृशपरिणामः विसदृशपरिणामः चेति । यावत्कालं पयः, पयः एव अवतिष्ठते तावत्पर्यन्तं प्रतिक्षणं सदृशपरिणामः। यदा पुनः दध्यादीनाम् उत्पत्तिः तदा विसदृशपरिणामः। अयमेव परिणामवादः इति कथ्यते। एते सत्कार्यवादिनः च । एतेषां मतं तु सतः एव कारणात् सतः कार्यस्य उत्पतिः भवतीति। प्रत्येक कार्यमपि स्वोत्पत्तेः प्राक् कारणे भवत्येव। किन्तु कारणावस्थायामव्यक्तरूपेण कार्यावस्थायां तु व्यक्तरूपेण तिष्ठति। यथा तिले अव्यक्तरूपेण उत्पत्तेः प्राक विद्यमानमेव तैलं कुट्टनादिना व्यक्ततां भजते। यतः कारणं सर्वदा भवति अतः कार्यमपि सदेव। अतः प्रोक्तं सांख्यैः 'नासतः आत्मलाभः न सतः आत्महानिः' इति।

उक्तं च –

सांख्यानुसारी कार्या आणि कारणाचे अभेद स्वीकारत आहेत, कारण हे

कार्यामध्ये परिणत आहे. परिणाम दोन प्रकारचे आहे– सदृश आणि विसदृश. जो पर्यंत दुध हे दुधच राहते त्याचे दही अथवा अन्य विकार नाही होत तोपर्यंत प्रतिक्षण तो सदृश परिणाम रहतो. जेंव्हा दही इत्यादीची निर्मिति होते तेंव्हा विदृश परिणाम होतो. हेच परिणाम वाद असे म्हणले जाते. हेच सत्कार्यवादि आहे. यांच्या मतानुसार कारण असले तरी कार्याची उत्पत्ति होते. प्रत्येक कार्य स्वोत्पत्तिने पुर्वकारणच होते. परन्तु कारणावस्थामध्ये अव्यक्त आणि कार्यावस्थामध्ये व्यक्तरूपाने स्थित रहते, ज्या प्रकारे तिलमध्ये अव्यक्तरूपामध्ये विद्यमान तेल कुट्टनादि कार्याचे उपरान्त विभक्त होते. कारण सर्वदा राहते. अतः कार्यपण. अतः सांख्य म्हणतात - असता ने आत्मलाभ नाही, सताने आत्महानि नाही.

सत्कार्यवादः -

सदेव कार्यमुत्पत्तेः पूर्वं कारकरूपकम् ।
आविर्भावतिरोभावौ जन्मनाशावुदीरितौ॥ ५५॥

सत्कार्यवादोपस्थापनार्थं तैः पञ्च हेतवः उपन्यस्ताः। ते च -

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच सत्कार्यम् ॥५६॥

॥ सांख्यकारिका - ९॥

असदकरणात् -असत् चेत् कारणव्यापारात् पूर्वं कार्य, नास्य सत्त्वं कर्तुं केनापि शक्यम्। न हि नीलं शिल्पिसहस्रेणापि पीतं कर्तुं शक्यते। अतः सत्कार्यम्।

असदकरण – असत जर आहे तेंव्हा कारणव्यापाराच्या पुर्वकार्य राहते. सत्त्व कोणी नाही करू शकत. निळा वर्ण सहस्रशिल्पिद्वारा पीत नाही केले जाते.

त्यामुळे सत्कार्य आहे.

उपादानग्रहणात् - उपादानं कारणम्। तस्य ग्रहणात् । इह लोके यः येन अर्थी सः तदुपादानग्रहणं करोति। दध्यर्थी क्षीरस्य घटार्थी मृदः। न कोऽपि लोके दधि इच्छन् जलं गृह्णाति। तस्मात् क्षीरे सूक्ष्मरूपेण दधि अस्तीति गम्यते। अतः सत्कार्यम्।

उपादानग्रहण – उपादान अर्थात कारण त्याचे ग्रहण केले आहे. या लोकामध्ये ज्यामुळे अर्थी तो त्याचे उपादानग्रहण करत आहे जसे की – दही हा क्षीराचे अर्थी आहे, घट मिट्टीचे अर्थी आहे. लोकामध्ये कोणी पण दहीला इच्छिणारा जलाची इच्छा नाही करत. अतः क्षीरामध्ये सुक्ष्म रूपाने दही आहे असे ज्ञात होते. अतः सत्कार्य

सर्वसम्भवाभावात् - सर्वत्र सर्वस्य सम्भवः नास्ति । यथा सुवर्णस्य रजतादौ सम्भवः नास्ति । अतः अवगम्यते कारणे कार्य भवत्येव इति । तस्मात् सत्कार्यम्।

सर्व स्थानावर सगळ्यांचे संभव नाही होत. जसे की – सुवर्णाचे रजतादिमध्ये सम्भव नाही होत. अतः ज्ञात आहे कारण कार्य होते. अतः सत्कार्य.

शक्तस्य शक्यकरणात् - इह लोके शक्तः कुलालः मृद्दण्डचक्रादिसहितः शक्यमेव घटं मृत्पिण्डादुत्पादयति। तस्मात् सत्कार्यम्।

या लोकामध्ये कुम्भकार मिट्टी, दण्ड, चक्र आदि मृत्पिण्डादिपासून शक्य असे घटाची निर्माण करतो.

कारणाभावात् - कारणं यल्लक्षणं तल्लक्षणमेव कार्यमपि। यथा यवेभ्य यवाः एव उत्पद्यन्ते व्रीहिभ्यः व्रीहयः। यदि असत्कार्यं स्यात्तदा यवेभ्य व्रीहयः उत्पद्येरन्। तस्मात् सत्कार्यम्। समस्तस्य जगतः मूलकारणं प्रकृतिः। सा च गुणत्रयाणां साम्यावस्थारूपा। उक्तं च -

कारण ज्याचे लक्षण आहे कार्य पण त्याचेच लक्षण आहे. यथा – यवाने यव(उडद) हे उत्पन्न होईल धान नाही. त्याच प्रकारे धानाने धानच उत्पन्न होईल यव नाही. यदि असत्कार्य होते तेंव्हा यवाने धान उत्पन्न होते. अतः सत्कार्य.

प्रकृतिः -

सत्त्वं रजस्तमश्चैव गुणत्रयमुदाहृतम्।
साम्यावस्थितिरेतेषां प्रकृतिः परिकीर्तिता ॥५७॥

सृष्टेः प्राक् समस्तं जगत् अस्यामव्यक्तरूपेण आसीदित्यतः सा अव्यक्तमिति अभिधीयते । एतस्याः सर्गारम्भः भवतीति हेतोः मूलप्रकृतिः प्रधानं इति वा कथ्यते। यद्यपि एषा जडा तथापि पुरुषस्य भोगापवर्गार्थं प्रवर्तते।

समस्त जगत्सृष्टिच्या उत्पत्तिच्या पुर्वामध्ये अव्यक्त रूपाने आहे. अतः त्याला अव्यक्त असे पण म्हणतात. याने सर्गाचे आरम्भ होतो, अतः मुल प्रकृति अथवा प्रधान असे याला म्हणले जाते. यद्यपि हे जड आहे. तथापि पुरुषाचे भोग आणि अपवर्ग (फलप्राप्ति) साठी प्रवृत्त.

प्रधाननिदानसाधने पञ्च हेतवः सांख्यैः उपन्यस्ताः। ते च -

भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च ।
कारणकार्यविभागादविभागाद् वैश्वरूप्यस्य ॥५४॥

॥ सांख्यकारिका - ९॥

भेदानां परिमाणात् - क्षित्यादिभेदानामव्यक्तकारणमस्ति परिमितत्वात् घटवत्। लोके यस्य परिमितत्वं तस्य सकारणत्वं दृष्टम्। यथा परिमितस्य घटस्य मृत्कारणम्। एवं महदाद्यपि एका बुद्धिः, एकोऽहङ्कारः, पञ्च तन्मात्राणि, एकादशेन्द्रियाणि, पञ्च महाभूतानि इति भेदतः परिमितम्। एवं भेदानां परिमितत्वात् अस्ति तेषां कारणं यस्मात् महदादीनामुत्पत्तिः। तदेव प्रधानम्।

भेदांच्या परिमाणाने - क्षित्यादि भेदांचे अव्यक्त कारण आहे. परिमितिच्या कारण यथा घट. लोकामध्ये परिमितत्व आहे. त्याला सकारणत्व पाहिले गेले आहे. या प्रकारे महदादि पण एक बुद्धि आहे, एक अहंकार आहे, पाच तन्मात्रा आहेत, आकरा इन्द्रिय आहे, पाच महाभतू या प्रकारे परिमित आहे. या प्रकारे भेदांचे परिमित राहण्याने त्यांचे कारण आहे. ज्याने महदादिची उत्पत्ति आहे. आणि तोच प्रधान आहे.

समन्वयात् - यथा घटशरावादयः मृदात्मकाः मृद्रपकारणपूर्वकाः तथैव सर्वेऽपि भेदाः सुखदुःखमोहात्मकाः इत्यतः सुखदुःखमोहानां कारणीभूतगुणत्रयपूर्वकाः भवेयुः एव। तादृशगुणत्रयवत्त्वेन प्रकृतिः सिद्ध्यति।

ज्या प्रकारे घट, शराव इत्यादि मृदात्मक होतात. मृद्रुपकारण तिथे होते. असाच प्रकारे सर्व भेद सुख, दुःख आणि मोहाने युक्त आहे. त्यामुळे सुख, दुःख आणि मोहाने कारणीभुत तीन गुणा सहित अवश्य होईल. त्या तीन गुणाने युक्त असे प्रकृति सिद्ध आहे.

शक्तितःप्रवृत्तेः- कारणशक्तितः कार्यप्रवृत्तिः लोके दृष्टा। यथा मृच्छक्तितः घटकार्याणां प्रवृत्तिः। अतः महदादिकार्याणां प्रवृत्तिहेतुभूतं शक्तिमत् कारणं

किञ्चित् भवेदेव।

शक्तितः प्रवृत्तिने - कारणशक्तिने कार्य शक्ति असे लोकामध्ये पहिले जाते. यथा मृद्शक्तिने घटरूप कार्य की प्रवृत्ति. अतः महदादि कार्योंची प्रवृत्तिमध्ये हेतुभुत शक्तिमत काही कारण अवश्य ही असेल.

कारणकार्यविभागात् - कारणात् कार्यस्य विभागः उत्पत्तिः जन्म दृश्यते। अतः महदादिलिङ्गं दृष्ट्वा अनुमीयतेऽस्ति विभक्तं महदादीनां कारणं यस्माद् विभक्तमिदं व्यक्तमिति।

कारण आणि कार्याचे विभागाने - कारणाने कार्याचे विभाग अर्थात् उत्पत्ति/ जन्म होते, अतः महदादि लिगं पाहून असे अनुमान करू शकते की विभक्त हे महदादि चे कारण आहे. ज्याने विभक्त हे व्यक्त आहे.

अविभागात् वैश्वरूप्यस्य - विश्वं जगत्। रूपम् अभिव्यक्तिः। तस्य भावः वैश्वरूप्यम्। वैश्वरूप्यस्य प्रातिलोम्येन प्रलयः अविभागः दृश्यते पञ्चभूतानि तन्मात्रेषु, तन्मात्राणि एकादशेन्द्रियाणि च अहङ्कारे इत्येवम् । अयम् अविभागः क्वचित् कारणे विश्रान्तः भवेदेव । तत्कारणमेव प्रधानम्। एभ्यः प्रकृत्यादिभ्यः भिन्नः पुरुषः । तत्स्वरूपमेव निरूपितम् -

वैश्वरूप्याच्या अविभागाने - विश्व अर्थात जगत् रूप अर्थात् अभिव्यक्ति. त्याचे भाव वैश्वरूप्य. वैश्वरूप्याचे प्रातिलोम्याचे कारण प्रलय अविभाग दिसले जाते. पाच महाभुत तन्मात्रामध्ये, तन्मात्र आणि एकादश इन्द्रिय अहंकारामध्ये, हा विभाग कोणत्या कारणाने विश्रान्त होईल. ते कारण प्रधान आहे.

पुरुषः -

जडभूतानां शय्यादीनां परार्थत्वं प्रसिद्ध लोके। प्रकृतिरपि एवं जडभूता स्वप्रयोजनशून्या इत्यतः भवेदेव परार्था। अतः चेतनः पुरुषः कल्प्यते। स च पुरुषः साक्षिमात्रत्वेन द्रष्टा भोक्ता अपरिणामी असंहतः प्रतिशरीरं भिन्नत्वात् अनेकः। पुरुषास्तित्वसाधनार्थं पञ्च हेतव तैः उपन्यस्ताः -

जड जो शय्यादि आहे त्यांचे परार्थत्व जगप्रसिद्ध आहे. प्रकृति पण याच प्रकारे जड आहे स्वप्रयोजन शुन्य आहे. अतः अवश्यच तो परार्थ होईल. त्यामुळे चेतन पुरुषाची कल्पना केली जाते, आणि तो पुरुष साक्षीमात्राने द्रष्टा, भोक्ता, अपरिमाणी, असंहत आणि प्रतिशरीरामध्ये भिन्न आहे. अतः अनेक आहेत, पुरुषाचे अस्तित्वाला सिद्ध करण्याचे पाच हेतु सांगितले आहेत.

सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् ।
पुरुषोऽस्ति भोक्तुभावात् कैवल्यार्थं प्रवृत्तेश्च ॥५९॥

॥ सांख्यकारिका - १७॥

सङ्घातपरार्थत्वात् - योऽयं महदादिसङ्घातः सः पुरुषार्थः अचेतनत्वात् पर्यवत्। यथा पर्यङ्कः प्रच्छादनपटोपाधानसङ्घातः परार्थः, न हि स्वार्थः पर्यङ्कस्य। अतोऽवगम्यतेऽस्ति पुरुषः यः पर्यङ्के शेते यस्यार्थं पर्यङ्कः इति। तथा अस्य भूतसङ्घातस्य शरीरस्य महदादिसङ्घातस्य च परार्थत्वात् अवगम्यते अस्ति पुरुषः इति।

संघाताच्या परार्थत्वाने - जो हे महदादि संघात आहे तो अचेतन असल्या कारणाने पुरुषासाठी आहे. यथा पर्यंक(बिस्तर). ज्या प्रकारे पर्यंक अन्यासाठी होते, त्याचे स्वयंका कोणते स्वार्थ नाही होत.ज्याने आपल्याला ज्ञात होते की अवश्य याच्या वर शयन करणारा कोणी अन्य पुरुष आहे.

तसेच या भुतसंघात शरीर आणि महदादिच्या परार्थ झाल्याने जानले जाते की पुरुष आहे.

त्रिगुणादिविपर्ययात् - सङ्घातस्य परार्थत्वात्, यदि पुरुषोऽपि गुणत्रयसङ्घातः एव स्यात् तदा तस्यापि परार्थत्वं कल्प्येत। ततः अन्यः ततः अन्यः इति तदा अनवस्थादोषः स्यात्। तस्मात् किञ्चित् गुणत्रयरहितमङ्गीकर्तव्यमेव । अनेन हेतुना गुणत्रयरहितस्य पुरुषस्य सिद्धिः।

त्रिगुणांच्या विपर्याने संघाताच्या परार्थ झाल्याने यदि पुरुषपण तीन गुनांचा संघात होते. तेंव्हा त्यांचे पण परार्थत्व होते. त्याने भिन्न, त्याने अन्य असे अनवस्था दोष होतो. अतः किंचित् गुणत्रय रहिताचे स्वीकार करने उचित आहे. इस प्रकारे गुणत्रय रहित असा पुरुष सिद्ध होते.

अधिष्ठानात् - यथा लङ्घनप्लवनधावनसमर्थैः अश्वैः युक्तः रथः सारथिना अधिष्ठितः प्रवर्तते तथा प्रधानप्रवृत्तिहेतुभूतम् अधिष्ठातृचेतनं किञ्चित् भवेदेव। अतः अपि अस्ति पुरुषः।

ज्या प्रकारे लंघन, उत्प्लवन (कूदना), धावन यांच्यात समर्थ असे अश्वाने युक्त सारथिने अधिष्ठित केलेला रथ (उक्त कार्यामध्ये) प्रवृत्त होतो. त्याच प्रकारे प्रधान प्रवृत्तिमध्ये हेतुभूत अधिष्ठातृचेतन असे काही अवश्य होईल.तो पुरुष ही आहे.

भोक्तृभावात् - यथा मधुराम्ललवणकटुतिक्तकषायाख्यषड्रसोपबृंहितस्य अन्नस्य भोग्यस्य भोक्ता कश्चन कल्प्यते तथा महदादीनां भोक्तृत्वाभावात् अस्ति पुरुषः भोक्ता यस्येदं भोग्यं महदादिकम् इति कल्प्यते।

यथा मधुरादि सहा रसयुक्त अन्नाचे कोणी भोक्ता होत आहे. त्याच प्रकारे महदादिचे पण कोणी भोक्ता अवश्य असेल आणि तो पुरुष ही असेल.

कैवल्यार्थं प्रवृत्तेश्च - केवलस्य भावः कैवल्यम्। तन्निमित्तं विद्वानविद्वांश्च संसारसन्तानक्षयमिच्छति। मोक्षार्थं प्रवृत्तिशीलः पदार्थः न जडः भवितुमर्हति। अतः अस्ति पुरुषः । यदि विद्येते प्रधानपुरुषौ तर्हि किमर्थं नोपलभ्येते इति चेदुक्तम् -

कैवल्यार्थ प्रवृत्तिने - केवलाचा भाव म्हणजे कैवल्य. त्याच्यासाठी विद्वान् आणि अविद्वान् संसारातील संत नाशाची इच्छा करत आहे. मोक्षासाठी प्रवृत्त पदार्थ कधी जड नाही होऊ सकत. अतः पुरुष सिद्ध होते.

सौक्ष्मादनुपलब्धिः नाभावात् कार्यतस्तदुपलब्धिः।
महदादि तच कार्य प्रकृतिविरूपं सरूपं च ॥६०॥

॥ सांख्यकारिका - ८॥

प्रकृतिपुरुषौ सौक्ष्म्यात् नोपलभ्येते। अतः तयोः सत्ताविनिश्चयः कार्य दृष्ट्वा करणीयः। तच्च कार्य प्रकृतेः विसदृशं सदृशं वा स्यात्। यथा लोके पितुः तुल्यः अतुल्यः वा पुत्रः भवति ।

अनयोः प्रकृतिपुरुपयोः संयोगात्सृष्टिः भवति। तद्विपये एवमुक्त सांख्यकारिकायाम् -

प्रकृति आणि पुरुष सूक्ष्म असल्याने उपलब्ध नाही होत. अतः त्यांची सत्ता निश्चय कार्याला पाहून करने उचित होईल. ते कार्य प्रकृतिने विसदृश अथवा सदृश होईल. यथा लोकामध्ये पिताच्या समान अथवा असमान पुत्र होतात. प्रकृति आणि पुरुषाच्या संयोगाने सृष्टि होते. सांख्यकारिकामध्ये त्याच्या विषयि असे सांगितले आहे.

सृष्टिः -

पुरुषस्य दर्शनार्थं कैवल्यार्थम् अथ प्रधानस्य।
पङ्गवन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः॥६१॥

॥ सांख्यकारिका - २१॥

पुरुषस्य प्रधानेन सह संयोगः दर्शनार्थम् । प्रधानस्य पुरुषेण सह संयोगः कैवल्यार्थम्। पुरुषः प्रधानस्य दर्शनार्थं भोगार्थं च संयुक्तः भवेत्। येन च प्रकृतिस्वरूपज्ञानात् ततः निवत्य स्वरूपेण अवस्थानं शक्यम्। प्रकृतिः स्वां दर्शयित्वा मोक्षं प्रापयितुम् इच्छति पुरुषाय। अनयोः संयोगः पङ्वन्धन्यायेन सम्भवति। यथा पङ्गः कश्चन अन्धस्य स्कन्धारूढः मार्ग दर्शयति। अन्धः पङ्गदर्शितेन मार्गेण गच्छति। उभावपि मिथो सहकारेण फलं विन्दतः। एवं प्रकृतिः अन्धा अचेतना च किन्तु सक्रिया। पुरुषः द्रष्टा किन्तु पङ्गः। उभयोः संयोगेन सर्गः सम्भवति। यथा स्त्रीपुरुषसंयोगात् सन्तानोत्पत्तिः। बुद्धिः जडा पुरुषः चेतनः। किन्तु पुरुषः स्वात्मानं बुद्धेः पृथगिति न चिन्तयति। एतदेव अविवेकः। यदा बुध्या आत्मानं पृथगिति जानाति तदा तस्य बुद्धिगतत्तापैः तप्यत्वं न सम्भवति। एतदेव विवेकख्यातिः। विवेकख्यात्या च पुरुषः मुक्तः भवति। तादृशपुरुषं प्रति प्रकृतिः स्वकार्यं न दर्शयति। उक्तञ्च -

पुरुषाचे प्रकृतिसोबत जे संयोग आहे तो दर्शनासाठी आहे, प्रकृतिचे पुरुषाबरोबर साथ संयोग कैवल्यासाठी आहे, पुरुष प्रकृतिच्या दर्श आणि भोगासाठी संयुक्त होत आहे. ज्याने प्रकृतिचे स्वरूपज्ञान झाल्याने तो निवृत्त होऊन स्वरूपामध्ये अवस्थान शक्य होईल, प्रकृति स्वःताला दाखवून पुरुषाला मोक्ष देण्याची इच्छा ठेवती. या दोघांच्या संयोग पंग्वन्धन्यायाने सांगितले जाऊ शकते. ज्या प्रकारे पंगु आंधल्याच्या कांध्यावर आरूढ

होऊन त्याला मार्ग दिसतो. आणि दोघे इष्ट स्थानावर प्राप्त करतात, त्याच प्रकारे प्रकृति अन्ध आणि अचेतनावर सक्रिय होत आहे. पुरुष द्रष्टा होत आहे, किन्तु पंगु आहे. दोघांच्या संयोगाने सर्ग होत आहे. ज्या प्रकारे स्त्री आणि पुरुषाच्या संयोगाने संतानची उत्पत्ति होते. बुद्धि जड आणि पुरुष चेतन होत आहे. किन्तु पुरुष स्वतःला बुद्धिने पृथक् (भिन्न) नाही समझत, हेच अविवेक आहे. जेंव्हा बुद्धि आत्माने पृथक् आहे असे त्याला ज्ञात होत आहे. तेंव्हा उसका बुद्धिगत पापाने तप्यत्व नाही होत. हेच विवेकख्याति आहे. याने पुरुष मुक्त होत आहे, आणि त्याच पुरुषाच्या प्रति प्रकृति स्वतःचे कार्य नाही सांगत. असे म्हणले आहे -

विवेकख्यातिः मोक्षः च -

रहस्य दयित्वा निवर्तते नर्तकी यथा नृत्यात् ।

पुरुषस्य तथात्मानं प्रकाश्य निवर्तते प्रकृतिः॥६२॥

॥ सांख्यकारिका - ५९॥

उत्तरतन्त्रीयाः -

सम्प्रति दर्शनपरम्परासु अद्वैतमतनिरूपकाः काश्चन कारिकाः संक्षेपेण प्रदर्श्यन्ते। इदं च वैय्यासिकदर्शनं शङ्कराचार्यैः लोके प्रसारितम्। एतेषां जीवनमेवमासीत् -

आता दर्शन परंपरामध्ये अद्वैतमत उपस्थापित करणारी काही कारिका संक्षेपमध्ये प्रस्तुत कली जात आहे, हे वैय्यासिक दर्शन शंकराचार्याने लोकामध्ये प्रसारित किले गेलेले आहे. त्यांचे जीवन असे सांगितले आहे-

अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित्।

षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात् ॥६३॥

ते च स्वस्य अनितरसाधारणबुद्धिमत्तया अनेकान् पण्डितान् विजित्य अद्वैतचिन्तनं सर्वत्र प्रास्थापयन्। सर्वाणि शास्त्राणि प्रायः सानुबन्धचतुष्टयं निरूप्यन्ते। अस्मिन् च शास्त्रे अधिकारी विदितवेदवेदाङ्गः नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्मलस्वन्तः साधनचतुष्टयसम्पन्नः। तत्र उपासनानि शाण्डिल्यादीनि। उपासनं नाम तुल्यप्रत्ययसन्ततिः असङ्कीर्णा च अतत्प्रत्ययैः शास्त्रोक्तालम्बनविषया च। यद्यपि ज्ञेयं ब्रह्म निर्गुणं तथापि सगुणोपासनकथनं मन्दानां निर्गुणब्रह्मणि मनःस्थापनस्य दुःशकत्वात्। तदुक्तम् -

त्यांनी आपल्या तीक्ष्णबुद्धिमत्ताने अनेक पण्डितां जिंकून अद्वैतचिन्तनाला सर्वत्र स्थापित केले. सर्व शास्त्र प्रायः अनुबन्ध चतुष्टय सहित निरूपित होत आहे - या शास्त्रामध्ये अधिकारी वेद आणि वेदांगाचे अध्ययन केलेले, नित्य, नैमित्तिक, प्रायश्चित्त, उपासना, अनुष्ठान, ने निर्मल अन्तःकरणवाला, साधनचतुष्ट संपन्न असा होत आहे.येथे शाण्डिल्यादीनि उपासना आहे. उपासन म्हणजे समान गुण संतती, उपासना अर्थात् समानज्ञानाचे सातत्य होत राहने, संकरतारहितत्व, त्याच्या अज्ञानाच्या निवर्तक शास्त्रोक्त आधार संबंधी. यद्यपि निर्गुण ब्रह्माला जाणून घेणे आहे. तथापि मन्दव्यक्तिची प्रवृत्ति निर्गुण ब्रह्म नाही होत. अतः सगुणाचे कथन करने आवश्यक आहे -

सगुणोपासनम् -

निर्विशेष परं ब्रह्म साक्षात्कर्तुमनीश्वराः।
ये मन्दास्तेनुकम्प्यन्ते सविशेषनिरूपणैः ॥६४॥
वशीकृत्य मनस्तेषां सगुणब्रह्मशीलनात्।
तदेवाविर्भवेत्साक्षादपेतोपाधिकल्पनम् ॥६५॥

ये मन्दाः दुर्वासनावासितान्तःकरणाः निर्विशेषं परं ब्रह्म साक्षात् कर्तुमनीश्वराः ते सगुणब्रह्मोपासननिरूपणैः अनुगृह्यन्ते। सगुणब्रह्मोपासनाभ्यासात् मनसि वशीकृते तदेव परं ब्रह्म निरुपाधिकं सत् आविर्भवति। साधनचतुष्टयञ्च विवेकवैराग्यशमादिपटकसम्पत्तिमुमुक्षुत्वाख्यम्। साधन-चतुष्टयविपयविस्तरः एवं कृतः विवेकचूडामणौ -

जो मन्द, दुर्वासनामध्ये ज्यांचे मन आहे, निर्गुण ब्रह्मचा साक्षात्कार करण्यासाठी असमर्थ आहे ते सर्व सगुणब्रह्माची उपासनाने अनुगृहीत होत आहे. सगुण ब्रह्माची उपासना करण्याने मनाला वश करून ब्रह्माचा आविर्भाव होतो.

साधनचतुष्टयम् -

साधनान्यत्र चत्वारि कथितानि मनीषिभिः।
येषु सत्स्वेव सनिष्ठा यदभावे न सिध्यति ॥६६॥
आदौ नित्यानित्यवस्तुविवेकः परिगण्यते ।
इहामुत्रफलभोगविरागस्तदनन्तरम् ॥
शमादिषट्कसम्पत्तिमुमुक्षुत्वमिति स्फुटम् ॥६७॥

नित्यानित्यवस्तुविवेकः -

ब्रह्म सत्यं जगन्मिथ्येत्येवं रूपो विनिश्चयः।
सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः॥६८॥

वैराग्यम् -

तवैराग्यं जिहासा या दर्शनश्रवणादिभिः।
देहादिब्रह्मपर्यन्ते ह्यनित्ये भोगवस्तुनि ॥६९॥

जिहासा - हातुमिच्छा - तिरस्कारभावः

शमः -

विरज्य विषयवातादोषदृष्ट्या मुहुर्मुहुः ।

स्वलक्ष्ये नियतावस्था मनसः शम उच्यते ॥७०॥

मुहुर्मुहुः दोषदृष्ट्या विषयव्रातात् विषयसमूहात् विरज्य पृथकृत्य स्वलक्ष्ये मनसः नियतरूपेण स्थापनं शमः उच्यते।

पुन्हा पुन्हा दोषदृष्टिने विषयाच्या समूहाने पृथक् करुण स्वतःच्या लक्षावर मनाचे नियतरूपाने स्थापन शम असे म्हणतात.

दमः -

विषयेभ्यः परावर्त्य स्थापनं स्वस्वगोलके।

उभयेषामिन्द्रियाणां स दमः परिकीर्तितः॥७१॥

विषयेभ्यः शब्दादिभ्यः परावर्त्य ज्ञानेन्द्रियकर्मेन्द्रियाणां स्वस्वस्थानेषु स्थापनं दमः उच्यते। उपरतिः -

विषयामध्ये ज्ञानेन्द्रिय आणि कर्मेन्द्रियाला परावर्तित करून स्वस्थानावर स्थापन दम असे म्हणतात.

बाह्यानालम्बनं वृत्तेः एषोपरतिरुत्तमा ॥७२॥

वृत्तेः बाह्यवस्तूनाम् अनालम्बनम् उपरतिः इति निगद्यते।

तितिक्षा -

सहनं सर्वदुःखानामप्रतीकारपूर्वकम्।

चिन्ताविलापरहितं सा तितिक्षा निगद्यते॥७३॥

प्रतीकारराहित्येन चिन्ताविलापरहित्येन च सर्वेषां दुःखानां सहनं तितिक्षा इति निगद्यते।

प्रतीकार नकरून, चिन्ता, विलाप न करून सर्व दुःख सहने तितिक्षा होते.

श्रद्धा -

शास्त्रस्य गुरुवाक्यस्य सत्यबुध्यवधारणम्।
सा श्रद्धा कथिता सद्भिः यया वस्तूपलभ्यते ॥७४॥

समाधानम् -

सम्यगास्थापनं बुद्धेः शुद्धे ब्रह्मणि सर्वदा।
तत् समाधानमित्युक्तं न तु चित्तस्य लालनम् ॥७५॥

मुमुक्षुता -

अहङ्कारादिदेहान्तान् बन्धानज्ञानकल्पितान्।
स्वस्वरूपावबोधेन मोक्तुमिच्छा मुमुक्षुता ॥७६॥

॥ विवेकचूडामणिः - १८ तः २७ पर्यन्तम्॥

विषयश्च अस्य शास्त्रस्य जीवब्रह्मैक्यम्। सम्बन्धः विषयग्रन्थयोर्मध्ये प्रतिपाद्यप्रतिपादकभावरूपः। प्रयोजनग्रन्थयोर्मध्ये प्राप्यप्रापकभावरूपः। प्रयोजनं च स्वस्वरूपानुभूतिः। सा च तादृशः आनन्दः, यस्य आनन्दस्य अणुमात्राः लौकिकाः आनन्दाः। उक्तञ्च -

याचे शास्त्राचे विषय ब्रह्म आणि जीवाचे ऐक्य आहे, संबंध - विषय आणि ग्रन्थामध्ये प्रतिपाद्यप्रतिपादकभावरूप आहे. प्रयोजन आणि ग्रन्थामध्ये प्राप्यप्रापकभावरूप आहे. प्रयोजन स्वताःच्या स्वरूपाची अनुभूति आहे. तो असा आनन्द आहे की ज्याच्या अणुमात्रामध्ये लौकिक आनन्द आहे, असे

म्हणतात की -

यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम्।

तृष्णाक्षयसुखस्यैते नार्हतः षोडशी कलाम् ॥७७॥

पूर्वोक्तलक्षणः अधिकारी जननमरणादिदुःखेन सन्त्रस्तः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसर्पति ज्ञानप्राप्तये। शास्त्रेऽस्मिन् गुरुपरम्परा द्विधा श्रूयते। हरिमूलतः हरमूलतः च। तद्यथा -

पूर्वोक्त लक्षणचा अधिकारी जननमरणादि दुःखाने त्रस्त ज्ञानप्राप्तिसाठी श्रोत्रिय, ब्रह्मनिष्ठ गुरुची उपासना करत आहेत. या शास्त्रामध्ये द्विविध गुरुपरंपरा सांगितलेली आहे. हरिमूल आणि हरमूल. हरमूल गुरुपरंपरा या प्रकारची आहे -

गुरुपरम्परा -

तत्र हरमूलतः गुरुपरम्परा एवमुक्तः -

सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम् ।

अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥७८॥

हरिमूलतः गुरुपरम्परा एवं विद्यते -

नारयणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च।

व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ॥७९॥

श्रीशङ्कराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम्।

तं त्रोटकं वार्तिककारमन्यान् अस्मद् गुरून् सन्ततमानतोऽस्मि ॥८०॥

ईदृशगुरुपरम्परया प्राप्तब्रह्मदर्शनः कश्चन गुरुः तस्मै अधिकारिणे शिष्याय, 'रज्जौ सर्पः इव सर्वमिदं ब्रह्मणि अध्यारोपितम्। ब्रह्माभिन्नं सर्वमपि आज्ञानिकम् । ब्रह्मैव परमार्थसत्' इति बोधयति ।ततः एवं प्राप्तज्ञानः परमार्थतां विन्दति । तत्र का नाम परमार्थता इति चेदेवमुच्यते-

असि गुरुपरम्परेने ब्रह्मज्ञान प्राप्त केले गेलेले गुरु त्यांच्या अधिकारी शिष्यला बोधित करतात - ज्या प्रकारे रज्जुमध्ये सर्प असल्याचा आरोप केला जातो. त्याच प्रकारे हे सर्व ब्रह्मामध्ये आरोपित आहे. ब्रह्म हाच परमार्थ सत् आहे, असे ज्ञान प्राप्त करून तो छात्र परमार्थताला प्राप्त करतो. परमार्थता काय आहे. यावर ते म्हणतात -

परमार्थता -

न विरोधो न चोत्पत्तिः न बद्धो न च साधकः।

न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥८१॥

॥ गौडपादकारिका - २॥३२॥

ब्रह्माभिन्नं सर्वमपि आज्ञानिकम् इत्युक्तम्। तत्र अज्ञानं सदसदादिपदैः निर्वक्तुमशक्यत्वात् अनिर्वचनीयमिति कथ्यते। तस्य लक्षणमेवमुक्तम् -

ब्रह्म व्यतिरिक्त सर्व काही अज्ञानिक आहे असे म्हणाले आहे. अज्ञान ही सत किंवा असत पदाद्वारे सांगता येत नाही म्हणून त्याला अनिर्वचनीय असे म्हणतात त्याने लक्षण या प्रकारे

अनिर्वचनीयम् -

प्रत्येक सदसत्त्वाभ्यां विचारपदवीं न यत्।

गाहते तदनिर्वाच्यमाहुर्वेदान्तवादिनः॥८२॥

॥ चित्सुखी॥

तदज्ञानमेव अविद्यापदेनापि अभिधीयते। अविद्यायाः लक्षणमेवमुक्तं वेदान्तग्रन्थेषु - अविद्यालक्षणम् -

अविद्यायाः अविद्यात्वमिदमेव तु लक्षणम्।
यत्प्रमाणासहिष्णुत्वमन्यथा वस्तु सा भवेत् ॥८३॥

॥ बृहदारण्यकभाष्यवार्तिकम् ॥

विवेकचूडामणौ सन्निरूपितं तल्लक्षणम्। तदृश्यताम् -

अव्यक्तनानी परमेशशक्तिः अनाद्यविद्या त्रिगुणात्मिका परा।
कार्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते ॥८४॥
सन्नाप्यसन्नाप्युभयात्मिका नो भिन्नाप्यभिन्नाप्युभयात्मिका नो।
साङ्गाप्यनङाप्युभयात्मिका नो महाभ्दुतानिर्वचनीयरूपा ॥४५॥

॥ विवेकचूडामणिः - १०८ ,१०९॥

एषा माया त्रिगुणात्मिका कार्यानुमेया । पुनश्च न सत् (सत् चेत् न ज्ञानेन बाध्येत किन्तु ज्ञानेन बाध्यते।) न असत् (यद्यसत् तर्हि शशशृङ्गवन्नोपलभ्येत।) न उभयात्मिका (नैकस्मिन् द्रव्ये परस्परविरुद्धधर्मयोः अवस्थानं सम्भवति ।) न भिन्ना (भिन्ना चेत् अद्वैतभङ्गप्रसङ्गः।) नापि अभिन्ना (यथा नाग्निदाहकशक्त्योः अभेदः सम्भवति तथा न ब्रह्माविद्ययोः। न उभयात्मिका। न सावयवा (सावयवत्वे उत्पत्तिप्रसङ्गः।) नापि निरवयवा (गुणत्रययुक्तत्वात् परिणामिकारणत्वात् च। न निरवयवस्य परिणामः सम्भवति।) तस्माद् एपा सदादिपदैः अनिर्वचनीया।

ही माया त्रिगुणात्मिका आणि कार्यानुमेया आह. सत् नाही (यदि सत् आहे तेंव्हा ज्ञानाने बाधित नाही होत किन्तु ज्ञानाने बाधित होत आहे, असत्

नाही (जर असत् होते तेंव्हा शशशृंग){खरगोशला सिंग नाही होत - तरी पण त्याच्या सारखे असे बोलणे असंभव दर्शवत आहे} त्याच्या सारखे नाही मिळत, उभयात्मिका पण नाही (एकच द्रव्यामध्ये परस्पर विरुद्ध द्रव्यांचे अवस्थान नाही होत, भिन्नपण नाही (असे बोलण्याने अद्वैतभंग होईल), अभिन्न पण नाही (यथा अग्नि आणि दाहकशक्तिचे अभेद संभव नाही त्याच प्रकारे ब्रह्मा आणि विद्याच नाही),उभयात्मिका पण नाही.तो अवयव पण नाही (सावयवत्व झाल्याने उत्पत्ति प्रसंग होईल), निरवयवपण नाही (त्रिगुणयुक्त असल्या कारणाने आणि परिणामिकारणच्या कारनाणे. निरवयवाचे परिणाम नाही होत) अतः हे सदादि पदाने अनिर्वचनीय आहे.

अनादिभावरूपं यव्दिज्ञानेन प्रलीयते।

तदज्ञानमिति प्राज्ञा लक्षणं सम्प्रचक्षते ॥८६॥

॥चित्सुखी - २।९॥

सेयं भ्रान्तिर्निरालम्बा सर्वन्यायविरोधिनी।

सहते न विचारं सा तमो यव्दिद्दिवाकरम् ॥८७ ॥

॥नैष्कर्म्यसिद्धिः॥

एतादृशाज्ञानकल्पितानां प्रत्यक्षादिप्रमाणानाम् आत्मज्ञानपर्यन्तमेव प्रामाण्यम्। प्राप्ते ज्ञाने प्रमाणप्रमेयादिसर्वव्यवहारव्याकोपः भवति। तदुक्तम्-

असे अज्ञानकल्पित प्रत्यक्षादिप्रमाणांचे आत्मज्ञाना पर्यन्त ही प्रामाण्य आहे. ज्ञान प्राप्त झाल्यावर प्रमाण प्रमेयादि सर्व व्यवहारचे व्याकोप होत आहे, ते म्हणतात -

देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पितः।

लौकिकं तद्वदेवेदं प्रमाणन्त्वात्मनिश्चयात् ॥८८॥

आ-आत्मनिश्चयात् आत्मनिश्चयपर्यन्तं प्रमाणम् इत्यर्थः। तच्च अज्ञानं न शशविषाणवत् तुच्छम्। किन्तु मिथ्या। यस्य त्रैकालिकाभावप्रतियोगित्वे सति शब्दमात्रेण अवस्थितिः तत् तुच्छम् । तत्रोदाहरणत्वेन एषा कारिका प्रसिद्धा

आ - आत्मनिश्चयाला घेऊन आत्मनिश्चयपर्यन्त प्रमाण असा अर्थ आहे. ते अज्ञान शशविषाणा सारखे तुच्छ नाही. परंतु असत्य आहे. ज्याचा त्रैकालिक अभाव सिद्ध आहे आणि जे शब्दात व्यक्त करता येत नाही, ते तुच्छ आहे. उदाहरणाच्या दृष्टिने हि कारिका प्रसिद्ध आहे -

मृगतृष्णाम्भसि स्नातः खपुष्पकृतशेखरः।
एष वन्ध्यासुतो याति शशशृणधनुर्धरः ॥८९॥

अस्यार्थः - एषः वन्ध्यासुतः मृगतृष्णायाः जले स्नाता धृताकाशपुष्पः शशशृङ्गेण निर्मितस्य धनुषः गृहीता गच्छति।

अर्थ - हे वन्ध्यापुत्र मृगतृष्णाच्या जलाने स्नान केलेला, आकशपुष्पाला धारण करून, सश्याच्या शृंगाने निर्मित धनुष घेऊन जात आहे.

तस्य अज्ञानस्य आवरणं विक्षेपः इति शक्तिद्वयम्। तत्र आवरणशक्तिः यथा अल्पः अपि मेघः अनेकयोजनविस्तारमादित्यमण्डलम् अवलोकयितृनयनपथपिधायकतया आच्छादयति तथा परिच्छिन्नमज्ञानमपरिच्छिनं आत्मानं असंसारिणम् अवलोकयितृबुद्धिपिधायकतया आच्छादयति। अनया एव शक्त्या अवच्छिन्नस्य आत्मनः कर्तृत्वभोकृत्वादिरूपसंसारभावनापि सम्भाव्यते। विक्षेपशक्तिः यथा रज्जौ अज्ञानं स्वशक्त्या सर्पादिकमुत्पादयति तथैव आत्मावृताज्ञानस्य

आकाशादिप्रपञ्चस्योत्पादिका शक्तिः। तन्निरूपणं च-

त्या अज्ञानाची आवरण आणि विक्षेप हे दोन शक्ति आहेत, आवरणशक्ति यथा - अल्प मेघ पण सूर्याने व्याप्त केलेल्या बृहत् असे मंडलाला द्रष्टाने आच्छादित करतात. ज्याने आपण सूर्याला साक्षात् पाहू शकत नाही. त्या प्रकारे अज्ञान आत्माला अच्छादित करून देते. ह्याच शक्तिच्या कारण आत्म्याची कतृत्व, भोकृद्वादिरूप भावना पण संभावित होते. विक्षेपशक्ति - ज्या प्रकारे रज्जु विषय अज्ञान स्वशक्तिने सर्पादिला उत्पन्न करता आहे, त्या प्रकार -

मायाशक्तिद्वयम् -

शक्तिद्वयं हि मायायाः विक्षेपावृत्तिरूपकम् ।

विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत् सृजेत् ॥९०॥

अन्तर्दृक् दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः।

आवृणोत्यपरा शक्तिः सा संसारस्य कारणम् ॥९१॥

॥दृग्दृश्यविवेकः - १३, १५॥

विक्षेपशक्तिः -

विक्षेपशक्तिः रजसः क्रियात्मिका यतः प्रवृत्तिः प्रसृता पुराणी।

रागादयोऽस्याः प्रभवन्ति नित्यं दुःखादयो ये मनसो विकाराः ॥९२॥

॥विवेकचूडामणिः - ११२॥

इयं विक्षेपशक्तिः रजोगुणस्य कार्यरूपा। अस्याः शक्तेः अनादिकालसिद्धा संसारहेतुभूता प्रवृत्तिः प्रसृता। इतः एव रागादयः दोषाः प्रवृत्ताः।

ही विक्षेप शक्ति रजोगुण रूपाने कार्य करते. प्रस्तुत शक्ति अनादी काळापासून सिद्ध आहे, संसारासाठी कारण असून तिचा प्रसार झाला आहे.

आवरणशक्तिः -

एषावृतिर्नाम तमोगुणस्य शक्तिर्यया वस्त्ववभासतेऽन्यथा।
सैषा निदानं पुरुषस्य संसृतेः विक्षेपशक्तेः प्रवणस्य हेतुः॥९३॥

॥विवेकचूडामणिः - ११५॥

यया तमोगुणात्मिकया सच्चिदानन्दरूपं वस्तु देहादिरूपेण अवभासते सा आवरणशक्तिः। सा एव संसारस्य निदानम्।

ईदृशशक्तिद्वयवदज्ञानेन उपहितं चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधिप्रधानतया च उपादानं भवति। उपादानं द्विविधं विवर्तोपादानं परिणामोपादानं चेति। कारणसलक्षणकार्यापत्तिः परिणामः तद्विलक्षणः विवर्तः। अथवा कारणाभिन्नं कार्यं परिणामः तदभेदं विनैव तद्व्यतिरेकेण दुर्वचं कार्यं विवर्तः। उक्तं च -

ज्याच्या कारणामुळे वस्तु स्व-स्वरूपापेक्षा वेगळी प्रतीत होते ती तमोगुणाची आवरण शक्ति आहे. हेच संसाराचे निदान आहे.

या दोन्ही शक्तिच्या अज्ञानाने उपहित चैतन्य स्वप्रधानाने निमित्त आणि स्वोपाधिप्रधानताने उपादान होते. उपादान दोन प्रकारचे आहे - विवर्तोपादान आणि परिणामोपादान. कारण आणि लक्षणयुक्त कार्यापत्ति परिणाम तद्विलक्षण विवर्त आहे अथवा कारणाने अभिन्न कार्य परिणाम त्याच्या भेदाच्या विना हे व्यतिरेक दुर्वच कार्य विवर्त आहे.

ते म्हणतात –

विकारः-विवर्तः-

सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः।
अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदीरितः॥९४॥

अर्थः - वस्तुनः यथार्थतः स्वस्वरूपं परित्यज्य स्वरूपान्तरापत्तिः परिणामः। यथा दुग्धमेव स्वस्वरूपं परित्यज्य दध्याकारेण परिणमते। विवर्तः तु वस्तुनः स्वस्वरूपापरित्यागेन स्वरूपान्तरेण प्रतीतिः। यथा रज्जुः स्वस्वरूपापरित्यागेन साकारेण मिथ्या प्रतिभासते। वेदान्ते ब्रह्म जगद्रूपेण विवर्तते अज्ञानं तु जगद्रूपेण परिणमते।

ब्रह्माज्ञानयोः जगत्प्रति कारणत्वात् उभयोः अपि कारणयोः गुणानां कार्ये सह्लक्रमणं दृश्यते। तद्यथा -

वस्तुची यथार्थ स्व स्वरूपाला सोडून अन्य स्वरूपामध्ये प्राप्ति परिणाम आहे. यथा - दुग्ध हेच स्वरूपाला त्याग करून दहीमध्ये परिणत होते. विवर्त वस्तुच्या स्व स्वरूपाला त्यागन्याने झालेले अन्य रूपाची प्रतीति आहे. यथा- रज्जु स्व स्वरूप परित्यागाने सर्पाप्रमाणे प्रतिभासित होते. वेदांतामध्ये ब्रह्म हे जगत् रूपामध्ये विवर्तित होते, अज्ञान तर जगत् रूपामध्ये परिणत होते. ब्रह्म आणि अज्ञान दोन्हीपण जगाच्या प्रति कारण आहे, म्हणून दोन्हीपण कारणाच्या गुणांचे कार्यामध्ये संक्रमण दिसून येते. यथा -

अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।

आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥९५॥

॥ दृग्दृश्यविवेकः - २०॥

तदज्ञानं समष्टिव्यष्ट्यभिप्रायेण एकमिति अनेकमिति च व्यवह्रियते। यथा वृक्षाणां समष्ट्यभिप्रायेण वनमिति। यथा वा जलानां समष्टयभिप्रायेण जलाशयः इति। तत्र समष्टिः विशुद्धसत्त्वप्रधाना माया इत्यभिधीयते। व्यष्टिश्च मलिनसत्त्वप्रधाना अविद्येति कथ्यते।

ते ज्ञान समष्टि आणि व्यष्टि या दोन प्रकारचे आहे. दोन्ही क्रमशः एक आण

अनेक या प्रकारे सांगितले जाते. यथा-वृक्षांचे समष्टि अभिप्रायाने वन होते. यथा विभिन्न जलाने समष्ट्यभिप्रायाने जलाशय होते. समष्टि विशुद्ध सत्त्वप्रधान आहे. आणि त्याला माया म्हणतात. व्यष्टि हे मलिन सत्त्वप्रधान आहे आणि त्याला अविद्या म्हणतात -

तदुक्तम् - द्विविधा प्रकृतिः (अज्ञानम्) -

चिदानन्दमयब्रह्मप्रतिबिम्बसमन्विता।
तमोरजस्सत्त्वगुणा प्रकृतिर्व्विविधा च सा ॥९६॥
सत्त्वशुध्यविशुद्धिभ्यां मायाविद्ये च ते मते।
मायाबिम्बो वशीकृत्य तां स्यात् सर्वज्ञ ईश्वरः॥९७॥
अविद्यावशगस्त्वन्यः तव्दैचित्र्यादनेकधा।
सा कारणशरीरं स्यात् प्राज्ञस्तत्राभिमानवान् ॥९८॥

॥ पञ्चदशी - १५ ,१६ ,१७ ॥

सच्चिदानन्दरूपं ब्रह्म तस्य प्रतिबिम्बेन प्रतिच्छायया युक्ता सत्त्वरजस्तमोगुणानां साम्यावस्था या प्रकृतिरित्युच्यते सा च द्विविधा द्विप्रकारा भवति। सत्त्वस्य प्रकाशात्मकस्य गुणस्य शुद्धिः गुणान्तरेण अकलुषीकृतत्वम्, अविशुद्धिः गुणान्तरेण कलुषीकृतत्वं ताभ्यां सत्त्वशुध्यविशुद्धिभ्यां ते च द्विविधे मायेत्यविद्येति च मते। विशुद्धसत्त्वप्रधाना माया मलिनसत्त्वप्रधाना अविद्या इत्यर्थः। तत्र मायावच्छिन्नं चैतन्यमीश्वरः। अविद्यावच्छिन्नं चैतन्यं जीवः। तयोः ईश्वराधीना माया। जीवश्च अविद्यावशगः

तयोः ईश्वरः समष्टिशब्देन जीवश्च व्यष्टिशब्देन अभिधीयते । तत्र कारणं तु

–

सच्चिदानन्द रूपी ब्रह्माच्या प्रतिबिंबाने प्रतिछायेणे युक्त सत्व, रज, तमोगुणांच्या समानअवस्थेला प्रकृती असे म्हणतात. त्या दोन प्रकारच्या आहेत. प्रकाशात्मक सत्वगुणाची शुद्धि अर्थात अन्य गुणांद्वारे अशुद्ध न होणे, अविशुद्धी अर्थात अन्य गुणांने अशुद्ध होणे. या प्रकारे सत्वशुद्धी आणि सत्व अविशुद्धी या प्रकाराणे त्या दोन आहेत. माया आणि अविद्या. विशुद्धसत्त्व प्रधान माया आहे आणि मलिनसत्त्व प्रधान अविद्या आहे. मायावच्छिन्न चैतन्य ईश्वर आहे, अविद्यावच्छिन्न चैतन्य जीव आहे. माया ही ईश्वर आधीन आहे. जीव हा अविद्येच्या वशात जाणार आहे, याच्यात ईश्वराचे अभिधान समष्टि या पदाने होते. याचे कारण हे आहे.

व्यष्टिः - समष्टिः -

समष्टिरीशः सर्वेषां स्वात्मतादात्म्यवेदनात्।
तदभावात् ततोऽन्ये तु कथ्यन्ते व्यष्टिसंज्ञया ॥९९॥

॥ पञ्चदशी - १।१५॥

ईशः सर्वेषां लिङ्गशरीरोपाधिकानां तैजसानां स्वात्मतादात्म्यवेदनात् स्वात्मना तादात्म्यस्य एकत्वस्य ज्ञानात् समष्टिः भवति । ईश्वरात् अन्ये जीवाः तु तदभावात् तादात्म्यवेदनस्य अभावात् व्यष्टिशब्देन कथ्यन्ते। सः एव ईश्वरः अपञ्चीकृतभूतकार्यसमष्टिसूक्ष्मशरीराभिमानित्वे हिरण्यगर्भः इति पञ्ची-कृतभूतकार्यसमष्टिस्थूलशरीराभिमानित्वे विराट् इति समष्टिकारण-शरीराभिमानित्वे ईश्वरः इति कथ्यते । तत्र हिरण्यगर्भः प्रथमजीवी। उक्तञ्च -

ईश- अर्थात सर्व जीवाचा, तेजस [आत्मा] चे स्वात्म्यतादात्म्यवेदना (आत्मा/जीवाला होणारे ज्ञान हे ईशाला पण होते (ज्या प्रकारे भक्ताला होणारा अनुभव) त्या कारणाने तो समिष्ट आहे, ईश्वराणे अन्य जीव

तादात्म्याच्या आभावने कारणाने त्याला व्यष्टि असे म्हणतात. तोच ईश्वर अपंचीकृत, भूतकार्य, समष्टि, सूक्ष्मशरीर हिरण्यगर्भ असे म्हणतात. पंचीकृत, भूतकार्य, समष्टि, स्थूलशरीर विराट या नावाने जानले जाते. समष्टि, कारणशरीर ईश्वर असे म्हणतात. हिरणयगर्भ हे प्रथम जीवी आहे. ते म्हणतात- हिरण्यगर्भ हे शरीर राहनारा प्रथम पुरुष, आदिकर्ता, सर्व भूतामध्ये ब्रह्माग्र आहे

स वै शरीरी प्रथमः स वै पुरुष उच्यते।

आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत ॥१००॥

जीवः अपि व्यष्टिस्थूलशरीराभिमानित्वे विश्वः, व्यष्टिसूक्ष्मशरीराभिमानित्वे तैजसः, व्यष्टिकारणशरीराभिमानित्वे प्राज्ञः इति अभिधीयते।

जीव पण व्यष्टि, स्थूलशरीर राहते विश्व आहे, व्यष्टि, सूक्ष्मशरीर राहते तैजस आणि व्यष्टि, कारणशरीर राहते प्राज्ञ असे म्हणतात.



एवं जीवस्यापि स्थूलसूक्ष्मकारणाख्यानि त्रीणि शरीराणि इत्युक्तम्। तेषां स्वरूपम् एवं निरूपितम्-

या प्रकारे स्थुल, सूक्ष्म आणि कारण हे शरीराचे तीन प्रकार संगीतले आहे. त्याचे स्वरुप या प्रकारे निरुपित केले आहे.

शरीरत्रय –

तत्र अन्नमयकोशः स्थूलशरीरे, प्राणमनोविज्ञानमयाः लिङ्गशरीरे (अस्य सूक्ष्मशरीरमित्यपि नामान्तरं विद्यते), आनन्दमयकोशः कारणशरीरे च अन्तर्भवति। स्थूलशरीरं च -

अन्नमयकोश स्थूलशरीरामध्ये, प्राण, मन आणि विज्ञानमय लिंगशरीरामध्ये (याला सूक्ष्मशरीर पण बोलतात) आणि आनन्दमय कोश कारणशरीरामध्ये होते.

त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसङ्कुलम् ।
पूर्ण मूत्रपुरीषाभ्यां स्थूलं निन्द्यमिदं वपुः ॥१०१॥

॥विवेकचूडामणिः - ८९॥

त्वचा, मांस, रक्त, स्नायू, मेद, मज्जा, अस्थिंचा समूह तसेच मलमूत्र यांनी भरलेले हे स्थूल शरीर अति निंदनीय आहे.

सूक्ष्मशरीरम् -

बुद्धिकर्मेन्द्रियप्राणपञ्चकैर्मनसा धिया।
शरीरं सप्तदशभिः सूक्ष्मं तल्लिङ्गमुच्यते ॥१०२॥

॥पञ्चदशी - १।२३॥

सूक्ष्मशरीरम् अपञ्चीकृतभूतैः उत्पन्नं पञ्चभिः प्राणैः मनसा बुध्या दशभिः इन्द्रियैः च समन्वितं विद्यते।

सूक्ष्मशरीर अपंचीकृत भूतांपासून उत्पन्न आहे, पंच प्राण, मन, बुद्धि, दहा इन्द्रिय याने समन्वित आहे.

दशेन्द्रियाणि -

बुद्धीन्द्रियाणि श्रवणं त्वगक्षि घ्राणं च जिह्वा विषयावबोधनात् ।

वाक्पाणिपादा गुदमप्युपस्थः कर्मेन्द्रियाणि प्रवणेन कर्मसु ॥१०३॥

॥विवेकचूडामणिः - ६१॥

विषयांचे ज्ञान प्राप्त करण्याच्या हेतूने कान, त्वचा, नेत्र, नाक, जिव्हा हे पांच ज्ञानेंद्रिय आहे.

अत्रार्थे अन्यः श्लोकः -

वागादि पञ्च श्रवणादि पञ्च प्राणादि पञ्चाभ्रमुखानि पञ्च ।

बुध्याद्यविद्यापि च कामकर्मणी पुर्यष्टकं सूक्ष्मशरीरमाहुः ॥१०४॥

॥विवेकचूडामणिः – ९६ ॥

१ वागादिपञ्चकम् २ श्रवणादिपञ्चकम् ३ प्राणपञ्चकम् ४ भूतपञ्चकम् ५ बुध्यादिचतुष्टयम् ६ अविद्या ७ कामः ८ कर्म। एतत्सर्वं मिलितं पदार्थाष्टकसमुदायोपेतं सूक्ष्मशरीरमाहुः वेदान्तिनः।।

वागादि पंच, श्रवणादि पंच, पंच प्राण, पंच भूत, बुद्ध्यादि चार, अविद्या, काम, कर्म या सर्व आठ पदार्थाने युक्त शरीर होते हे असा वेदान्ती म्हणतात.

कारणशरीरम् -

अव्यक्तमेतद् त्रिगुणैर्निरुक्तम् तत्कारणं नाम शरीरमात्मनः।

सुषुप्तिरेतस्य विभत्त्यवस्था प्रलीनसर्वेन्द्रियबुद्धिवृत्तिः ॥१०५॥

॥विवेकचूडामणिः - १२२ ॥

अव्यक्तं (अज्ञानम्) स्वस्वरूपतः साक्षादस्पष्टम्। एतत् त्रिगुणसमन्वितम्। तत् अव्यक्तम् अविद्यादिशब्दवाच्यम् आत्मनः कारणं नाम शरीरम् । प्रलीनानि सर्वेपामिन्द्रियाणां बुद्धेश्च वृत्तिः यस्यामवस्थायां सा प्रलीनसर्वेन्द्रियबुद्धिवृत्तिः सुपुप्तिः। सा कारणशरीरस्य अव्यक्तस्य असाधारणी अवस्था। तत्र यथा स्वतः शुभ्रः पटः धौतः, अन्नावलिप्तः घट्टितः, मष्याकारयुक्तः लाञ्छितः, वर्णपूरितः रञ्जितः इति अवस्थाचतुष्टयं प्राप्नोति तथा परमात्मा चित्रपटस्थानीयः शुद्धः ईश्वरः हिरण्यगर्भः विराड् इति च अभिधानं प्राप्नोति। अस्मिन् एव चित्रपटस्थानीये परमात्मनि चित्रस्थानीयः स्थावरजङ्गमात्मकः निखिलः प्रपञ्चः। तदेवं ब्रह्मणि नामरूपादीनां प्रकल्पनमेव सृष्टिः। तदुक्तम्-

अज्ञान स्व स्वरूपाने सर्वदा अस्पष्ट ही रहते. हे त्रिगुण समन्वित होत. तो अव्यक्त आणि अविद्यादि शब्दाचे वाच्य आत्म्याचे कारण अर्थात् शरीर. या अभिव्यक्तीची अवस्था सुषूप्ति आहे. ज्याच्यात बुद्धीची संपूर्ण वृत्ती लीन होऊन जाते. ते कारण शरीराची अव्यक्त असाधारण अवस्था आहे. यथा स्वतः शुभ्र, वस्त्र धौत, अन्नवलिप्त, मष्याकारामध्ये लांछित आणि वर्णांने रंजित असा चार अवस्थाना प्राप्त करत आहे त्याच प्रकारे परमात्मा चित्रित वस्त्राच्या स्थानावर आहे आणि शुद्ध, ईश्वर, हिरण्यगर्भ आणि विराट् या चार नावाने ओळखले जाते. ब्रह्मामध्ये नामरूप इत्यादिचे प्रकल्पन हेच सृष्टि आहे. असे बोलले जात आहे की -

सृष्टिर्नाम ब्रह्मरूपे सच्चिदानन्दवस्तुनि।

अब्धौ फेनादिवत्सर्वनामरूपप्रसारणा ॥१०६॥

॥ दृग्दृश्यविवेकः - १४॥

तत्र यथा वस्त्रे तत्सदृशानि वस्त्रान्तराणि चित्रगतमनुष्याणां लिख्यन्ते तथा अधिष्ठानचैतन्यसदृशाः चिदाभासाः जीवाः कल्प्यन्ते । एवं एकस्मिन्नेव

परमात्मनि अनेके भेदाः कल्पिताः।

ज्याप्रमाणे विभिन्न रंगाची वस्त्रे भिन्न मनुष्यांना सूचित करतात त्याच प्रकारे अधिष्ठानचैतन्या सारखे चिदाभास जीवांची कल्पना केली जात आहे. या प्रकारे एकाच परमात्मातमध्ये अनेक भेदाची कल्पना केली जात आहे.

श्रुतिश्च -

एक एव हि भूतात्मा भूते भूते व्यवस्थितः।

एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥१०७॥

॥ब्रह्मबिन्दूपनिषत् - १२॥

सर्व भूतांमध्ये एकच भूतात्मा आहे. ज्या प्रकारे आकशामध्ये स्थित आणि जलामध्ये स्थित (प्रतिबिम्बाच्या रुपामध्ये) चन्द्र एकच असतो, तरी पण भिन्न आहे असा वाटतो त्याच प्रकारे भूतात्मा आहे.

स च जीवः अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाख्यैः पञ्चभिः कोशैः आवृतः विद्यते। ते च पञ्चकोशाः एवं निरूपिताः।

तो जीव अन्नमय, प्राणमय, मनोमय, विज्ञानमय, आनन्दमय असे पाच कोशाने आवृत आहे. पाच कोश या प्रकारे सांगितले आहे -

पञ्चकोशाः -

स्यात्पञ्चीकृतभूतोत्थो देहः स्थूलोन्नसंज्ञकः।

लिङ्गं तु राजसैः प्राणैः प्राणः कर्मेन्द्रियैः सह ॥१०८ ॥

॥पञ्चदशी - १॥३४॥

तत्र पञ्चीकरणं नाम -

द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः।

स्वस्वेतरद्वितीयांशैः योजनात् पञ्च पञ्च ते॥१०९॥

॥पञ्चदशी - १॥२७॥

प्रत्येकं भूतमपि द्विधा विभज्य तत्रार्धभागे पुनः भागचतुष्टयं कृत्वा तत्र स्वस्वेतरभूतचतुष्टययोजनमेव पञ्चीकरणम्। तादृशैः पञ्चीकृतैः भूतैः उत्पन्नं स्थूलशरीरमन्नमयकोशः इत्यभिधीयते। पञ्चप्राणैः पञ्चभिः कर्मेन्द्रियैः च संयुक्तः प्राणमयः।

प्रत्येक भूत दोन भागामध्ये विभागले आहे. आणि उस अर्ध भागामध्ये पुनः चार भाग करून तिथे स्व आणि स्वेतरभूतचतुष्टयाचे योजन हे पंचीकरण आहे. या प्रकारे पंचीकृत भूतांपासून उत्पन्न स्थूलशरीराला अन्नमयकोश पण म्हणले आहे.

सात्विकैर्धेन्द्रियैः साकं विमर्शात्मा मनोमयः।

तैरेव साकं विज्ञानमयो धीर्निश्चयात्मिका ॥११० ॥

॥पञ्चदशी - १।३५॥

ज्ञानेन्द्रियाणि मनः च संयुज्य मनोमयः। ज्ञानेन्द्रियैः संयुक्ता बुद्धिः विज्ञानमयः।

ज्ञानेन्द्रिय आणि मनाच्या संयोगाने मनोमय. ज्ञानेन्द्रियाच्या सोबत संयुक्त बुद्धि विज्ञानमय.

कारणे सत्वमानन्दमयो मोदादिवृत्तिभिः।

तत्तत्कोशैस्तु तादात्म्यादात्मा तत्तन्मयो भवेत् ॥१११॥

॥पञ्चदशी - १।३६॥

कारणशरीरे या अविद्या सा मोदादिभिः वृत्तिभिः युक्ता आनन्दमयः भवति।

जीवः तत्तत्कोशेषु अभिमानात् तत्तन्मयो भवति। सः जीवः स्वानुष्ठितकर्मानुगुण्येन फलानि भुङ्क्ते अनेकानि शरीराणि च प्राप्नोति। तत्र स्मृतयः

कारण शरीरामध्ये जो अविद्या आहे तो मोदादि वृत्तिने युक्त आनन्दमय होत आहे. जीव तत् तत्कोशामध्ये अभिमानाने तत् तत्युक्त होत आहे. तो जीव स्व अनुष्ठित कर्माचे अनुसार फल प्राप्त करत आहे. स्मृति इथे प्रमाण आहे-

कर्मफलम् -

शरीरजैः कर्मदोषैः याति स्थावरतां नरः।

वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ॥११२॥

॥ मनुस्मृतिः - १२।९॥

य संसारामध्ये व्यक्ति, शरीराने उत्पन्न कर्मदोषद्वारे स्थावरभावाला, वाणीने उत्पन्न कर्म-दोषाद्वारा, पक्षी तसेच मृगभावाला तथा मनाने उत्पन्न दोषाने चाण्डालत्वादिला प्राप्त होते.

शुभैराप्नोति देवत्वम् अशुभैर्नारकीं तनूम् ।

उभाभ्यां पुण्यपापाभ्यां मानुष्यं लभतेऽवशः ॥११३॥

शुभ कर्माने देवत्व, अशुभाने नरकत्व आणि उभय कर्माने मनुष्यत्व प्राप्त होते.

अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ।

नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥११४॥

केलेले शुभ कार्य किंवा अशुभ कर्माचे फल अवश्य भोगावे लागतात, जर भोगले नाही तर तो कभीच नष्ट नाही होत.

एवं ज्ञात्वापि जीवाः उत्तमकर्मणि प्रवृत्ताः न भवन्ति । तदुक्तम् -

हे माहीत असून देखील मनुष्य उत्तमकर्मामध्ये प्रवृत्त नाही होत. ते म्हणतात-

पुण्यस्य फलमिच्छन्ति पुण्यं नेच्छन्ति मानवाः।
पापस्य तु नहीच्छन्ति पापं कुर्वन्ति यत्नतः ॥११५॥

मनुष्याला पुण्य करण्याची इच्छा नाही किन्तु पुण्याचे फल इष्ट आहे आणि पापाचे फल इष्ट नाही किन्तु पाप अवश्य करतात.

ऊर्धबाहुर्विरौम्येषः न च कश्चित् शृणोति मे।
धर्मेणार्थश्च कामश्च स किमर्थं न सेव्यते ॥११६॥

व्यासांनि म्हंटले आहे की - धर्माने पण काम आणि अर्थाची प्राप्ति आहे, त्याचे आचरण का नाही करत.

वेदान्ते जीवादीनां षण्णामनादित्वमङ्गीक्रियते। तदुक्तम् -

अनादिषट्कम् -

जीवः ईशः विशुद्धाचित्तथा जीवेशयोर्भिदा।
अविद्या तच्चितोर्योगः षडस्माकमनादयः॥११७॥

जीव, ईश्वर, शुद्ध चित्, जीव आणि ईशाचे भेद, अविद्या, चित् आणि अचिताचे योग हे सहा अनादि आहे यांचे अनादित्व प्रागभावाचे जसे आहे.

जीवः, ईश्वरः, शुद्धा चित्, जीवेशयोः भेदः, अविद्या, चिदविद्ययोः योगः इत्येते षट् अनादयः। एतेषामनादित्वं प्रागभाववत्। स च जीवः गुरूपसर्पणपूर्वकश्रवणमननिदिध्यासनैः स्वस्वरूपं प्राप्नोति। अतः

श्रवणमननिदिध्यासनानि दर्शनहेतवः इत्यभिधीयन्ते। तद्यथा -

जीव, ईश्वर, शुद्ध चित्, जीव आणि ईशाचे भेद, अविद्या, चित् आणि अचित् ताचे योग हे सहा अनादि आहे. इनका अनादित्व प्रागभावा जसे आहे. तो जीव गुरुच्या समीप जाऊन श्रवण, मनन, निदिध्यास करून स्व स्वरूपाला प्राप्त करत आहे. अतः श्रवण, मनन, निदिध्यास यांच्यात दर्शन हेतु असे म्हणले जाते आहे की -

दर्शनहेतवः -

श्रोतव्यः श्रुतिवाक्येभ्यः मन्तव्यश्चोपपत्तिभिः।
मत्वा च सततं ध्येयः एते दर्शनहेतवः ॥११८॥

तत्र श्रवणमननिदिध्यासनानां लक्षणमेवमुक्तम् -

श्रवणम् - वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यतावधारणानुकूला मानसी क्रिया।

मननम्- शब्दावधारितेऽर्थे मानान्तरविरोधशङ्कायां तन्निराकरणानुकूल-तर्कात्मज्ञानजनकः मानसः व्यापारः।

निदिध्यासनम् - अनादिदुर्वासनया विषयेष्वाकृष्यमाणचित्तस्य विषयेभ्यो-ऽपकृष्यात्मविषयकस्थैर्यानुकूलो मानसः व्यापारः।

श्रवणादिचे लक्षण या प्रकारे संगीतले आहे -

श्रवण - वेदान्ताचे अद्वितीय ब्रह्मामध्ये तात्पर्यता अवधारण अनुकूल मानसी क्रिया।

मनन - शब्दाने अवधारित अर्थ घेऊन अन्य मानाने विरोधाची शंका करून त्याचे निराकरणासाठी तर्करूप ज्ञानजनक मानस व्यापार।

निदिध्यासन - अनादिदुर्वासनाच्या कारण विषयांच्या प्रति आकर्षित होणारे चित्ताला विषयाने दूर करून आत्मविषयक स्थैर्यप्रदानरूप मानस व्यापार।

तदेवमुक्तं पञ्चदश्याम् -

ताभ्यां निर्विचिकित्सेऽर्थे चेतसः स्थापितस्य यत् ।

एकतानत्वमेतद्धि निदिध्यासनमुच्यते ॥११९॥

॥ पञ्चदशी १५४॥

श्रवणमननाभ्यां निर्गतसंशये विषये स्थापितस्य मनसः यत् एकाकारवृत्तिप्रवाहत्वं तत् निदिध्यासनमुच्यते। श्रवणादिना प्राप्ते ज्ञाने मोक्षः। स च मोक्षः आत्यन्तिकः प्रलयः इति कथ्यते। चतुर्विधप्रलयेषु नित्यनैमित्तिकप्राकृतात्यन्तिकेषु आत्यन्तिकप्रलयः अन्यतमः। प्रलयचतुष्टयं तु -

श्रवण आणि मननाने निर्गत संशय विषयामध्ये स्थापित मनाचे एकाकारवृत्तिप्रवाह आहे त्याला निदिध्यास म्हणतात. श्रवणादिने प्राप्त ज्ञान मोक्ष होते, आणि तो मोक्ष आत्यन्तिक प्रलय असे मानले जाते. नित्य, नैमित्तिक, प्राकृत आणि आत्यन्तिक प्रलयामध्ये हे चार प्रलयातिल आत्यन्तिक प्रलय अन्यतम आहे. चार प्रलय या प्रकारे आहे -

प्रलयः -

नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विजाः।

नित्यश्च सर्वभूतानाम् प्रलयोऽयं चतुर्विधः ॥१२०॥

तत्र नित्यः प्रलयः सुषुप्तिः। तस्याः सकलकार्यप्रलयरूपत्वात्। प्राकृतप्रलयः-

प्राकृतप्रलयस्तु कार्यब्रह्मविनाशनिमित्तकः सकलकार्यनाशः। कार्यब्रह्मा च प्रथमशरीरी हिरण्यगर्भः। अस्मिन् प्रलये यतः सर्वेषां भूतानां प्रकृतौ मायायां लयः सम्भवति अतः प्राकृतः प्रलयः इति कथ्यते। तदेवं निरूपितम् -

प्राकृतप्रलय कार्यब्रह्मविनाशनिमित्तक होत आहे. आणि सर्व कार्य नाशक आहे. कार्यब्रह्मा प्रथमशरीरी हिरण्यगर्भ होत आहे. या प्रलयामध्ये सभी जीवांचे प्रकृति मायामध्ये लय होऊन जातो. अतः याला प्राकृत प्रलय असे म्हणतात. त्याच कारणाने निरूपण करत आहे -

व्दिपरार्धे त्वतिकान्ते ब्रह्मणः परमेष्ठिनः।
तदा प्रकृतयः सप्त कल्प्यन्ते प्रलयाय हि॥
एष प्राकृतिको राजन् प्रलयो यत्र लीयते ॥१२१॥

ये च उपासनया प्राप्तहिरण्यगर्भलोकाः ते ब्रह्मणः ब्रह्माण्डाधिकाररूपप्रारब्धकर्मणः परिसमाप्तौ तेन सह मुच्यन्ते।

जो उपासनाच्या द्वारे हिरण्यगर्भ लोक प्राप्त आहे तो ब्रह्माच्या ब्रह्माण्डाधिकाररूप प्रारब्धकर्माची परिसमाप्तिच्या सोबत मुक्त होऊन जात आहे.

ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥१२२॥

नैमित्तिकप्रलयः -

कार्यब्रह्मणः दिवसावसाननिमित्तकः त्रैलोक्यमात्रप्रलयः नैमित्तिकप्रलयः। दिवसश्च 'चतुर्युगसहस्राणि ब्रह्मणः दिनमुच्यते' इति उक्तत्वात् चतुर्युगाणां सहस्रम्। अत्र पुराणवचनम् -

कार्यब्रह्माचे निद्राकाल नैमित्तिक होत असते. त्रैलोक्यमात्रप्रलय नैमित्तिक होते. चार युगांचे सहस्त्र हे ब्रह्माचे दिवस अर्थात् चतुर्युगसहस्त्र ब्रह्माचे एक दिवस होते. इथे पुराणाचे प्रमाण सांगतात -

एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक् ।
शेतेऽनन्तासने नित्यमात्मसात्कृत्य चाखिलम् ॥१२३॥

प्रलयः सृष्टिक्रमव्युत्क्रमेण भवति। तदेवमुक्तम् विष्णुपुराणे -

जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते।
तेजस्यापः प्रलीयन्ते तेजो वायौ प्रलीयते ॥१२४॥
वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते।
अव्यक्तं पुरुषे ब्रह्मन् निष्कले सम्प्रलीयते ॥१२५॥

जीवस्य बन्धे वा मोक्षे वा अन्तःकरणमेव कारणम् ।अन्तः विद्यमानम् इन्द्रियम् अन्तःकरणमिति कथ्यते। अन्तःकरणे चत्वारः विभागाः मनः बुद्धिः अहङ्कारः चित्तं चेति । संशयः निश्चयः गर्वः स्मरणम् एते क्रमशः तेषां विषयाः। तदुक्तम्

जीवाचे बन्धन या मोक्षामध्ये अन्तःकरण ही कारण आहे. अन्तः मध्ये विद्यमान इन्द्रिय अन्तःकरण होत आहे. अन्तःकरणामध्ये चार विभाग आहेत-मन, बुद्धि, अहंकार आणि चित्त, संशय, निश्चय, गर्व आणि स्मरण हे क्रमशः यांचे विषय आहेत.

अन्तःकरणम् -

मनोबुद्ध्यहङ्कारचित्तं करणमान्तरम् ।
संशयो निश्चयो गर्वः स्मरणं विषया इमे ॥१२६ ॥

अत्रार्थे अपरः श्लोकः -

निगद्यन्तेऽन्तःकरणं मनोधीरहङ्कृतिश्चित्तमिति स्ववृत्तिभिः ।
मनस्तु सङ्कल्पविकल्पनादिभिः बुद्धिः पदार्थाध्यवसायधर्मतः॥
अत्राभिमानादहमित्यहंकृतिः स्वार्थानुसन्धानगुणेन चित्तम् ॥१२७॥

॥ विवेकचूडामणिः - ९३,९४ ॥

जीवाचे बन्धन किंवा मोक्षामध्ये अन्तःकरण हे कारण आहे. अन्तामध्ये विद्यमान इन्द्रिय अन्तःकरण होते. अन्तःकरणामध्ये चार विभाग आहे - मन, बुद्धि, अहंकार आणि चित्त. संशय, निश्चय, गर्व आणि स्मरण हे क्रमशः त्यांचे विषय आहे.

तेषु जीवेषु प्राप्तज्ञानाः अत्रैव ब्रह्म समश्नुवन्ति । उपासकाः उत्तरायणमार्गेण हिरण्यगर्भलोकं गत्वा ब्रह्म प्राप्नुवन्ति। अन्ये च जीवाः दक्षिणायनमार्गगामिनः सन्तः पुनः पुनः आवर्तन्ते।

तत्र ब्रह्मप्राप्तिः एव पारमार्थिकममृतम् । स्वर्गादिषु अमृतत्वशब्दप्रयोगः आपेक्षिकः। तदुक्तम् -

त्या जीवामध्ये प्राप्त ज्ञान हेच ब्रह्माला प्राप्त करून घेतात, उपासक उत्तरायणमार्गाने हिरण्यगर्भ लोक जाऊन ब्रह्माला प्राप्त करत आहे अन्य जीव दक्षिणमार्ग गामी पुनः पुनः आवृत्त होत आहे.

ब्रह्मप्राप्ति हे पारमार्थिक अमृत आहे. स्वर्गादिमध्ये अमृतत्व शब्दाचे प्रयोग आपेक्षिक आहे. ते म्हणतात –

आभूतसम्प्लवं स्थानममृतत्वं हि भाष्यते।
त्रैलोक्यस्थितिकालोऽयमपुनार उच्यते ॥१२८॥

॥विष्णुपुराणम् - २।४।९७ ॥

प्रलयपर्यन्तमवस्थायि यत् स्थानं तदमृतम्। स्वगादिप्राप्त्यर्थं यत् कर्म क्रियते तद्यदि ईश्वरार्पणबुध्या क्रियते तर्हि चित्तशुद्धिः भवति। चित्ते शुद्धे कर्मसञ्चयस्य नाशः ज्ञानोत्पत्तिः च ततः मोक्षः। उक्तञ्च -

प्रलया पर्यन्त जे अवस्थायि स्थान आहे ते अमृत आहे. स्वर्गादि प्राप्तिसाथी जे कर्म केले जाते ते जर ईश्वरार्पण बुद्धिने केलेगेले तेंव्हा चित्तशुद्धि आहे. चित्तशुद्ध झाल्यावर कर्मसंचयाचे नाश होते हे ज्ञानोत्पत्ति होते. आणि मोक्ष प्राप्त होते. म्हणतात –

ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः।
यथादर्शतले प्रख्ये पश्यत्यात्मानमात्मनि ॥१२९ ॥

॥ म०भा० - १२।१९६ ॥८॥

मोक्षः च एवं निरूपितः -

मोक्ष या प्रकारे सांगितले आहे-

मोक्षः -

अनात्मनि च देहादावात्मबुद्धिस्तु देहिनाम्।
अविद्या तत्कृतो बन्धः तन्नाशे मोक्ष उच्यते ॥१३० ॥

इत्येवं निरूपितं अद्वैतवेदान्तसिद्धान्तः। अयं एकस्मिन् श्लोके एवं सङ्गृहीतः-

असा अद्वैतवेदन्ताने निरूपित केले आहे, याचे संग्रह एका श्लोका मध्ये झालेले आहे -

एकश्लोक्यद्वैतवेदान्तः -

ब्रह्मैकं परमार्थसत्तदितरन्मायामयत्वान्मृषा-
ब्रह्मैवैकमुपाधिबिम्बितमतो जीवेशभावं गतम्।
भ्रान्तिस्संसृतिरस्य तत्पशमन मुक्तिस्तदप्यात्मनः
ब्रह्मैक्यावगमाच्छ्रुतिश्रवणजादित्याहुरव्दैतिनः ॥१३१॥

अयं अद्वैतसिद्धान्तः रामाय हनुमता उक्ते श्लोके सुन्दरतया प्रतिबिम्बितं वर्तते -

हे अद्वैत सिद्धान्त हनुमानाने रामाला सांगितलेल्या श्लोकामध्ये सुंदर रीतिने प्रतिबिम्बित होते.

देहदृष्ट्या तु दासोऽहं जीवदृष्टया त्वदंशकः।
आत्मदृष्ट्या त्वमेवाहम् इति मे निश्चिता मतिः॥१३२॥

देहदृष्टिने मी दास आहे, जीवदृष्टिने अदंशक, आत्मदृष्टिने तर मी आणि तुम्ही एक आहे - हे माझ्या बुद्धिमध्ये निश्चित आहे.

तन्त्रसाधारणसिद्धान्ताः -

एतावता ग्रन्थसन्दर्भेण प्रधानदर्शनसम्बद्धाः काश्चन कारिकाः विचिन्तिताः। अस्मिन् विभागे प्रायः सर्वतन्त्रसाधारणसिद्धान्तसम्बद्धाः काश्चन कारिकाः प्रस्थाप्यन्ते। तत्रादौ दर्शनानां सङ्ग्राहकः श्लोकः -

आता पर्यन्त प्रधान दर्शना संबन्धी कारिका पहिली आहे. या भागामध्ये सर्वतन्त्रसाधारणसिद्धान्तसंबन्धी कारिकांची चर्चा केली जाईल. प्रथमतः इथे सभी दर्शनांचे संबंध संग्राहक श्लोक सांगितले आहे -

दर्शनानि-

कणादस्याक्षपादस्य व्यासस्य कपिलस्य च।
पतञ्जले जैमिनेश्च दर्शनानि षडेव हि ॥१३३॥
शैवं च वैष्णवं शाक्तं सौर वैनायक तथा।
स्कान्दं च भक्तिमार्गस्य दर्शनानि षडेव हि ॥१३४॥

कणादस्य वैशेषिकदर्शनं, (अक्षपादः - गौतमः) गौतमस्य न्यायदर्शनं, व्यासस्य उत्तरमीमांसादर्शनं, कपिलस्य सांख्यदर्शनं, पतञ्जलेः योगदर्शनं, जैमिनेः पूर्वमीमांसादर्शनं इति षट् आस्तिकदर्शनानि । शैवं वैष्णवं शाक्तं सौरं वैनायकं स्कान्दम् इति षट् भक्तिमार्गस्य दर्शनानि। (अत्र नास्तिकदर्शनानि नोक्तानि ।) दर्शनशब्दः शास्त्रार्थे रूढः इति उक्तम् । तत्र किं नाम शास्त्रं कि तस्य लक्षणमिति स्यादाशङ्का। तल्लक्षणमेवमुक्तम् -

कणाद मुनिनि वैशेषिक दर्शन, (अक्षपाद मुनि) गौतम मुनिनी न्याय दर्शन, व्यास मुनिनी उत्तरमीमांसा दर्शन, कपिल मुनिनी सांख्य दर्शन, पतंजलि मुनिनी योग दर्शन, जैमिनिनी पूर्वमीमांसा दर्शन प्रणीत केले. हे सहा आस्तिक दर्शन आहे. शैव, वैष्णव, शाक्त, सौर, वैनायक आणि स्कान्द हे सहा भक्तिमार्ग आहे. इथे नास्तिक दर्शन नाही सांगितलेले. दर्शन शब्द शास्त्र अर्थामध्ये रूढ आहे. शास्त्र अर्थात् काय आणि त्याचे लक्षण काय असि आशंका झाल्यावर ते म्हातात -

शास्त्रम् -

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।
पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते ॥१३५॥

यत् पुंसां नित्येन अनित्येन वा प्रवृत्तिं निवृत्तिं वा अवबोधयति तत् शास्त्रम्। कारिकान्तरम् -

ज्या पुरुषाची नित्य या अनित्य प्रवृत्ति अथवा निवृत्ति करते ते शास्त्र होते.

शासनात् शंसनात् शास्त्रं शास्त्रमित्यभिधीयते।
शासनं द्विविधं प्रोक्तं शास्त्रलक्षणवादिभिः ॥१३६॥

शास्त्रपदस्य अर्थद्वयं शासनं शंसनं चेति। शासनं द्विविधं प्रवृत्तिः निवृत्तिर्वा। शासनार्थे शास्त्रं क्रियाप्रेरकमतः पुरुषतन्त्रम्। शंसनार्थे शास्त्रं ज्ञानपरमतः वस्तुतन्त्रम् । यः सर्वशास्त्रज्ञः तस्य लक्षणमेवमुक्तम् -

शास्त्र पदाचे दोन अर्थ आहेत - शासन आणि शंसन। शासन द्विविध आहे- प्रवृत्ति अथवा निवृत्ति। शासन अर्थामध्ये शास्त्र क्रियाप्रेरक आहे अतः पुरुषतन्त्र आहे. शंसन अर्थामध्ये शास्त्र ज्ञानपर आहे, अतः वस्तुतन्त्र आहे. जो सर्व शास्त्रांचा ज्ञाता आहे त्याचे लक्षण या प्रकारे आहे -

सर्वशास्त्रज्ञः -

शमार्थं सर्वशास्त्राणि विहितानि महर्षिभिः।
स एव सर्वशास्त्रज्ञः यस्य शान्तं मनः सदा ॥१३७॥

प्रायः सर्वाण्यपि शास्त्राणि अनुबन्धचतुष्टयनिरूपणपुरस्सरम् आरभ्यन्ते । अनुबन्धचतुष्टयञ्च विषयः अधिकारी सम्बन्धः प्रयोजनं चेति। एतेषां ज्ञानं विना न कोऽपि ग्रन्थाध्ययने प्रवर्तते। तदुक्तम् -

प्रायः सर्व शास्त्र अनुबन्धचतुष्टय निरूपण पुरस्सर आरब्ध होत आहे. अनुबन्धचतुष्टय - विषय, अधिकारी, संबन्ध आणि प्रयोजन। यांचे ज्ञाना विना कोणते पण ग्रंथाचे अध्ययनामध्ये प्रवृत्त नाही होत.

अनुबन्धचतुष्टयम् -

विषयश्चाधिकारी च सम्बन्धश्च प्रयोजनम् ।

अनुबन्धं विना ग्रन्थे मङ्गलं नैव शस्यते ॥१३८॥

किमर्थम् अनुबन्धचतुष्टयं ग्रन्थादौ निरूपणीयमिति चेदेवमुक्तम् -

ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते ।

ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥१३९॥

मङ्गले त्रैविध्यम् -

प्रायः सर्वोऽपि अनुबन्धचतुष्टयं विज्ञाय एव शास्त्रग्रन्थाध्ययने प्रवर्तते। शास्त्रग्रन्थाश्च सामान्यतः मङ्गलेन आरभ्यन्ते। ग्रन्थानामादौ क्रियमाणं भगवत्स्मरणादिकं मङ्गलमिति प्रसिद्धम्। तच्च त्रिधा भवितुमर्हति । तद्यथा -

प्रायः सर्व अनुबन्धचतुष्टय जाणून पण शास्त्रामध्ये प्रवृत्त होत आहे. शास्त्र ग्रंथ सामान्यतः मंगलाने शुरु होते. ग्रंथाच्या आरम्भामध्ये भगवानाचे स्मरण इत्यादि मंगल नावाने प्रसिद्ध आहे. ते तीन प्रकारचे आहे. यथा -

आशीर्वादनमस्कारवस्तुनिर्देशभेदतः।।

मङ्गलं त्रिविधं प्रोक्तं शास्त्रादीनां मुखादिषु ॥१४०॥

आशीर्वादात्मकं नमस्कारात्मकं वस्तुनिर्देशात्मकम् इति मङ्गलं त्रिधा भवितुमर्हति। तत्र आशीर्वादात्मकं यथा-चम्पूरामायणस्य 'लक्ष्मीं तनोतु नितराम्'। नमस्कारात्मकं यथा-रघुवंशस्य 'वागर्थाविव सम्पृक्तौ'।

वस्तुनिर्देशात्मकं यथा - कुमारसम्भवस्य 'अस्त्युत्तरस्यां दिशि देवतात्मा'। शास्त्रग्रन्थेषु अनेके प्रकाराः सूत्रवार्तिकादयः प्रसिद्धाः। तेषां लक्षणानि एवं प्रदर्शितानि -

आशीर्वादात्मक, नमस्कारात्मक आणि वस्तुनिर्देशात्मक असे तीन प्रकारचे मंगल आहे. आशीर्वादात्मक - चम्पूरामायणमध्ये 'लक्ष्मीं तनोतु नितराम्'। नमस्कारात्मक यथा - रघुवंशामध्ये 'वागर्थाविव सम्पृक्तौ' । वस्तुनिर्देशात्मक यथा - कुमारसम्भवमध्ये 'अस्त्युत्तरस्यां दिशि देवतात्मा'।

सूत्रम् -

अल्पाक्षरमसन्दिग्धं सारवविश्वतोमुखम्।
अस्तोभमनवयं च सूत्रं सूत्रविदो विदुः ॥१४१॥

॥ विष्णुधर्मोत्तरपुराणम्॥

अक्षराणां अल्पता, सन्देहाभावत्वं, सारभूतत्वं, वक्तव्यसविषयव्यापित्वं, (स्तोभः निरर्थकमक्षरम्) अस्तोभं निरर्थकाक्षरराहित्यं, (अवद्यम् अर्थदोषः) अनवद्यम् अर्थदोषराहित्यम्, एते यत्र भवन्ति तत्सूत्रमिति कथ्यते। अत्रार्थे श्लोकान्तरम्

अक्षरांची अल्पता, सन्देहाचे अभाव, सारभूतत्व, वक्तव्यसविषयव्यापित्व (वक्तव्य विषयाचे व्यापक असे), (स्तोभ अर्थात् निरर्थक अक्षर) अस्तोभ निरर्थक अक्षरराहित्य, (अवद्य अर्थात् अर्थदोष) अनवद्य अर्थदोषराहित्य - हे सर्व लक्षण जिथे होत आहे, ते सूत्र होत आहे.

लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः ॥१४२॥

॥भामती॥

लघुत्वं च असन्दिग्धार्थवत्त्वम् ।

वार्तिकम् -

उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।

तं ग्रन्थं वार्तिकं प्राहुः वार्तिकज्ञाः विचक्षणाः ॥१४३॥

यत्र उक्तस्य अनुक्तस्य दुरुक्तस्य च चिन्ता प्रवर्तते तत् वार्तिकम् । यथा 'संयोगान्तस्य लोपः' इति सूत्रेण संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात् इति उक्तम्। तत्र अनुक्तमंशं योजयति 'यणः प्रतिषेधो वाच्यः' इति वाररुचं वाक्यम्। अतः इदं वार्तिकम्।

उक्त, अनुक्त आणि दुरुक्तची चिन्ता जिथे प्रवृत्त होते त्याला वार्तिक असे म्हणतात. यथा - 'संयोगान्तस्य लोपः' या सूत्रामध्ये संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात् असे म्हणाले जाते, तिथे अनुक्त अंशाला संगत आहे की - 'यणः प्रतिषेधो वाच्यः' यह वाररुच वाक्य। अतः हे वार्तिक आहे.

भाष्यम् -

सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः ।

स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥१४४॥

यत्र सूत्रानुसारिभिः पदैः सूत्रार्थः वर्ण्यते स्वेनोक्तपदानि च वर्ण्यन्ते तत् भाष्यम्। यथा महाभाष्यं व्याकरणस्य। अत्र 'अथ शब्दानुशासनम् ' इत्यादौ स्वेनोक्तपदानि वर्णितानि, 'वृद्धिरादैच् ' इत्यादौ सूत्रोक्तपदानि वर्णितानि इति अस्य भाष्यत्वम्। एतादृशभाष्यस्य ज्ञाता कः इति चेदुक्तम्-

जिथे सूत्रार्थ सूत्रानुसारी पदाने वर्णित केले जाते, आणि स्वोक्त पदांचे पण वर्णन किले जाते आहे. ते भाष्य आहे. यथा - 'अथ शब्दानुशासनम् ' इथे

स्वोक्त पद वर्णित आहे, 'वृद्धिरादैच् ' इत्यादिमध्ये सूत्रोक्त पदांचे वर्णन आहे, अतः याचे भाष्यत्व आहे, या प्रकारे भाष्यचे ज्ञाता कोण आहे? यावर ते म्हणतात -

भाष्यवित्तमः -

उत्तानार्थनिगूढार्थसंभृता भाष्यपङ्क्तयः।
प्रकृत्या यो विजानाति स वाच्यो भाष्यवित्तमः ॥१४५॥

उत्तानार्थः - विस्तृतार्थः । संभृताः - युक्ताः।

प्रकरणम् -

शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम्।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः ॥१४६॥

शास्त्रैकदेशेन सम्बद्धं तच्छास्त्रोपष्टम्भकविषयनिरूपकं वा ग्रन्थविशेषं प्रकरणमाहुः विपश्चितः। यथा वेदान्तशास्त्रस्य वेदान्तपरिभाषा ।

शास्त्राच्या एकदेशाने संबन्धित, त्या शास्त्राश्रित विषयाचे निरूपक ग्रन्थ प्रकरण होते. यथा - वेदान्तशास्त्राची वेदान्तपरिभाषा.

सङ्ग्रहः -

विस्तरेणोपदिष्टानामर्थानां तत्त्वसिद्धये।
समासेनाभिधानं यत् सङ्ग्रहं तं विदुर्बुधाः ॥१४७॥

यद्वा -

विस्तरेणोपदिष्टानामर्थानां सूत्रभाष्ययोः।
निबन्धो यः समासेन सङ्ग्रहं तं विदुर्बुधाः ॥१४८॥

व्याख्यानम् -

पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना।
आक्षेपश्च समाधानं व्याख्यानं षड़िवधं मतम् ॥१४९॥

यथा काशिकादयः ग्रन्थाः। षड् अंशाः व्याख्याने भवेयुः। पदविभागः, पदार्थानां कथनं, समासानां विग्रहप्रदर्शनं, वाक्यानां योजनम्, आक्षेपः, समाधानञ्चेति । यथा काशिकायां 'वृद्धिरादैच्' इत्यत्र । पदच्छेदः-वृद्धिः आदैच् । पदार्थोक्तिः-वृद्धिः संज्ञा, आत् दीर्घाकारात्, ऐच्-ऐ औ। विग्रहः-आत् च ऐत् च आदैच् । वाक्ययोजना-आदैच्-आ ऐ औ एते वृद्धिः-वृद्धिसंज्ञकाः स्युः। आक्षेपः-ननु अयं नियमः प्रसिद्धः यत् उद्देश्यमुक्त्वा ततः विधेयः वक्तव्यः इति? कथमत्र विधेयस्य बुद्धिः इति पदस्य प्राथम्यम्। समाधानम्-वृद्धः मङ्गलार्थकत्वात् तस्य प्राथम्येन प्रयोगः।

इत्येवं शास्त्रग्रन्थप्रकाराणां लक्षणम्। तत्र भाष्यग्रन्थाः सामान्यतः अनेकेषु अधिकरणेषु विभक्ताः भवन्ति। किं नामाधिकरणमिति चेदेवमुक्तम् -

यथा काशिकादि ग्रन्थामध्ये सहा अंश व्याख्यानामध्ये असले पाहिजे, पदविभाग, पदार्थविभाग, समासाचे विग्रहप्रदर्शन, वाक्याची योजना, आक्षेप आणि समाधान।

यथा काशिकामध्ये 'वृद्धिरादैच्' । पदच्छेद - वृद्धिः आदैच् । पदार्थोक्ति - वृद्धिः संज्ञा, आत् दीर्घ आकाराने परे, ऐच् - ऐ औ। विग्रह - आत् च ऐत् च आदैच् । वाक्ययोजना - आदैच् - आ ऐ औ हे वृद्धि - वृद्धिसंज्ञक आहे. आक्षेप - उद्देश्य म्हणून विधेय म्हणणे पाहिजे असा नियम आहे? कसे विधेय बुद्धिः या पदाची प्राथम्य। समाधान - वृद्धिचे मङ्गलार्थकत्व आहे अतः त्याचे प्राथम्याने प्रयोग केला आहे.

अधिकरणम् -

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।
सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं विदुः ॥१५०॥

यथा ब्रह्मसूत्रस्य जन्माद्यधिकरणम्। अत्र यतो वा इमानि भूतानि जायन्ते' इत्यादिवाक्यानि विषयः। तत्किं ब्रह्मणः लक्षणं वा न वा इति विशयः (संशयः) । तत्र पूर्वपक्षे ब्रह्मस्वरूपासिद्धया मुत्त्यसिद्धिः फलम् । सिद्धान्ते ब्रह्मस्वरूपसिद्ध्या मुक्तिसिद्धिः फलम्। जिज्ञासाधिकरणे उक्तब्रह्मणः लक्षणं नास्तीति आक्षेपे आक्षेपसङ्गत्या अधिकरणस्य उत्थानम्। एवं श्रुत्यर्थनिरूपणार्थं प्रवृत्तत्वात् श्रुतिसङ्गतिः, ब्रह्मलक्षणनिरूपकत्वात् शास्त्रसङ्गतिः, श्रुतेः ब्रह्मणि समन्वयोक्तेः अध्यायसङ्गतिः, स्पष्टब्रह्मलिङ्गकवेदान्तवाक्यस्य ब्रह्मणि समन्वयस्य कथनात् पादसङ्गतिश्च बोध्या। शास्त्रेषु अनेकानां लक्षणानि निरुच्यन्ते। तैः लक्षणैः लोकसिद्धविषयस्य सुष्ठ निरूपणमेव कर्तव्यं न तु लोकसिद्धस्य निराकरणम्। तदुक्तम् -

यथा ब्रह्मसूत्राचा जन्माद्यधिकरण। इथे - अतो वा इमानि भूतानि जायन्ते - इत्यादि वाक्य विषय आहे. काय हे ब्रह्माचे लक्षण आहे या नाही हा विषय अर्थात् संशय आहे. पूर्वपक्षामध्ये ब्रह्मस्वरूप असिद्ध असल्याच्या मुक्तिचा अभाव फल आहे. सिद्धान्तपक्षामध्ये ब्रह्मस्वरूप सिद्ध असल्याचे मुक्ति हे फल आहे. जिज्ञासाधिकरणामध्ये उक्त ब्रह्माचे लक्षण नाही असा आक्षेप करून आक्षेप संगतिने अधिकरणाचे उत्थान केले आहे या प्रकारे श्रुतिचे निरूपणासाठी प्रवृत्त झाल्याने श्रुतिसंगति, ब्रह्मलक्षणाचे निरूपण केल्याने शास्त्रसंगति, श्रुतिचे ब्रह्माशी समन्वय बोलल्याने अध्यायसंगति,

स्पष्टब्रह्मलिंगक वेदान्तवाक्याचे ब्रह्माशी समन्वय बोलल्याने पादसंगति असे जानने पाहिजे.

लक्षणानामवधिः -

सिद्धानुगममात्रं हि कर्तुं युक्त परीक्षकैः।

न लोकत्रयसिद्धस्य लक्षणेन निवर्तनम् ॥१५१॥

॥श्लोकवार्तिकम् - १३३॥

शास्त्रग्रन्थेषु कदाचित् एकस्मिन् विषये पूर्वपक्षसिद्धान्तयोः समानः दोषः भवति । तत्र न एकः दोषभाक्त्वेन निर्देष्टुं शक्यः। तदुक्तम् -

शास्त्रग्रन्थामध्ये कदाचित् एकाच विषयामध्ये पूर्वपक्ष आणि सिद्धान्त यांच्यात समान दोष होतात, तेंव्हा केवल एकच दोषभागी आहे. असे नाही म्हणू शकत -

दोषस्योभयसामान्यत्वम् -

यत्रोभयोः समो दोषः परिहारोऽपि तादृशः।

नैकः परिनियुक्तव्यः तादृगर्थविचारणे ॥१५२॥

॥ भगवद्गीता - १३ ॥२॥

तत्रोदाहरणं यथा गीतायां द्वैतिनामाक्षेपस्य खण्डनावसरे -

'अथ अनित्यत्वादिदोषपरिहाराय बन्धमुक्तावस्थाभेदः न कल्प्यते अतो द्वैतिनामपि शास्त्रानर्थक्यदोषः अपरिहार्यः एव इति समानत्वात् न अद्वैतवादिना परिहर्तव्यः दोषः।'

शास्त्रग्रन्थेषु पूर्वोत्तराधिकरणादीनां सम्बन्धः सङ्गतिः इति कथ्यते। यत् यदनन्तरं निरूप्यं भवति तत् तेन सङ्गतं भवेत्। ग्रन्थादेः असङ्गतत्त्वज्ञानेन

उन्मत्तप्रलापितत्त्वाशङ्का उत्पद्येत । सङ्गतत्वज्ञानेन च तन्निवृत्तिः भवति । येन च ग्रन्थानां विषये प्रमाणबुद्धिः स्यात्। तदेव सङ्गतेः प्रयोजनम्। अतः उक्तम् अभियुक्तैः 'नासङ्गतं प्रयुञ्जीत' इति । तत्र नैयायिकैः तावत् सङ्गतयः षट्संख्याकाः उक्ताः –

यथा - भगवद्गीतेमध्ये द्वैतीयाच्या आक्षेपाचे खण्डन करण्यावेळी - नित्यत्वादि दोषाचे परिहार करण्याहेतु बन्धमुक्तावस्थाचे भेद नाही मानत, अतः द्वैतियांच्या पक्षामध्ये पण शास्त्र आनर्थक्य दोष आहे - असि समानता राहण्या कारणाने अद्वैतवादीनि दोषाचे परिहार नाही केले पाहिजे.

शास्त्रामध्ये पूर्वोत्तर अधिकरणादिचे संबंध संगति असे म्हणतात. जो ज्याच्या नंतर निरूपित होत आहे, तो त्याच्या संगत होत आहे, असंगत तत्वज्ञानाने ग्रन्थादिची उन्मत्त, प्रलापितत्व आशंका उत्पन्न होऊ शकते. संगतत्व ज्ञानाची निवृत्ति होती. ज्याने ग्रन्थांच्या विषयामध्ये प्रमानाबुद्धि होईल. ते संगतिचे प्रयोजन आहे. त्यामुळे अभियुक्ताने बोलले आहे की - नासङ्गतं प्रयुञ्जीत। नैयायिकानि सह प्रकारची संगति सांगितले आहे.

सङ्गतिः -

सप्रसङ्ग उपोद्घातः हेतुतावसरस्तथा।
निर्वाहकैक्यकार्यैक्ये षोढा साङ्गतिरिष्यते ॥१५३॥

प्रसङ्गसङ्गतिः - उपोद्घातादिभिन्नस्मरणप्रयोजकसम्बन्धः प्रसङ्गः। यद्वा स्मृतस्य उपेक्षानहत्वम्। अर्थात् विषयस्यैकस्य कथनकाले स्मृतस्य विषयान्तरस्य कथनं प्रसङ्गसङ्गत्या।।

उपोद्घातसङ्गतिः - प्रकृतोपसाधकत्वम्। प्रकृतस्य विषयस्य उपष्टम्भकत्वेन यन्निरूप्यते तत् उपोद्घातसङ्गत्या। तदुक्तं सर्वदर्शनसङ्ग्रहे - चिन्तां

प्रकृतसिध्यर्थामुपोद्धातं विदुर्बुधाः॥ यथा प्रमाकरणे प्रमाणे निरूपणीये सति उपोद्धातसङ्गत्या करणनिरूपणम्।

हेतुतासङ्गतिः - हेतुता इत्यस्य कारणता इत्यर्थः। यथा प्रत्यक्षनिरूपणानन्तरमनुमाननिरूपणम्।

अवसरसङ्गतिः - प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्तौ सत्याम् अवश्यवक्तव्यत्वम्। यथा प्रत्यक्षनिरूपणानन्तरं तत्कार्यत्वेन अनुमानोपमानयोः उभयोः निरूपणप्राप्तौ बहुवादिसम्मतत्वेन प्रथमम् अनुमाने जिज्ञासोदयेन अनुमाननिरूपणेन प्रतिबन्धकजिज्ञासानिवृत्तौ अवसरसङ्गत्या उपमाननिरूपणम्।

निर्वाहकैक्यसङ्गतिः - यत्रैकेन कारणेन कार्यद्वयं तदधिकसंख्याकं वा कार्यमुत्पद्यते तत्र निर्वाहकैक्यसङ्गतिः ज्ञेया। यथा प्रत्यक्षानन्तरं परामर्शानुमित्योः निरूपणम्।

कार्यैक्यसङ्गतिः - एककार्यानुकूलत्वम्। एकं कार्यमुद्दिश्य अनेकेषां कारणानां निरूपणं कार्यैक्यसङ्गत्या। यथा अनुमितिरूपं कार्यमुद्दिश्य व्याप्तिपक्षधर्मतयोः निरूपणम्।

वेदान्तिनस्तु आक्षेपसङ्गतिः दृष्टान्तसङ्गतिः इत्यादि सङ्गतीः अपि अङ्गीकुर्वन्ति।

प्रसंगसंगति -

उपोद्धातादिने भिन्न स्मरण प्रयोजक संबंध प्रसंग होत आहे. अथवा स्मृताचे उपेक्षा अनर्हत्व प्रसंग होते, अथवा एक विषयाचे कथनकालामध्ये स्मृत अन्य विषयाचे कथन प्रसंगसंगति आहे.

उपोद्घातसंगति -

प्रकृतिचे उपसाधक। प्रकृत विषयाच्या आधाराने ज्याचे निरूपण होत आहे तो उपोद्घातसंगति। सर्वदर्शन संग्रहामध्ये सांगितले आहे - प्रकृताच्या सिद्धिसाठी केली गेलेली चिन्तेला बुधजन उपोद्घातसंगति म्हणतात. यथा - प्रमाचे निरूपण संदर्भामध्ये उपोद्घातसंगतिने कारण निरूपण।

हेतुतासंगति -

हेतुता अर्थात् कारणता। यथा - प्रत्यक्षाच्या निरूपणा नंतर अनुमानाचे निरूपण।

अवसरसंगति -

प्रतिबन्धकीभूत शिष्यजिज्ञासाची निवृत्ति झाल्यावर अवश्य वक्तव्यत्व। यथा - प्रत्यक्ष निरूपणा नंतर पश्चात् अनुमान आणि उपमान दोघांचे निरूपण प्राप्त राहून बहुवादि सम्मतिने पहले अनुमानामध्ये जिज्ञासा करून अनुमान निरूपणाने प्रतिबंधक जिज्ञासा निवृत्ति झाल्यावर अवसरसंगतिने उपमानाचे निरूपण करने.

निर्वाहकैक्यसंगति -

जिथे एका कारणाने दोन अथवा अधिक कार्याची उत्पत्ति होते, तिथे निर्वाहकैक्यसंगति होत आहे. यथा - प्रत्यक्षा नंतर बाद परामर्श आणि अनुमितिचे निरूपण।

कार्यैक्यसंगति -

एककार्यानुकूलत्व। एक कार्यला उद्देश्य करून अनेक कारणाचे निरूपण कार्यैक्यसंगतिने होत आहे, यथा - अनुमिति रूप कार्याला उद्देश करून व्याप्ति आणि पक्षधर्मताचे निरूपण।

वेदान्ती आक्षेपसंगति आणि दृष्टान्तसंगतिचे पण अंगीकार करत आहे.

प्रमाणानि -

प्रमेयज्ञानं प्रमाणात् भवति। तत्र शास्त्रग्रन्थेषु प्रमाणानि प्रत्यक्षानुमानोपमानागमार्थापत्त्यनुपलब्धिसम्भवैतिह्याख्यनि अष्ट अङ्गीकृतानि । तत्र के दार्शनिकाः किं प्रमाणमङ्गीकुर्वन्तीति सङ्ग्रहीतमेतासु कारिकासु।

प्रमेयज्ञान प्रमाणाने होत आहे, शास्त्र ग्रंथामध्ये आठ प्रमाण स्वीकृत आहे - प्रत्यक्ष, अनुमान, उपमान, आगम, अर्थापत्ति, अनुपलब्धि, संभव, ऐतिह्य।

प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः।
अनुमानञ्च तच्चाथ सांख्याः शब्दश्च ते अपि ॥१५४॥
न्यायैकदेशिनोप्येवम् उपमानञ्च केचन।
अर्थापत्या सहैतानि चत्वार्याह प्रभाकरः॥१५५॥
अभावषष्ठान्येतानि भाट्टवेदान्तिनस्तथा।
सम्भवैतिह्ययुक्तानि तानि पौराणिकाः जगुः ॥१५६॥

मानसोल्लासः - २।१७,१८,१९॥

तत्र प्रत्यक्षादीनि चत्वारि प्रसिद्धानि। अर्थापत्त्यादीनां लक्षणेमेवं विद्यते।

अर्थापत्तिः -

दृष्टार्थस्यानुपपत्त्या तु कस्याप्यर्थस्य कल्पना।
क्रियते यद्बलेनासाववत्तिरुदाहृता ॥१५७॥

यथा दिवा अभुञ्जानस्य देवदत्तस्य पीनत्वं रात्रिभोजनेन विना अनुपपन्नम्

इति रात्रिभोजनकल्पनम्। अनुपलब्धिः

प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते।
वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता॥१५८॥

॥ श्लोकवार्तिकम्॥

प्रमाणपञ्चकाभावः अभावानुभवासाधारणं कारणं अनुपलब्धिः। यथा भूतले घटाभावः अनुपलब्धिगम्यः।

सम्भवः - अविनाभाविनोरर्थयोः एकस्य सत्ताग्रहणात् अन्यस्य सत्ताग्रहणम्। यथा सहस्रमस्ति इति कथिते शतमपि अस्ति इति ज्ञानम्। यथा सूर्यवंशचन्द्रवंशयोः वर्णनदर्शनात् रामकृष्णयोः अवतारनिश्चयः।

ऐतिह्यम् - अनिर्दिष्टप्रवक्तृकात् प्रवादपारम्पर्यात् जायमानं ज्ञानम्। अर्थात् जनश्रुत्या उत्पन्नं प्रमाणज्ञानम् । यथा स्तम्भे पिशाचः। ज्ञानं द्विविधं यथार्थम् अयथार्थं चेति। अत्र प्रश्नद्वयमुदेति । प्रमात्मकभ्रमात्मकज्ञानयोः उत्पत्तेः कारणं किम्? उत्पन्नं ज्ञानं प्रमा वा भ्रमः वा इति निर्णयः कथम्? इति। विषयेऽस्मिन् दार्शनिकाः विप्रतिपद्यन्ते । तत्र प्रथमा जिज्ञासा प्रामाण्यस्य उत्पत्तिवाद इति द्वितीयाजिज्ञासा प्रामाण्यस्य ज्ञप्तिवाद इति कथ्यते। ज्ञानस्य उत्पत्तौ इन्द्रियालोकादयः सामान्यसामग्रयः। भ्रमप्रमयोः उत्पत्तौ ज्ञानसामान्यसामग्रीभिन्नाः सामग्रयः अपेक्षिताः उत न इति प्रश्नः उत्पतौ स्वतस्त्वं परतस्त्वं चेति पक्षद्वयं व्यवस्थापयति । एवमुत्पन्ने ज्ञाने प्रमात्वं स्वतः गृह्यते उत अनुमानेन गृह्यते इति प्रश्नः ज्ञप्तौ स्वतस्त्वं परतस्त्वं वा नियमयति। एतद्विषयकमतभेदः एवं सङ्गृहीतः तार्किकरक्षायाम् -

पंचप्रमाणाचे अभाव, अभाव अनुभवाचे असाधारण कारण अनुपलब्धि

आहे. यथा भूतलावर घटाचे अभाव अनुपलब्धिने गम्यमान आहे.

संभव - अविनाभाव अर्थामध्ये एकाची सत्ताने अन्याची सत्तेचे ग्रहण। यथा - सहस्र वालेमध्ये असे बोलल्याने शत पण आहे असे ज्ञान। यथा - सूर्यवंशी, चन्द्रवंशीचे वर्णाला पाहून क्रमशः राम आणि कृष्णाच्या अवताराचे निश्चय।

ऐतिह्य - अनिर्दिष्ट प्रवक्ताने प्रवाद परम्परेने झालेले ज्ञान। अर्थात् जनश्रुतिने उत्पन्न प्रमाणज्ञान। यथा - स्तंभ में पिशाच।

ज्ञान द्विविध आहे - यथार्थ आणि अयथार्थ। दोन प्रश्न होत आहे. प्रमात्मक आणि भ्रमात्मक ज्ञानाची उत्पत्तिमध्ये काय कारण आहे. उत्पन्न ज्ञान प्रमा आहे भ्रम याचे निर्णय कसे होईल? या विषयामध्ये दार्शनिकांची विप्रतिपत्ति आहे. प्रथम जिज्ञासा प्रामाण्याचे उत्पत्तिवाद आणि द्वितीय जिज्ञासा प्रामाण्याचे ज्ञप्तिवाद असे बोलले आहे - ज्ञानाचे उत्पत्तिमध्ये इन्द्रियालोकादि सामान्य सामग्री आहे. भ्रम आणि प्रमाची उत्पत्तिमध्ये स्वतस्त्व आणि परतस्त्व हे दोन पक्ष व्यवस्थापित केले आहे. या प्रकारे उत्पन्न ज्ञानामध्ये प्रमात्व स्वतः गृहीत आहे अथवा अनुमानाने गृहीत आहे, हे प्रश्न ज्ञप्तिमध्ये स्वतस्त्व अथवा परतस्त्वाचे नियामक आहे. या विषयाचे मतभेद या प्रकारे तार्किकरक्षामध्ये संगृहीत आहे –

प्रामाण्यवादः -

प्रमाणत्वाप्रमाणत्वे स्वतः सांख्याः समाश्रिताः।

नैयायिकास्ते परतः सौगताश्चरमं स्वतः॥१५९॥

प्रथमं चरमं प्राहुः प्रामाण्यं वेदवादिनः।

प्रमाणत्वं स्वतः प्राहुः परतश्चाप्रमाणताम् ॥१६०॥

अत्र प्रमाणशब्दः प्रमीयते इति प्रमाणम् इति भावव्युत्पत्या प्रमार्थे रूढः।

अतः प्रमाणानां प्रामाण्यमित्यस्य प्रमाणां प्रामाण्यमित्यर्थः। यथार्थानुभवनिष्ठः धर्मविशेषः प्रमाणत्वम्। अयथार्थानुभवनिष्ठः धर्मविशेषः अप्रमाणत्वम्। तत्र प्रमाणत्वाप्रमाणत्वयोः द्वयोरपि स्वतस्त्वमिति सांख्यमतम्। द्वयोरपि परतस्त्वम् इति नैयायिकमतम्। प्रमाणत्वस्य परतस्त्वम् अप्रमाणत्वस्य तु स्वतस्त्वमिति बौद्धमतम् । प्रमाणत्वस्य स्वतस्त्वम् अप्रमाणत्वस्य परतस्त्वम् इति मीमांसकानां वेदान्तिनां च मतम्।

अत्र तार्किकाणां वेदान्तिनां च मतं प्रदर्श्यते । तत्रादौं तार्किकमतं निरूप्यते। स्वतःप्रामाण्यमित्यस्य कः अर्थः। १ ज्ञानगतः प्रामाण्यरूपः धर्मः किं स्वयमेव स्वस्मादेव उत्पद्यते? २ स्वाश्रयीभूतात् ज्ञानात् उत्पद्यते? ३ स्वाश्रयीभूतज्ञानकारणात् उत्पद्यते? ४ ज्ञानस्य यानि साधारणानि कारणानि इन्द्रियप्रकाशादीनि तस्मात् उत्पन्नः यः ज्ञानविशेषः तदाश्रितत्वं प्रमाणत्वस्य वा? ५ ज्ञानस्य यानि साधारणानि कारणानि तन्मात्रादुत्पन्नः यः ज्ञानविशेपः तदाश्रितत्वं वा? इति पञ्च पक्षाः।

तत्र न प्रथमः। न स्वस्य स्वमेव कारणं भवति । यथा घटे कार्यत्वं स्वस्य कारणत्वं द्वयमपि न युज्यते तद्वत् अत्रापि प्रामाण्यं प्रामाण्यादेव उत्पद्यते इति वक्तुं न शक्यते आत्माश्रयदोषसम्भवात्। न द्वितीयः। समवायिकारणत्वं द्रव्यस्य एव न गुणादीनाम्। यथा तन्तुः पटस्य समवायिकारणम्। ज्ञानं तु आत्मनः गुणः इत्यतः न तस्य समवायिकारणत्वं सम्भवति। नापि तृतीयः। प्रामाण्यं प्रमाणभूतानेकज्ञानवृत्तिः सर्वानुगतः धर्मविशेषः। अर्थात् सामान्यम्। सामान्यस्य च नित्यत्वात् न तस्य उत्पत्तिः

सम्भवति। नापि चतुर्थः। शुक्तौ काचादिदोषदूषितलोचनस्य इदं रजतमिति अयथार्थज्ञानमुत्पद्यते। इदं ज्ञानं सामान्यसामग्रीभिः इन्द्रियप्रकाशादिभिः जन्यं भवत्येव । यद्यपि भ्रमज्ञाने दुष्टानि इन्द्रियाणि कारणानि तथापि तानि इन्द्रियत्वं न परित्यजन्ति इत्यतः ज्ञानसामान्यसामग्रीजन्यत्वम् अस्ति एव। यथा वृक्षस्य सामान्यकारणं मृज्ज लादिसहकृतः बीजविशेषः। वृक्षविशेषस्य शिंशिपायाः अपि कारणं तादृशः एव बीजविशेषः। स च बीजं न बीजत्वं जहाति तथा अत्रापि। अतः अयथार्थज्ञानम् अपि ज्ञानसामान्यसामग्रीजन्यज्ञानविशेषः तदाश्रितं च अप्रामाण्यमिति प्रामाण्यलक्षणस्य तत्र अतिव्याप्तिः। यद्यपि अयथार्थज्ञानं ज्ञानसामान्यसामग्रीजन्यं तथापि दोषरूपमधिकं कारणमस्तीत्यतः ज्ञानसामान्यसामग्रीमात्रजन्यत्वं नास्ति इति विचिन्त्य पञ्चमपक्षस्य उत्थितिः। न सोऽपि पक्षः इष्टसाधनाय अलम्। दोषा भावसहकृतज्ञानसामान्यसामग्रीजन्यत्वमेव ज्ञानसामान्यसामग्रीमात्रजन्यत्वं वा उत दोषा भावासहकृतज्ञानसामान्यसामग्रीजन्यत्वं ज्ञानसामान्य-सामग्रीमात्रजन्यत्वं वा? नाद्यः दोषाभावसहकृतज्ञानसामान्य-सामग्रीग्राह्यत्वमेव परतः प्रामाण्यमिति परतः प्रामाण्यवादिभिः अङ्गीकृतत्वात्। नापि द्वितीयः। दोषाभावे यथार्थज्ञानोत्पत्तिः, अभावे च न इति अन्वयव्यतिरेकाभ्यां दोषाभावस्य कारणतायाः सिद्धत्वात्। अथ अभावस्य निःस्वरूपत्वात् कारणमेव न अभावस्य इति उच्येत तत्तु अयुक्तं स्यात् । घटप्रध्वंसाभावरूपकार्यमङ्गीक्रियते किमर्थम् अभावस्य कारणत्वं नेति उभयतः पाशारज्जुः।

अतः पञ्चभिः प्रकारैः अपि स्वतःप्रामाण्यस्य निर्वक्तुमशक्यत्वात् परतःप्रामाण्यमङ्गीकर्तव्यम्। तत्र उत्पत्तौ परतस्त्वं दोषा भावादिरूपसामग्रयन्तरसद्भावात्। ज्ञप्तौ परतस्त्वं अनुमानतः। 'प्रमात्वं न स्वतोग्राह्यं संशयानुपपत्तितः'। यदि स्वतः एव स्यात् प्रामाण्यं मन्दप्रकाशे दृश्यमानस्तम्भादिषु स्तम्भः वा पुरुषः वा इति न स्यात् संशयः। यतः ज्ञाने ज्ञाते प्रामाण्यं ज्ञातमेवेति न संशयः। यदि ज्ञानं न स्यात् न ज्ञातं तदापि धर्मिज्ञानाभावात् इति संशयाभावः। तस्मात् ज्ञाने प्रामाण्यमनुमेयम्। तत्प्रकारश्च इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वात् इति रीत्या प्रामाण्यसिद्धिः इदं ज्ञानमप्रमा विसंवादिप्रवृत्तिजनकत्वात् इति रीत्या अप्रामाण्यसिद्धिः। (विसंवादिप्रवृत्तिः - तदर्थिनः तदप्राप्तिफलकप्रवृत्तिः अर्थात् निष्फलप्रवृत्तिः।) एवं स्वतःप्रामाण्यवादः पूतिकूष्माण्डायमानः इति प्राप्ते आह विज्ञानसामान्यसामग्रीजन्यत्वे सति तदतिरिक्तहेत्वजन्यत्वं प्रमायाः स्वतस्त्वमिति निरुक्तेः सम्भवात्। न दोषाभावरूपस्य गुणस्य हेतुत्वम्। दोषस्तु प्रमाप्रतिवन्धकः। यथा घटं प्रति नियतपूर्ववृत्त्यपि दण्डत्वं दण्डरूपं च न दण्डकारणमुच्यते। तस्य तु दण्डद्वारा कारणत्वात् अन्यथासिद्धत्वम् अङ्गीक्रियते। तथा प्रमाज्ञानं प्रति नियतपूर्ववृत्तिरपि दोषा भावः न प्रमाज्ञानकारणम। प्रमाज्ञानस्थले नियतपूर्ववत्तिना दोषाभावेन अप्रमाज्ञानस्य प्रतिबन्धः कृतः इत्येव न तु तस्य प्रमाज्ञानोत्पत्तौ कश्चन व्यापारः इति दोषाभावस्य प्रमाज्ञानं प्रति न कारणत्वं किं तु अन्यथासिद्धत्वम्। एवं उत्पतौ स्वतस्त्वम्। ज्ञाने स्वतोग्राह्यत्वं च दोषाभावे सति यावत्स्वाश्रयग्राहकसामग्रीग्राह्यत्वम्। स्वाश्रयः वृत्तिज्ञानं तग्द्राहकं

साक्षिज्ञानं तेन वृत्तिज्ञाने गृह्यमाणे तद्गतं प्रामाण्यमपि गृह्यते। अप्रामाण्यम् न स्वतोग्राह्यम्। यतः अप्रामाण्यं न ज्ञानसामान्यसामग्रीप्रयोज्यम्। किन्तु दोषरूपातिरिक्तसामाग्रीसापेक्षम्। तदभाववति तत्प्रकारकज्ञानत्वं भ्रमत्वमिति लक्षणस्य निरुक्तत्वात् तदभाववत्वविषये वृत्तेः अनुदयात् तस्य साक्षिज्ञानत्वाभावः। अतः अप्रामाण्यज्ञानं न स्वतः। किन्तु अनुमानेन। अनुमानप्रकारश्च मम प्राथमिकं रजतज्ञानम् अप्रमा विसंवादिप्रवृत्तिजनकत्वात् रज्जुसर्पवत् इति।

प्रमाण शब्द प्रमीयते (प्रमाण केले जात आहे) असि भावव्युत्पत्तिमध्ये रूढ आहे. अतः प्रमाणाचे प्रामाण्य अर्थात् प्रमांचे प्रामाण्य असा अर्थ आहे. यथार्थानुभवनिष्ठ धर्मविशेष अप्रमाणत्व आहे. प्रमाणत्व अप्रमाणत्व दोघांचे ही स्वतस्त्व आहे असा सांख्याचे मत आहे. दोघांचे परतस्त्व आहे. असा नैयायिकमत आहे. प्रमाणत्वाचे परतस्त्व आणि अप्रमाणत्वाचे स्वतस्त्व हे बौद्ध मानत आहे. वदान्ती आणि मीमांसक प्रमाणत्वाचे स्वतस्त्व आणि अप्रमाणत्वाचे परतस्त्व समर्थित करत आहे.

इथे तार्किक आणि वेदांती यांचे मत सांगितले जात आहे. प्रथमतः तार्किकमताचे निरूपण केले जात आहे. स्वतःप्रामाण्य याचे काय अर्थ आहे? स्वाश्रय भूत ज्ञानाने उत्पन्न होत आहे? स्वाश्रय भूत ज्ञानाच्या कारणाने उत्पन्न होत आहे? ज्ञान जे साधारण कारण आहे, इंद्रिय प्रकाश आदि त्याने उत्पन्न जे ज्ञान विशेष आहे त्याचा आश्रितत्व प्रमाणत्वाचे आहे काय? ज्ञानाचे जे साधारण कारण आहे त्यांच्या मात्राने उत्पन्न अदनान विशेष तदाश्रितत्व आहे काय? असे पाच पक्ष आहे.

प्रथम कारण नाही होऊ सकत. स्वयं ही स्वयांचे कारण नाही होत. ज्या प्रकारे घटामध्ये स्वतःचे कार्यत्व अथवा आणि कारणत्व नाही होत त्याच प्रकारे प्रामाण्याने प्रामाण्याची उत्पत्ति असे नाही बोलू शकत, असे बोलल्याने आत्माश्रय दोषाचे संभव आहे. दूसरे पण कारण नाही होऊ

सकत. समवायी कारण द्रव्यांचे ही होत आहे, ना कि गुणाचे. ज्या प्रकारे तंतु वस्त्राचे समयवायी कारण होत आहे. ज्ञान आत्म्याचे गुण आहे अतः त्याचे समवायी कारणत्व संभव नाही. तृतीयपण नाही होऊ सकत. प्रामाण्य हे प्रमाणभूत अनेक ज्ञानवृत्ति, सर्वानुगत धर्मविशेष आहे. अर्थात् सामान्य। सामान्याच्या नित्य झाल्याने त्याची उत्पत्ति संभव नाही होत. चतुर्थ पण नाही होत. शुक्तिमध्ये कांच आदि दोषाने दूषित नेत्राचे हे रजत आहे या प्रकाराचे अयथार्थ ज्ञान उत्पन्न होत आहे. हे ज्ञान सामान्य सामग्रीने इन्द्रियप्रकाशादिने जनित होत आहे. यद्यपि भ्रमज्ञानामध्ये दुष्ट इन्द्रिय कारण आहे. तथापि तो इन्द्रिय त्यागत नाही. अतः ज्ञानसामान्यसामग्रीजन्यत्व आहे. यथा वृक्षाचे सामान्य कारण मृत्तिका, जल इत्यादिने युक्त बीजविशेष आहे. वृक्षविशेष शिंशपल्याचे पण तेच बीज कारण आहे. तो बीज बीजत्वाचे त्याग नाही करत त्याच प्रकारे ईथे पण. अतः अयथार्थ ज्ञानपण ज्ञानसामान्यसामग्रीजन्यज्ञानविशेष आणि त्याच्यावर आश्रित अप्रामाण्य प्रामाण्य लक्षणाची अतिव्याप्ति. यद्यपि अयथार्थ ज्ञान ज्ञानसामान्यसामग्रीजन्य आहे तथापि दोषरूप अधिक कारण आहे. अतः ज्ञानसामान्यसामग्रीजन्यत्व नाही हा विचारकरून पाचवा पक्ष उत्थापित करत आहे. तो पण इष्टसिद्धिसाठी पर्याप्त नाही.

म्हणून पाच प्रकाराने स्वतःप्रामण्याच्या न बोलल्याने दुसऱ्याच्या प्रामाण्याचे स्वीकार करावा. उत्पत्तिमध्ये परतत्व म्हणजे दोषाभावरूप करणात अंतर्भाव होतो. परतस्त्व ज्ञप्तिमध्ये परतस्त्व अनुमानाने. प्रमात्व स्वताःने ग्राह्य आहे संशय - अनुपपत्तिचे कारण. यदि स्वतः होईल तेंव्हा मन्दप्रकाशामध्ये स्तंभाला पाहून हा संशय नाही होत की हे स्तम्भ आहे या पुरुष आहे. क्योंकि ज्ञान झाल्यानंतर पश्चात् प्रामाण्य ज्ञात होईल हे निस्संशय आहे. यदि ज्ञान नाही होत तेंव्हा धर्मीज्ञानाच्या अभावाने संशयाचे पण अभाव राहत आहे. अतः ज्ञानामध्ये प्रामाण्य अनुमित करने पडत आहे. त्याच प्रकारे हे ज्ञान प्रमा संवादिप्रवृत्तिजनकत्वाच्या कारणाने या प्रकारे प्रामाण्य

सिद्धि हे ज्ञान अप्रमा विसंवादिप्रवृत्तिजनक या रीतिने अप्रामाण्यसिद्धि.
(विसंवादिप्रवृत्तिः - तदर्थीची तदप्राप्तिफलकप्रवृत्ति अर्थात् निष्फलप्रवृत्ति।)
या प्रकारे स्वतःप्रामाण्यवादामध्ये उत्पन्न ज्ञान हे प्रमा आहे असे स्वीकृत करून अन्य कोणाचे पण (अनुमान प्रमाण) आश्रय नाही घेतले जाते. विज्ञान सामान्य सामग्री जन्यत्व राहते त्याने अतिरिक्त हेतुचे जन्यत्व हीच प्रमा आहे. असे स्वतःप्रामाण्यवाद पुरस्कृत करतात. दोषाभावरूप गुणाचे हेतुत्व नाही होत. दोष तर प्रमाचे प्रतिबंधक होत आहे. यथा दण्डाची घटाच्या प्रति यद्यपि नियतपूर्व वृत्ति आहे तथापि दण्डत्व या दण्डरूप दण्डाचे कारण नाही होत. त्याचे दण्डाच्याद्वारे कारणत्व असल्याने अन्यथासिद्धत्व स्वीकार केले जात आहे. तथा प्रमाज्ञानाच्या प्रति नियतपूर्व वृत्तिपण दोषाभाव प्रमाज्ञानाच्या कारण नाही. प्रमाज्ञानाच्या स्थलावर नियतपूर्व वृत्तिने दोषाच्या अभावाने अप्रमाज्ञानाच्या प्रतिबंध केले न की त्याच्या प्रमाज्ञानाची उत्पत्तिमध्ये कोणी व्यापार आहे. अतः दोषाभावाचे प्रमाज्ञानाच्या प्रति कारणत्व नाही अपि तु अन्यथा सिद्धि आहे. असे उत्पत्तिमध्ये स्वतस्त्व आहे. ज्ञानामध्ये स्वतोग्राह्यत्व दोषाभाव असल्याने यावत्स्वाश्रयग्राहकसामग्रीग्राह्यत्व आहे स्वाश्रय वृत्तिज्ञान आहे, उसका ग्राहक साक्षीज्ञान आहे, त्याने वृत्तिज्ञान मिळवुन तद्गत प्रामाण्यपण गृहीत होत आहे.

ख्यातिपञ्चकम् -

ज्ञानं द्विविधं प्रमा भ्रमः चेत्युक्तम्। भ्रमात्मकज्ञानस्य ख्यातिरिति व्यपदेशः शास्त्रग्रन्थेषु दृश्यते। ख्यातिविषये दार्शनिकाः बहुधा विप्रतिपद्यन्ते। तच्च विगानमेवं सङ्गृहीतं कारिकायाम् –

प्रमा आणि भ्रम हे दोन प्रकारचे ज्ञान आहे असे सांगितले आहे. भ्रमात्मक ज्ञानाची ख्याति असा उपदेश शास्त्र ग्रंथामध्ये पहिले जात आहे. ख्यातिच्या विषयामध्ये दार्शनिक बहुधा विप्रतिपत्ति दर्शवत आहे, तो विगान हेच इथे

सांगितले आहे –

आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा।
तथानिर्वचनीयख्यातिरित्येतत् ख्यातिपञ्चकम् ॥१६१॥

आत्मख्यातिः -बुद्धानुयायिषु अन्यतमाः योगाचाराः विज्ञानवादिनः। ये समेषामपि पदार्थानां क्षणिकत्वमङ्गीकुर्वन्ति। तन्नये विज्ञानव्यतिरिक्तं किमपि अन्यत् नास्ति। विज्ञानव्यतिरिक्तस्य प्रमेयजातस्य क्वचित् प्रमेयत्वव्यवहारः न भवति प्रत्युत विज्ञानारूढस्यैव नीलपीतादिकस्य। बाह्यार्थसद्भावकल्पनायाः स्यात् औचित्यं यदि विज्ञानव्यतिरिक्तस्य पदार्थस्य सद्भावः स्यात्। किन्तु नैवमस्ति। विज्ञानमेव बाह्यार्थपदेन प्रमातृपदेन ज्ञानपदेन च अभिधीयते । बाह्यार्थानामभावे कथं प्रत्ययवैचित्र्यमिति चेत् वासनावैचित्र्यात्। यद्यपि नैतन्नये बाह्यार्थसत्ताङ्गीक्रियते तथापि व्यवहारोपपत्त्यर्थमनाद्यविद्यावासनया आरोपितमलीकं बाह्यम्। उपपत्तिश्च यद् वस्तु यथानुभवसिद्धं तत् तथैव आगन्तुकम्। एवञ्च अन्यत्र बाह्ये शुक्तिकादौ ज्ञानधर्मस्य ज्ञानाकारस्य रजतादेः आरोपः सम्भवति । रजतादेः आन्तरत्वं च नेदं रजतमिति बलवद् बाधकप्रत्ययवशात् सिद्धयति। रजतादीनां बाह्यत्वे प्रतिषिद्धे आन्तरत्वम् अभ्युपेयते। विज्ञानात्मकस्य वस्तुजातस्य बाह्यार्थतया भासमानत्वमेव भ्रमज्ञानम्। अतः आत्मनः विज्ञानस्य बाह्यत्वेन ख्यातिः आत्मख्यातिः इति तन्मतराद्धान्तः।

असख्यातिः - माध्यमिकबौद्धानां मतमिदम्। एते हि सर्वशून्यवादिनः। तेषां

मते दृश्यप्रपञ्चः विज्ञानमुभयमपि असत्। तस्मात् ज्ञातृज्ञानज्ञेयानाम् अपि असत्त्वम्। भ्रमस्थलेऽपि भ्रमाधिष्ठाना शुक्तिः असती। तस्मिन् आरोपितं रजतमपि शुक्तिरजतस्थलेऽत्यन्तासतः एव रजतस्य प्रतीतिः। तस्मात् एवम् अत्यन्तासतः ख्यातित्वाङ्गीकारात् एतेषां मतमसत्ख्यातिरिति अभिधीयते। शून्यवादिनः माध्यमिकाः तु न कार्यस्य सद्रूपं कारणं किञ्चित् अभ्युपगच्छन्ति । किन्तु असदेव प्रतिक्षणं तथा भासते इति वदन्ति। इयमेव असत्ख्यातिः इत्युच्यते।

अख्यातिः- इदं प्राभाकरं मतम् । तेषां मते सर्वं ज्ञानं यथार्थम् । न एतैः इदं रजतमित्यत्र पुरोवर्तिविशेष्यकरजतत्वप्रकारकमेकमेव विशिष्टज्ञानं न्यायमताभिमतमङ्गीक्रियते । किन्तु इदमिति अनुभवः रजतमिति स्मरणम् इति अनुभवस्मरणात्मकं ज्ञानद्वयमङ्गीक्रियते। भ्रमस्थले इदमितिरूपेण पुरोवर्ति वस्तु गृह्यते दोषवशात् तन्निष्ठं शुक्तित्वं न गृह्यते। दृश्यमानं वस्तु पूर्वं दृष्टरजतसदृशमिति ग्रहणानन्तरं पूर्वरजतानुभवजन्यसंस्कारोब्दोधात् रजतस्मृतिः जायते। प्रत्यक्षस्मृतिविषययोः पुरोवर्तिरजतयोः भेदः न गृह्यते। एवं ज्ञानयोः भेदाग्रहनिबन्धनम् इदं रजतमिति ज्ञानम्। नेदम् अयथार्थज्ञानमपितु ज्ञानद्वयस्य भेदग्रहणाभावः। तत्र नेदं रजतमिति पुरोवर्तिरजतयोः भेदे गृहीते भेदाग्रहः निवर्तते। ततश्च अभेदव्यवहारः बाध्यते।

इदं रजतमित्यत्र एकस्य ज्ञानस्य प्रत्यक्षत्वमन्यस्य स्मृतित्वमिति विजातीययोः ज्ञानयोः अभेदग्रहः। क्वचित् सजातीययोः ज्ञानयोः अपि

अभेदग्रहः भवति यथा पीतः शङ्खः इत्यत्र। भिन्नाधिकरणेषु प्रत्यक्षीभूतं ज्ञानद्वयं समाहृत्य पीतः शङ्खः इति एकज्ञानतया व्यवह्रियते। पीतवर्णज्ञानं शङ्खज्ञानम् अनयोः भेदे सत्यपि भेदग्रहः नास्ति। एवञ्च इदं रजतमिति भ्रमे इदमिति प्रत्यक्षं रजतमिति स्मृतिश्चेति ज्ञानयोः भेदाग्रहः यथा तथैव इदमिति रजतमिति च ज्ञेययोरपि भेदाग्रहः। पीतः शङ्खः इति भ्रमे तु पीतमिति शङ्खमिति च द्वयोः ज्ञेययोः भेदग्रहे सत्यपि पीतवर्णज्ञानं शङ्खज्ञानं चेति द्वयोः ज्ञानयोः भेदाग्रहः।

अन्यथाख्यातिः - नैयायिकाः भाट्टाः जैनाश्च अन्यथाख्यातिवादिनः। इदं रजतमिति भ्रमस्थले शुक्तौ यद् रजतज्ञानं तत् न केवलं शुक्तिज्ञानं नापि केवलं रजतज्ञानमपितु ज्ञानद्वयात् पृथग्भूतं तृतीयं विशिष्टं ज्ञानम्। तत्र इदमंशः विशेष्यं रजतांशः विशेषणम्। अर्थात् इदंत्वविशेष्यकरजतत्वप्रकारकं विशिष्टं ज्ञानम्।

रजतांशस्य तत्र वस्तुतः अविद्यमानत्वात् नेदं यथार्थज्ञानमपितु भ्रमः। तत्र प्रथमं पुरोऽवस्थितेन चाकचिक्यमयेन वस्तुना चक्षुषः सन्निकर्षः , इन्द्रियदोषवशात् शुक्तिकायाः वास्तविकस्वरूपस्य अनवबोधः, पुरोवर्तिना चाकचिक्यादिमयेन वस्तुना रजतस्य सादृश्यज्ञानमुत्पद्य आपणादिस्थरजतस्मृतिं जनयति। रजतस्य इदंकारास्पदात् वस्तुनः भेदे सत्यपि नेत्रदोषादिवशात् अभेदः कल्प्यते इति तस्य विशिष्टज्ञानस्य भ्रमत्वम्। एवमुत्पन्ने रजतज्ञाने इदं रजतं मम इष्टसाधनमिति तत्र प्रवृत्तिः अपि उपपद्यते। एवं शुक्तौ इदं रजतमिति यत् ज्ञानं न तत् केवलं इदमः

प्रत्यक्षं नापि केवलं रजतस्य स्मरणं किन्तु स्मृतिप्रत्यक्षाभ्यां भिन्नं तृतीयं विशिष्टज्ञानम्।

अनिर्वचनीयख्यातिः- अद्वैतवेदान्तिनः भ्रमस्थले अनिर्वचनीयख्यातिमङ्गीकुर्वन्ति। सर्वं च चैतन्ये अधिष्ठितमिति तेषां नयः। शुक्तौ इदं रजतमिति भ्रमस्थले कामालादिदोष दूषितलोचनस्य पुरोवर्तिद्रव्यसंयोगात् आदौ इदमाकारा चाकचिक्याकारा काचित् अन्तःकरणवृत्तिः उदेति। इदमिति ज्ञानोदयोत्तरं चाकचिक्यादिसादृश्यवशात् यस्मिन् चैतन्ये शुक्तिः अधिष्ठिता तस्मिन् एव चैतन्ये अधिष्ठितायाः अविद्यायाः वशात् अनिर्वचनीयं रजतं तत्कालमेव उत्पद्यते। इदं रजतं यावत्प्रतिभासम् अवतिष्ठते। जाते शुक्तिज्ञाने नैवं तस्य अस्तित्वमुपलभ्यते। ततश्च इदमवच्छिन्नचैतन्यस्य तद्वत्त्यवच्छिन्नचैतन्यस्य च अभेदात् इदमिति ज्ञानमुदेति। तच्च रजतम् इदमवच्छिन्नचैतन्यमधितिष्ठति। इदमि तादात्म्येन रजतस्य विद्यमानत्वात् इदं रजतमिति प्रत्ययः उत्पद्यते। तच्च रजतम् असत् चेत् नावबुध्येत सच्चेत् न बाध्येत। तस्मात् सत्त्वासत्त्वाभ्याम् अनिर्वचनीयम् इति अनिर्वचनीयख्यातिवादिभिः अङ्गीक्रियते। एवं हि समस्तं जगत् ब्रह्मणि अधिष्ठितं ज्ञाते च ब्रह्मणि तद्बाध्यते इति तन्मतम्।

यथैवं ज्ञानोत्पत्त्यादिविषये विप्रतिपत्तिः एवं सृष्टिविषयेऽपि विप्रतिपत्तिः विद्यते दर्शनेषु । तदेवं सङ्गृहीतं कारिकायाम् -

आत्मख्याति -

बुद्धानुयायिमध्ये अन्यतम योगाचर हा विज्ञानवादी आहे. जो सर्व पदार्थांचे

क्षणिकत्व स्वीकार करत आहे. त्यांच्या मतानुसार विज्ञानाच्या अतिरिक्त आणि काहीही नाही. विज्ञानाच्या व्यतिरिक्त प्रमेयाने उत्पन्नामध्ये प्रमेयत्व व्यवहार नाही होत किन्तु विज्ञानरूढ नीलपीतादिचे ही होत आहे. बाह्यार्थसद्भावकल्पनाचे औचित्य होईल यदि विज्ञानाने व्यतिरिक्त पदार्थाचे सद्भाव होईल. किन्तु असे नाही. विज्ञान हेच बाह्यर्थपद, प्रमातृपद, ज्ञानपदाने अभिहित आहे. बाह्यार्थाच्या अभावाने ज्ञानामध्ये विचित्रता येईल, असे म्हणतात - वासनाच्या वैचित्र्याने यद्यपि हे बाह्यार्थाची सत्ता स्वीकार करत आहे तथापि व्यवहाराची उपपत्तिच्या अनाद्य असि विद्याची वासनाने आरोपित मलिन बाह्य आहे. उपपत्तितर जे वस्तु यथा अनुभवसिद्ध आहे तथैव आगंतुक आहे. अन्यत्र बाह्यामध्ये शुक्तिकादिमध्ये ज्ञानधर्माचे ज्ञानाकाराचे रजतादिमध्ये आरोप सिद्ध होत आहे. रजतादिचा बाह्यत्व प्रतिषिद्ध झाल्यावर आन्तरत्व केले जात आहे. विज्ञानात्मक वस्तुजाताचे बाह्यार्थ रीतिने भासमानत्व हे भ्रमज्ञान आहे. अतः आत्म्याचे विज्ञानाच्या बाह्यत्वाने ख्याति आत्मख्याति होत आहे.

माध्यमिक बौद्धांचे हे मत आहे. हे सर्वशून्यवादी आहे. त्यांच्या अनुसार दृष्टप्रपंच, विज्ञान दोन्ही असत् आहे. अतः ज्ञातृ-ज्ञेय-ज्ञानाचे पण असत्व आहे. भ्रमस्थलावर भ्रमाधिष्ठ शुक्ती असत आहे. त्याच्यामध्ये आरोपित रजत पण शुक्तिरजत स्थानावर अत्यन्त असत् आहे. त्याच्यामध्ये आरोपित अत्यन्त असत् ख्यातिचे अंगीकार करण्याने यांचे मत असत्ख्याति या नावाने ओळखले जात आहे. शून्यवादी, माध्यमिक कार्यचे सद्रूप कारण नाही जाणत. किन्तु असत् हेच प्रतिक्षण भासमान आहे. असे म्हणले जाते. हेच असत्ख्याति आहे.

अख्याति -

हे प्रभाकराचे मत आहे. त्यांच्या मतानुसार सर्व ज्ञान यथार्थ आहे. हे रजत आहे - इथे पुरोवर्तिविशेष्यकरजतत्वप्रकारक असे विशिष्ट ज्ञान हे न्यायमत स्वीकार नाही करत. किन्तु इदम् हे अनुभव आहे आणि रजत हे स्मरण आहे - असे अनुभव आणि स्मरण हे दोन ज्ञान मानले जात आहे. भ्रमस्थलामध्ये इदम् याने पुरोवर्ति वस्तु गृहीत होत आहे दोषाचे कारण तन्निष्ठ शुक्तित्व नाही घेतले जात. दृश्यमान वस्तु पहले पहिले रजतचे जसे आहे असा ग्रहणाच्या नंतर पूर्व रजत अनुभवजन्यसंस्काराच्या उद्भवाचे कारण रजतस्मृति होत आहे. प्रत्यक्ष आणि स्मृतिने पूर्ववर्ति रजताचे भेद गृहीत नाही होत. असे ज्ञानाचे भेदाग्रहण निबन्धन इदं रजतम् असे ज्ञान. हे अयथार्थ ज्ञान नाही अपितु दोन ज्ञानाचे भेदग्रहणाभाव आहे. नेदं रजतम् - हे एक पुरोवर्तिरजताचे भेद गृहीत झाल्याने भेदाग्रह निवृत्त होत आहे. अभेदव्यवहार बाध्य होत आहे.

हे रजत आहे इथे एक ज्ञानाचे प्रत्यक्षत्व अन्याचे स्मृतित्वात् विजातीय ज्ञानाचे अभेदसंग्रह आहे. क्वचित् सजातीय ज्ञानामध्ये पण होत आहे. जसे की - पीत शंख। भिन्न अधिकरणामध्ये प्रत्यक्षभूत दोन ज्ञान मिळवून पीत शंख असा व्यवहार आहे. पीतवर्णज्ञान आणि शंखज्ञान या दोघांमध्ये यद्यपि भेद आहे तथापि भेदग्रह नाही. इदं रजतम् या भ्रमामध्ये इदम् हे प्रत्यक्ष आहे आणि रजत हे स्मृति आहे - या दोन्ही ज्ञानामध्ये भेदाग्रह आहे. त्याच प्रकारे इदम् रजत या ज्ञेयामध्येपण भेदाग्रह आहे. पीत शंख या भ्रमामध्ये पीत आणि शंख दोन्ही ज्ञेयामध्ये भेदग्रह असले तरीपण पीतवर्णाचे ज्ञान आणि शंखज्ञान या दोन्ही ज्ञानामध्ये भेदाग्रह आहे.

नैयायिक, भाट्ट, जैन ख्यातिला अन्यथा मानत आहे. इदं रजतम् इस भ्रमस्थलाला शुक्तिमध्ये जो रजतज्ञान आहे तो केवल शुक्तिज्ञान ही नाही. अपितु दोघांचे व्यतिरिक्त कोणी आणि पृथक् ज्ञान आहे. हे अंश विशेष्य आहे आणि रजत विशेषण आहे. अर्थात् इदंत्वविशेष्यक रजतत्वप्रकारक

विशिष्ट ज्ञान आहे. तिथे नाही. अतः हा भ्रम आहे. वस्तुचे चक्षु बरोबर सन्निकर्ष, इन्द्रियाच्या दोषाने शुक्तिचे वास्तविक रूपाचे अनवबोध, पुरोवर्ति वस्तुचे आपण(दुकान) मध्ये पहिले गेलेले रजताबरोबर सादृश्य असल्याने कारण रजताची स्मृति होते. रजताचे इदंकारास्पदाने वस्तुमध्ये भेद असल्याने पश्चात् नेत्रदोषाच्या कारणे अभेद कल्पित केला आहे. असे त्याला विशिष्ट ज्ञानाचे भ्रमत्व आहे. असे बोलल्याने हे रजत माझा इष्ट साधन आहे - इथे प्रवृत्ति पण उपपन्न होऊन जाईल या प्रकारे शुक्तिमध्ये हे रजत आहे इथे न केवल इदम् चे प्रात्यक्ष न केवल रजताचे स्मरण किन्तु स्मृति आणि प्रत्यक्षाने भिन्न तृतीय विशिष्ट ज्ञान आहे.

अनिर्वचनीयख्याति -

अद्वैत वेदान्ती भ्रमस्थलावर अनिर्वचनीयख्यातिला स्वीकृत करत आहे. सर्व चैतन्यामध्ये स्थित आहे असे यांचे मानने आहे. शुक्तिमध्ये रजत आहे या भ्रमस्थलावर डोळ्यांना भास होऊन चमक दिसल्याने अंतकरणात ज्ञान होत. हे रजतत्व जेवढे प्रतिभासित होत आहे, शुक्ति ज्ञानाच्या पश्चात् त्यांचे अस्तित्व नाही रहत. हे तादात्म्याने रजताचे विद्यमान असल्या कारणाने हे रजत आहे असे ज्ञात होत आहे. तो रजत असत् आहे, तेंव्हा नाही समजत सत् आहे, तेंव्हा बाधित नाही होत. अतः सत्व असत्वाने अनिर्वचनीय असे यांचे मत आहे. सर्व जगत् ब्रह्मामध्ये अधिष्ठित आहे, त्याचे ज्ञान झाल्या नंतर उपरान्त ब्रह्मामध्ये त्याचा बाध होऊन जात आहे.

सृष्टिवादः -

आरम्भवादः कणभक्षपक्षः सङ्घातवादस्तु भदन्तपक्षः।

सांख्यादिपक्षः परिणामवादः वेदान्तपक्षस्तु विवर्तवादः ॥१६२॥

॥ संक्षेपशारीरकम् - २।६३॥

समवायिकारणमसमवायिकारणं निमित्तकारणं चेति त्रिविधकारणसमुदायः स्वस्माद्भिन्नं कार्यम् उत्पादयति । अयमेव आरम्भवादः। एषः वादः वैशेषिकाणां नैयायिकानां च। यद्यपि असमवायिकारणात् निमित्तकारणात् च कार्यं भिन्नमिति अन्यैरपि आद्रियते। किन्तु समवायिकारणात् भिन्नमिति अन्यैः नोच्यते। एषः अभ्युपगमः केवलं वैशेषिकाणां नैयायिकानां च। समवायिकारणमेव उपादानकारणमित्यभिधीयते। उपादानकारणानां तन्त्वादीनां समुदायः एव पटादिकार्यं न अवयवातिरिक्तः अवयवी नाम कश्चनास्ति इति सङ्घातवादः सौत्रान्तिकानां वैभाषिकाणां च बौद्धानाम्। अयं च समुदायः प्रतिक्षणं नवः उत्पद्यते। उपादानकारणं बीजादिकं स्वविनाशद्वारा एव अङ्कुरादिकार्योत्पादकं भवति। परिणामवादः सांख्यानाम् । आदिपदेन पातञ्जलाः रामनुजीयाश्च गृह्यन्ते। कारणमेव कार्यरूपेण परिणमते इति एषां नयः। तत्र परिणामः द्विविधः सदृशपरिणामः विसदृशपरिणामः चेति। यावत्कालं पयः, पयः एव अवतिष्ठते तावत्पर्यन्तं प्रतिक्षणं सदृशपरिणामः। यदा पुनः दध्यादीनाम् उत्पत्तिः तदा विसदृशपरिणामः। अतात्तिकः कारणस्य अन्यथाभावः कार्यमित्येषः विवर्तवादः वेदान्तिनाम्। उक्तं च वेदान्तनिरूपणावसरे।

समवायी, असमावायी आणि निमित्त हे तीन कारण आहेत स्वतःपेक्षा भिन्न कार्याला उत्पन्न करत आहे. हा आरम्भवाद आह. हे वाद वैशेषिक आणि नैयायिकांचे आहे. यद्यपि असमवायी कारणाने निमित्तकारण भिन्न आहे, हे अन्यपण मानत आहेत, तथापि समवायीकारणापेक्षा भिन्न असे अन्य नाही म्हणत. हे केवल वैशेषिक आणि नैयायिक यांचे मत आहे. समवायीकारण हे उपादानकारण आहे.

उपादान कारण तन्त्वादिचे समुदाय हे पटादिकार्य आहे, अवयवातिरिक्त

अवयवी कोणी नाही असा संघातवाद आहे. सौत्रांतिक,वैभाषिक आणि बौद्ध यांचे. हे समुदाय प्रतिक्षण नया उत्पन्न होत आहे. उपादानकारण बीजादि स्वतःला नष्ट करत असता अंकुरादिचे कार्योत्पादक होत आहे.
सांख्याचे परिमाणवाद होत आहे. आदि पदाने पातंजल आणि रामानुजीय ग्रहण केले जात आहे. कारण कार्यरूपामध्ये परिणत होत आहे. परिणाम द्विविध आहे - सदृश आणि विसदृश। जोपर्यंत दूध दूधच राहते तोपर्यन्त प्रतिक्षण सदृशपरिणाम होत आहे. जेंव्हा पुनः दध्यादिची उत्पत्तिची तेंव्हा विसदृशपरिणाम आहे.

बौद्धाः	**असत्कारणवादिनः**	**ते हि असतः सदुत्पत्तिं ब्रुव यथा बीजस्य नाशात् अङ्कुरस्य उत्पत्तिः।**
अद्वैतिनः	**सत्कारणवादिनः**	**समस्तस्य कारणभूतं ब्रह्म केवलं सत्। तद्भिन्नं सर्वं रज्जुसर्पवत् मिथ्या।**
नैयायिकवैशेषिकाः	**असत्कार्यवादिनः**	**तेषां नये कार्यं घटादिकम् उत्पत्तेः प्राक् असत्।**
सांख्याः	**सत्कार्यवादिनः**	**कारणे सतः एव कार्यस्य उत्पत्तिः।**

बौद्ध	असत्कारणवादि	ही असताची सदुत्पत्ति सांगितली आहे.
अद्वैती	सत्कारणवादि	समस्ताचे कारणभूत केवल ब्रह्म सत् आहे. त्याने भिन्न सर्व रज्जु सारखे साप असे मिथ्य आहे.
नैयायिक और वैशेषिक	असत्कार्यवादि	यांच्या नयामध्ये घटादि उत्पत्तिचे पूर्व आहे.
सांख्य	सत्कार्यवादि	कारण असताना ही कार्यची उत्पत्ति होते.
बौद्ध	असत्कारणवादि	ही असताची सदुत्पत्ति सांगितली आहे.
अद्वैती	सत्कारणवादि	समस्ताचे कारणभूत केवल ब्रह्म सत् आहे. त्याने भिन्न सर्व रज्जु सारखे साप असे मिथ्य आहे.
नैयायिक और वैशेषिक	असत्कार्यवादि	यांच्या नयामध्ये घटादि उत्पत्तिचे पूर्व आहे.
सांख्य	सत्कार्यवादि	कारण असताना ही कार्यची उत्पत्ति होते.

अत्रैतद् विज्ञेयम् -

तात्पर्यनिर्णायकलिङ्गानि -

एकस्य वाक्यस्य अर्थज्ञानार्थं चत्वारः अंशाः सहकुर्वन्ति । ते च आकाङ्क्षा योग्यता सन्निधिः तात्पर्य (आसत्तिः) चेति। तत्र तात्पर्य नाम तत्प्रतीतीच्छयोच्चारितत्वम्। तन्निर्णायकानि लिङ्गानि एवमुक्तानि -

एका वाक्यच्या अर्थज्ञानासाठी चार अंश सहायक होत आहे - आकांक्षा, योग्यता, सन्निधि आणि तात्पर्य। तात्पर्य अर्थात् तत्प्रति असि इच्छाने उच्चारितत्व। निर्णायक लिंग असे सांगितले आहे-

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्ग तात्पर्यनिर्णये ॥१६३॥

उपक्रमोपसंहारौ अभ्यासः अपूर्वता फलम् अर्थवादः उपपत्तिः इति षड्भिः लिङ्गैः तात्पर्यनिश्चयः क्रियते। तत्र प्रकरणप्रतिपाद्यस्य अर्थस्य प्रकरणादौ प्रकरणान्ते च प्रतिपादनम् उपक्रमोपसंहारौ। तौ च सम्भूय एकं लिङ्गम्। प्रकरणप्रतिपाद्यस्य वस्तुनः मध्येप्रकरणं पुनः पुनः प्रतिपादनम् अभ्यासः। प्रकरणप्रतिपाद्यस्य वस्तुनः प्रमाणान्तरेण अविषयीकरणम् अपूर्वता। प्रकरणे तत्र तत्र श्रूयमाणं प्रयोजनं फलम्। प्रकरणप्रतिपाद्यस्य वस्तुनः प्रशंसनम् अर्थवादः। प्रकरणप्रतिपाद्यार्थसाधिका तत्र तत्र श्रूयमाणा युक्तिः उपपत्तिः। यथा छान्दोग्योपनिषदि षष्ठे अध्याये प्रकरणादौ 'सदेव सोम्येदमग्र आसीत्' इति निरुपाधिकं सन्मात्रस्वरूपम् अद्वितीयं ब्रह्म उपक्रम्य प्रकरणान्ते ऐतदात्म्यमिदं सर्वम्' इत्येवमुपसंहृतम् इति उपक्रमोपसंहारौ। 'तत्त्वमसि' इत्येवं नववारम्

अद्वितीयात्मप्रतिपादनमभ्यासः। अद्वितीयात्मनः 'अत्र वाव किल सत् सोम्य न निभालयसे' इति प्रमाणान्तरागम्यत्वस्य प्रदर्शनमपूर्वता। 'तं त्वौपनिषदं पुरुषं पृच्छामि' इत्यादि श्रुत्यन्तरं तत्र उपोद्बलकम्। 'येनाश्रुतं श्रुतं भवति' इत्येवम् एकविज्ञानेन सर्वविज्ञानं फलम्। तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत' इत्यद्वितीयब्रह्मणः सकाशात् सृष्टिः उक्ता। 'सन्मूलः सौम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' इति स्थितिनियमनं चोक्तम् । 'तेजः परस्यां देवतायाम्' इति प्रलयः अपि प्रोक्तः। 'इमाः तिस्रः देवताः अनेन जीवेन आत्मनानुप्रविश्य नामरूपे व्याकरवाणि' इति प्रवेशः। एवं श्रुतिप्रतिपादितैः सृष्ट्यादिभिः ब्रह्मस्वरूपप्रशंसनमर्थवादः। यथा सोम्येकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इत्येवमद्वितीयवस्तुसाधने प्रोच्यमाना युक्तिः उपपत्तिः। एवम् एतैः लिङ्गैः अस्य प्रकरणस्य तात्पर्यं अद्वितीये ब्रह्मणि इति गम्यते। यथा वाक्यतात्पर्यम् उपक्रमादिना निश्चीयते एवं वाक्यावयवभूतानाम् अनेकार्थयुक्तानां पदानामर्थनिर्णयः संयोगादिभिः लिङ्गैः क्रियते। तदुक्तम् -

उपक्रम आणि उपसंहार, अपूर्वता, फल, अर्थवाद, उत्पत्ति या सहा लिंगाचे तात्पर्य निर्णय होत आहे. प्रकरणप्रतिपाद्य अर्थाचे आदि आणि अन्तामध्ये प्रतिपादन उपक्रम आणि उपसंहार होत आहे. तो मिळून एक लिंग होत आहे.

प्रकरणप्रतिपाद्य वस्तुचे मध्यप्रकरण पुनः पुनः प्रतिपादन अभ्यास आहे.

प्रमाणान्तराने अविषयीकरण करने अपूर्वता आहे.

तत्र तत्र श्रुत प्रयोजन फळ आहे.

वस्तुचे प्रदर्शन अर्थवाद आहे.

तत्र तत्र श्रूयामाण युक्ति उत्पत्ति आहे.

यथा छान्दोग्योपनिषदाचे षष्ठ अध्यायामध्ये प्रकरणादिमध्ये 'सदेव सोम्येदमग्र आसीत्' इति निरुपाधिक सन्मात्रस्वरूप अद्वितीय ब्रह्माला उपक्रम करून प्रकरणान्ते ऐतदात्म्यमिदं सर्वम्' इत्येवमुपसंहृत इति उपक्रमोपसंहार। 'तत्त्वमसि' हे नव वेळा अद्वितीयात्मप्रतिपादन अभ्यास आहे. अद्वितीयात्माला 'अत्र वाव किल सत् सोम्य न निभालयसे' इति प्रमाणान्तराने सिद्ध प्रदर्शन अपूर्वता आहे. 'तं त्वौषनिषदं पुरुषं पृच्छामि' इत्यादि श्रुत्यन्तर तत्र उपोद्बलक आहे. 'येनाश्रुतं श्रुतं भवति' या प्रकारे एकविज्ञानाने सर्वविज्ञान फळ आहे. तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत' इत्यद्वितीयब्रह्माने सृष्टि उक्त आहे. 'सन्मूलः सौम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' इति स्थितिनियमन सांगितले आहे. 'तेजः परस्यां देवतायाम्' इति प्रलय आहे, असे बोलले जात आहे. 'इमाः तिस्रः देवताः अनेन जीवेन आत्मनानुप्रविश्य नामरूपे व्याकरवाणि' इति प्रवेश। एवं श्रुतिप्रतिपादित सृष्टिने ब्रह्मस्वरूपप्रशंसन अर्थवाद होत आहे. यथा सोम्येक मृत्पिण्डाने सर्व मृन्मय विज्ञात होईल. वाचारम्भण विकारः नामधेय मृत्तिका हेच सत्य आहे' असि अद्वितीयवस्तुसाधनामध्ये प्रोच्यमान युक्ति उपपत्ति। एवम् या लिङ्गाने या प्रकरणाचे तात्पर्य अद्वितीय ब्रह्मामध्ये असे वाठते.

यथा वाक्यतात्पर्य उपक्रमादिने निश्चित होत आहे त्याच प्रकारे वाक्याच्या अवयव अनेकर्थ युक्त पदाचे अर्थनिर्णय संयोगादि लिंगाने केले आहे -

शब्दार्थस्मारकलिङ्गानि -

संयोगो विप्रयोगश्च साहचर्य विरोधिता।

अर्थः प्रकरणं लिङ्ग शब्दस्यान्यस्य सन्निधिः ॥१६४॥

सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।

शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥१६५॥

संयोगः - प्रसिद्धपदसम्बन्धः। यथा 'सशङ्खचक्रः हरिः पूज्यः' इत्यत्र शङ्खचक्रयोः संयोगः भगवद्विष्णुनिष्ठतया प्रसिद्धः यमाद्यर्थान्तरात् हरिपदं व्यावर्तयन् विष्णौ तात्पर्य ग्राहयति ।

विप्रयोगः- यथा 'अशङ्खचक्रः हरिः' इत्यत्र शङ्खचक्रयोः विश्लेषः हरिपदं विष्णुभिन्नार्थान्तरेषु नियमयति।

साहचर्यम्- एकस्मिन् कार्ये परस्परापेक्षिकत्वम्। यथा 'रामलक्ष्मणौ' 'सीतारामौ' 'रामदशरथौ' इत्यत्र सीतालक्ष्मणादीनां साहचर्यं रामशब्दं परशुरामादितः व्यावर्तयन् दाशरथावेव नियमयति।

विरोधिता- प्रसिद्धवैरम्। यथा रामार्जुनावित्यत्र भार्गवकार्तवीर्यार्जुनयोर्वैरं रामपदं दाशरथिरामादितः व्यावर्तयन् तद्विरोधिनि भार्गवे एव नियमयति ।

अर्थः- चतुर्थ्याद्यभिधेयं प्रयोजनम् । यथा 'कृष्णं वन्दे भवच्छेदे' इत्यादौ भवच्छेदनादिरूपार्थः कृष्णपदं वासुदेवे एव नियमयति ।

प्रकरणम्- वक्तृश्रोतबुद्धिस्थत्वम्। यथा राजानं सम्बोध्य केनचित् भृत्येन 'सर्वं जानाति देवः' इत्युक्ते सति निरुक्तं प्रकरणं देवपदं भूपालार्थे नियमयति।

लिङ्गम् - स्ववाच्यैकवृत्तिः तदव्यावृत्तिर्धर्मः। यथा 'आत्मभूः केन जप्योऽयं कुपितः मकरध्वजः' इत्यत्र आत्मभूशब्दस्य कामब्रह्मोभयवाचकत्वेऽपि मकरध्वजलिङ्गात् मन्मथबोधकत्वम्।।

शब्दस्यान्यस्य सन्निधिः - प्रसिद्धपदसमभिव्याहारः। यथा 'रामं सीतापतिं भजे' । प्रसिद्धस्य सीतापतिशब्दस्य समभिव्याहारः।

सामर्थ्यम् - कारणत्वम्। यथा 'मत्तोयं मधुना पिकः' इत्यत्र

पिकमदहेतुत्वज्ञानान्मधुशब्दात् वसन्तबोधः।

औचिती - अन्वययोग्यत्वम्। यथा 'गच्छत्यारुह्य सैन्धवम् । सैन्धवपदस्य अश्वार्थे स्वीकृते एव अत्र अन्वयः सम्भवति ।

देशः - पुरादिः। यथा 'राजा नगरे राजते' इत्यत्र 'राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः' इति कोशसत्त्वेऽपि राजपदेन नृपः गृह्यते।

कालः - दिवसनिशादिः। 'चित्रभानुर्दिने भाति रात्रौ चित्रभानुः प्रकाशते' अत्रादौ सूर्यस्य ततः चन्द्रस्य च ग्रहणम् ।

व्यक्तिः - पुल्लिङ्गादिः। यथा 'मित्रो भाति' इत्यत्र मित्रशब्दस्य पुल्लिङ्गेऽत्र प्रयोगात् सूर्यवाचकत्वनिश्चयः।

स्वरः - उदात्तादिः। यथा 'इन्द्रशत्रुः वर्धस्व' । आधुदात्तत्वे षष्ठीतत्पुरुषः इन्द्रस्य शत्रुः। अन्तोदात्तत्वे बहुव्रीहिः इन्द्रः शत्रुः यस्य सः।

आदिपदेन अभिनयनेत्रसूचनादयः ग्राह्याः। शब्दस्य तिस्रः वृत्तयः प्रसिद्धाः। याभिः त्रयः अर्थाः बुध्यन्ते । ताः च वृत्तयः अभिधा लक्षणा व्यञ्जना चेति। अभिधावृत्या प्राप्यः अर्थः वाच्यार्थः। लक्षणावृत्या प्राप्यः अर्थः लक्ष्यार्थः । व्यञ्जनावृत्या प्राप्यः अर्थः व्यङ्ग्यार्थः इति अभिधीयते। तदुक्तं काव्यप्रकाशे-

संयोगः -

प्रसिद्धपदसंबन्ध। यथा - 'सशङ्खचक्रः हरिः पूज्यः' इथे शंख आणि चक्राचे संयोग भगवान विष्णुमध्ये प्रसिद्ध आहे ज्याला हरि पण म्हणतात.

विप्रयोगः -

यथा - 'अशङ्खचक्रः हरिः' इथे शंख चक्राचे विश्लेष हरि पदाला विष्णु भिन्न अन्य अर्थामध्ये नियमित होत आहे.

साहचर्यम् -

एका कार्यामध्ये आपल्यामध्ये अपेक्षा। यथा - रामलक्ष्मणौ, रामदशरथौ इथे साहचर्याने दाशरथि रामच आहे न की परशुराम।

विरोधिता -

प्रसिद्धवर। रामार्जुनौ, भार्गवकार्तवीर्यार्जुनयोर्वैरम् इथे दाशरथि रामाला सोडून भार्गवाला सांगतात.

'कृष्णं वन्दे भवच्छेदे' - इथे कृष्ण हाच इष्ट आहे.

अर्थः -

चतुर्थीने प्रयोजन अभिहित होते. 'कृष्णं वन्दे भवच्छेदे' - इथे कृष्ण हे इष्ट आहे.

प्रकरणम् -

वक्तृश्रोतबुद्धिस्थतत्व। 'सर्वं जानाति देवः' असा कोणी सेवक राजाला म्हणतो अर्थात् राजा निरुक्त इत्यादिमध्ये नियमित आहे.

लिङ्गम् -

स्ववाच्यैकवृत्ति तदव्यावृत्तिधर्म। यथा - 'आत्मभूः केन जप्योऽयं कुपितः मकरध्वजः' इथे आत्मभू अर्थात् कामब्रह्मोभयवाचकत्व असलेतरी मकरध्वजलिङ्ग मन्मथबोधकत्व।

शब्दस्यान्यस्य सन्निधिः -

प्रसिद्धपदसमभिव्याहार। यथा 'रामं सीतापतिं भजे' । प्रसिद्ध सीतापतिशब्दाचे समभिव्याहार।

सामर्थ्यम् -

कारणत्वम्। यथा 'मत्तोयं मधुना पिकः' इत्यत्र पिकमदहेतुत्वज्ञानान्मधुशब्दात् वसन्तबोधः।

औचिती -

अन्वययोग्यत्वम्। यथा 'गच्छत्यारुह्य सैन्धवम् । सैन्धवपदस्य अश्वार्थे

स्वीकृते एव अत्र अन्वयः सम्भवति ।

शब्दवृत्ति तीन आहे ज्याने तीन अर्थ प्राप्त आहे - अभिधा, लक्षणा आणि व्यञ्जना। अभिधाने वाच्यार्थ, लक्षणाने लक्ष्यार्थ आणि व्यञ्जनाने व्यंग्यार्थ प्राप्त होत आहे.

कालः -

दिवस, रात्र इत्यादि, 'चित्रभानुर्दिने भाति रात्रौ चित्रभानुः प्रकाशते' या वाक्यामध्ये पहले सूर्य त्याच्या नंतर चंद्राचे ग्रहण केले गेले आहे.

व्यक्तिः -

पुंलिंगादि। यथा मित्रो भाति इथे मित्र या पुंलिंग पदाने सूर्याचे ग्रहण केले आहे.

स्वर –

उदात्तदि। यथा 'इन्द्रशत्रुः वर्धस्व' - हा षष्ठी तत्पुरुष आहे तेंव्हा आद्युदात्त होईल इन्द्रस्य शत्रुः आणि अन्तोदात्त राहते बहुव्रीहि होईल इन्द्रः शत्रुः यस्य सः। आदि या पदाने अभिनयनेत्र सूचनादिचे ग्रहण होते.

शब्दवृत्तिः -

स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा।
वाच्यादयस्तदर्थाः स्युः तात्पर्यार्थोऽपि केषुचित् ॥१६६॥

तत्र प्रथमा अभिधावृत्तिः। 'गङ्गायां घोषः' इति वाक्यं श्रुत्वा अभिधावृत्या गङ्गापदस्य प्रवाहः इति अर्थः बोधितः भवति। यश्च प्रवाहः भगीरथेन तपःप्रभावात् भुवमवतारितः। अतः गङ्गापदस्य वाच्यार्थः प्रवाहविशेषः इति। द्वितीया लक्षणावृत्तिः। लक्षणायाः लक्षणमेवमुक्तं प्राज्ञैः -

प्रथमतः अभिधा। गङ्गायां घोषः हे ऐकून अभिधाने गंगेचा प्रवाह बोधित होत आहे. जो प्रवाह भगीरथिने धरतीवर अवतारित केलेला आहे. अतः

गंगा पदाचा वाच्यार्थ प्रवाहविशेष आहे. द्वितीय लक्षणा आहे-

मानान्तरविरोधे तु मुख्यार्थस्यापरिग्रहे।
मुख्यार्थेनाविनाभूते प्रवृत्तिः लक्षणेष्यते ॥१६७॥

यत्र वाच्यार्थस्य स्वीकृतौ मानान्तरविरोधः तत्र वाच्यार्थेनाविनाभूते अर्थे प्रवृत्तिः सम्भवति सा एव लक्षणा। गङ्गायां घोषः' इत्यस्य वाच्यार्थः प्रवाहविशेषः इति। न स वाच्यार्थः वाक्येऽस्मिन् सङ्गच्छते। यतः न घोषस्य गङ्गाप्रवाहे स्थितिः सम्भवति। किन्तु अस्य वाक्यस्य विपश्चिन्मुखनिसृतत्वात् भवेदेव कश्चन अर्थविशेषः इत्यतः लक्षणावृत्या गङ्गापदस्य गङ्गातटः इति अर्थः स्वीक्रियते ।लक्षणायां त्रैविध्यं वर्तते जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति। यत्र वाच्यार्थस्य परित्यागः तत्र जहल्लक्षणा, यथा मञ्चाः क्रोषन्तीति। यत्र वाच्यार्थस्य अपरित्यागः तत्र अजहल्लक्षणा, यथा छत्रिणो यान्तीति। यत्र वाच्यार्थस्य एकांशस्य परित्यागः तत्र जहदजहल्लक्षणा, यथा तत्वमसीत्यत्र। तृतीया तु व्यञ्जनावृत्तिः। लक्षणावृत्या गङ्गातटे घोषः' इति अर्थः सिद्धः। व्यञ्जनावृत्या गङ्गापदेन शीतलता पवित्रता च गृह्यते । यतः यदि गङ्गातटे घोषः इत्येतावानेवार्थः वक्त्रा विवक्षितः अभविष्यत्तदा तथैव ब्रूयात् न गङ्गायां घोषः' इति । एवञ्च शब्दवृत्तित्रयेण गङ्गायां घोषः' इत्यस्य गङ्गातीरस्थः गङ्गाश्रितशीतलतापवित्रताभ्यां युक्तः घोषः इत्यर्थः आविर्भवति। कुमारिलभट्टानुयायिनः तु तात्पर्याख्यामपरामपि वृत्तिम् अङ्गीकुर्वन्ति। तत्र अभिधावृत्या प्राप्यः अर्थः शक्यार्थः इत्यपि कथ्यते।

अर्थात् अयमर्थः शक्त्या प्राप्यः। अस्य पदस्य अयमर्थः इति यः सङ्केतः विद्यते सः शक्तिः इति कथ्यते। अस्य शब्दस्य अत्र एव शक्तिः इति कथं गम्यते इति स्यादाशङ्का । अत उक्तम् -

गङ्गायां घोषः याचा अर्थ प्रवाह इथे संगत नाही होत. घोषाची कधी पण प्रवाहामध्ये स्थिति संभव नाही होत. परंतु या वाक्याचा लक्षणाचे गंगा तट असा अर्थ स्वीकारल्या जातो. अतः गङ्गापद गङ्गातट या अर्थामध्ये घेतले जात आहे. लक्षणा तीन प्रकारची होती - जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा। वाच्यार्थाची परित्याग - जहल्लक्षणा - यथा मञ्चाः क्रोषन्तीति। वाच्यार्थची अपरित्याग - अजहल्लक्षणा - यथा छत्रिणो यान्तीति। वाच्यार्थाचे एकांशाने परित्याग - जहदजहल्लक्षणा, यथा तत्वमसीत्यत्र।

व्यंजना - लक्षणाने गंगातटावर घोष असा अर्थ सिद्ध झाहला. व्यंजनाने शीतलता आणि पवित्रता गृहीत होती. यदि गंगेच्या किनारे घोष एवढाच वक्त्याला बोलायचे होते तेंव्हा गङ्गायां घोषः असे त्याने बोलले तिनी वृत्तिने गङ्गायां घोषः याने गंगेच्या तटावर, गंगेची शीतलता आणि पवित्रेचा आश्रयाने युक्त असा अर्थ मिलत आहे. कुमारिलभट्टानुयायी तात्पर्याख्या अपर वृत्तिपण मानत आहे. अभिधाने प्राप्त अर्थ शक्यार्थ आहे. अर्थात् हा अर्थ शक्तिने प्राप्त आहे या पदाचा हा अर्थ याला शक्ति असे म्हणतात. या शब्दाची याच अर्थामध्ये शक्ति आहे असे कसेकाय जानावे - अतः ते म्हणतात -

शक्तिग्रहः -

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यात् व्यवहारतश्च ।
वाक्यस्य शेषात् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥१६८॥

व्याकरणात् - प्रकृतिप्रत्ययादीनां शक्तिग्रहः व्याकरणात् भवति । यथा भू सत्तायाम् इति उक्तत्वात् भूधातोः सत्तायां शक्तिग्रहः। तथैव । वर्तमाने लट्' इति लटः वर्तमाने शक्तिग्राहकं व्याकरणम्।।

उपमानात् - ' सिंहो माणवकः' इत्यादौ सिंहशब्दवाच्यशौर्यादियुक्तत्वेन शक्तिग्रहः माणवके।

कोशात् - 'अप्येकदन्तहेरम्बलम्बोदरगजाननाः' इति कोशात् हेरम्बशब्दस्य गजानने शक्तिग्रहः।

आप्तवाक्यात् - ‘कोकिलः पिकपदवाच्यः' इति आप्तवाक्यात् पिकस्य कोकिले शक्तिग्रहः।

व्यवहारः - शब्दः। प्रयोजकवृद्धः ‘गामानय' इति वदति। तच्छृत्वा प्रयोज्यवृद्धः गामानयति। तदवधार्य पार्श्वस्थः बालः गोः आनयनं गामानयेति शब्दप्रयोज्यमित्यवगच्छति।

वाक्यशेषात् - ‘यवमयः चरुर्भवति' इत्यत्र यवशब्दः वृद्धव्यवहारात् दीदृशूकविशिष्टव्रीहिवाचकः उत म्लेच्छव्यवहारात् प्रियंगुवाचकः अथवा कर्नाटव्यवहारात् क्षेत्रगोधूमवाचकः वा इति संशये 'वसन्ते सर्वसस्यानां जायते पत्रशातनम्। मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः' इति वाक्यशेषात् दीर्धशूकविशिष्टे शक्तिग्रहः। यद्वा - कृष्णमाह्वय इति गुरुवाक्यं श्रुत्वा किं प्रथमवर्षे अधीयानः उत द्वितीयवर्षे आहोस्वित् तृतीयवर्षे इति सन्देहे ज्येष्ठम्' इति वाक्यशेषात् तृतीयवर्षीयकृष्णे शक्तिग्रहः।

प्रायः सर्वाणि दर्शनानि स्वमतप्रस्थापनार्थं तर्कं विनियुञ्जते। किन्तु न सर्वत्र तर्कः प्रसारणीयः। उक्तं महाभारते -

व्याकरणात् - प्रकृतिप्रत्ययाचे शक्तिग्रह व्याकरणाने होत आहे. यथा - भू सत्तायाम् असे बोलल्याने भू धातुची सत्तार्थामध्ये शक्तिग्रह आहे. तथैव वर्तमाने लट् असे बोलल्याने लट् ची वर्तमानामध्ये शक्तिग्राह आहे.

उपमानात् -

सिंहो माणवकः इथे सिंह सारखा शौर्यादियुक्त शक्तिग्रह बालकामध्ये,

कोशात् -

कोशाच्या प्रमाणाने हेरम्बशब्दाचा गजाननमध्ये शक्तिग्रह आहे.

आप्तवाक्यात् -

पिक शब्दाची कोकिल अर्थामध्ये शक्तिग्रह आहे.

व्यवहारः -

प्रायोजक वृद्ध गाईला आणा असे म्हणतो. हे ऐकून प्रयोज्य वृद्ध गाईला आणतो. असे जाणून जवळच असलेला बालक गाईला यांना हा अर्थ इष्ट आहे, असे जाणतो.

वाक्यशेषात् -

एक शब्दाने विभिन्न प्रदेशामध्ये भिन्न अर्थाने प्रयोग पहिले जाते. यालाच वाक्यशेष असे म्हणतात. यवमयः चरुर्भवति यावाक्यमध्ये यव शब्दाने काय अभिप्रेत आहे - व्रीहिवाचक, म्लेच्छवाचकव्यवहाराने प्रियंगु(सुगंधी वृक्षविशेष) अथवा कर्नाटकव्यवहाराने क्षेत्रगोधूमवाचक - असा संदेह राहतो तिथे उक्त वचनाने प्रमाण मानून व्रीहिवाचक हे ग्रहण होते. कारण वसंतामध्ये सर्व झाडाच्या पानाचे पतन होत असले तरी जो हरित वर्णाने युक्त राहतो असा वर्णन पाहून इथे त्याच व्रीहिचे ग्रहण केले आहे. अथवा - गुरुने - 'कृष्ण को बुलाओ' असा आदेश दिला हे ऐकून संदेह होऊ शकतो, कोणत्या कृष्णाला बोलावल आहे. प्रथमवर्षीय, द्वितीयवर्षीय अथवा तृतीयवर्षीय? तिथे जेंव्हा 'ज्येष्ठ' या शब्दाचा प्रयोग केला जातो तेंव्हा तृतीयवर्षामध्ये अध्ययन करणाऱ्या छात्राला बोलावल आहे हे निश्चय

होते. प्रायः सर्व दर्शन स्वमत प्रस्थापित करण्याच्या हेतु तर्काचे प्रयोग करत आहे. किन्तु सर्वत्र तर्क नाही केला पाहिजे, महाभारतामध्ये तर्काची सीमा सांगितलेली आहे.

तर्कसीमा-

अचिन्त्याः खलु ये भावाः न तान् तर्केषु योजयेत् ।

नाप्रतिष्ठिततर्केण गम्भीरार्थस्य निश्चयः ॥१६९॥

यतः तर्कः बुध्यधीनः अतः विद्वत्तानुगुण्येन सिद्धान्तः अपि परिवर्तते ।

अतः बुध्यगम्येषु विषयेषु श्रुतिः एव प्रमाणं भवति। तस्मात् उक्तं भर्तृहरिणा

-

कारण तर्क बुद्धिच्या अधीन आहे, अतः विद्वत्तेच्या अनुसार सिद्धान्त पण बदलला जाऊ शकतो. अतः बुद्धिने अगम्य विषयामध्ये श्रुति हेच प्रमाण आहे.

यत्नेनानुमितोप्यर्थः कुशलैः अनुमातृभिः।

अभियुक्ततरैः कैश्चित् अन्यथैवावसीयते ॥१७०॥

॥ब्रह्मकाण्डम् - ३४॥

अर्थात् कुशलपुरुषतारतम्येन तर्कस्य अनवस्थितत्वम्।

प्रज्ञा विवेकं लभते भिन्नैरागमदर्शनैः।

कियद्वा शक्यमुनेतुं स्वतर्कमनुधावतः॥१७१॥

॥वाक्यकाण्डम् - ४८४॥

तत्तदुत्प्रेक्ष्यमाणानां पुराणैरागमैर्विना।

अनुपासितवृद्धानां विद्या नाति प्रसीदति ॥१७२॥

॥वाक्यकाण्डम् - ४८५॥

नानाविधैः आगमसिद्धान्तैः प्रज्ञा विवेकं वैशारद्यं प्राप्नोति । पुराणैः आगमैः विना अयथार्थमेव कल्पयतां अनुपासितवृद्धानां विद्या नाति प्रसीदति। मनुना च उक्तम् -

अनेक आगम आणि सिद्धान्ताने प्रज्ञा विवेक आणि विशारदता प्राप्त करत आहे. पुराण, आगमाच्या विना अयथार्थ ही कल्पना करणारे अनुपासितियांना विद्या प्रसन्न नाही होत.

आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।

यस्तर्केणाभिसन्धत्ते स धर्मं वेद नेतरः॥१७३॥

॥ मनु - १२ ।१०६॥

तस्याः च श्रुतेः अर्थविनिश्चयः इतिहासपुराणाभ्याम् उपष्टम्भितः भवेत् इत्यपि विद्यते उक्तिः -

उस श्रुतिचे अर्थनिश्चय इतिहास आणि पुराणामधून संबंधी असले पाहिजे असि पण उक्ति आहे -

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।

बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरेदिति ॥१७४॥

॥ महाभारतम् - आदिपर्व १।२५॥

यद्यपि एतानि दर्शनानि भिन्नभिन्नमार्गेषु प्रवृत्तानीव अवभासन्ते तथापि सर्वैः प्रतिपाद्यमानं तत्त्वमेकमेव इति कथयति रमणीयः अयं श्लोकः -

यद्यपि हे सर्व दर्शन भिन्न भिन्न मार्गामध्ये प्रवृत्त भासत असले, तथापि त्यांच्या द्वारे कथित तत्त्व एकच आहे, असे हा रमणीय श्लोक सांगत आहे की-

तीर्थक्रियाव्यसनिनः स्वमनीषिकाभिः

उत्प्रेक्ष्य तत्त्वमिति यदमी वदन्ति।

तत्तत्त्वमेव भवतोऽस्ति न किञ्चिदन्यत्

संज्ञासु केवलमयं विदुषां विवादः ॥१७५॥

॥ अभिनवगुप्तः ॥

तीर्थक्रियाव्यसनिनः -विद्वांसः।

* * * * * * * * * * * * * *

वैयाकरणका

शास्त्रसाधारणांशाः –

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इति व्याकरणम्। साधुशब्दानामनुशासनार्थं प्रवृत्तमिदं व्याकरणशास्त्रम्। यद्यपि अद्यत्वे पाणिनेः व्याकरणं लोके जेगीयते। तथापि बहूनि व्याकरणशास्त्राणि आसन्नादौ ।

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इति व्याकरणम् ।
ज्याने शब्द उत्पन्न केले जातात ते म्हणजे व्याकरण. योग्य शब्दाच्या अनुशासनाकरीता हे व्याकरणशास्त्र प्रवृत झाले आहे. पाणिनि व्याकरण हे आतापर्यन्त जगप्रसिद्ध आहे. तरीसुद्धा पूर्वीचे अनेक व्याकरणशास्त्र आहेत.

तानि च -

व्याकरणशास्त्राणि –

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकलं पाणिनीयकम् ॥१७६॥

श्लोकान्तरञ्च –

प्रथमं प्रोच्यते ब्राह्मं द्वितीयमैन्द्रमुच्यते।
याम्यं प्रोक्तं ततो रौद्रं वायव्यं वारुणं तथा ॥
सावित्रं च तथा प्रोक्तमष्टमं वैष्णवं तथा ॥१७७॥

॥भविष्यपुराणम्॥

व्याकरणशास्त्रस्य अध्ययनस्य प्रयोजनं तु रक्षोहागमलघ्वहादिकम् इति

उक्तं महाभाष्ये। सम्प्रति प्रायः व्याकरणस्य प्रधानं प्रयोजनं तु भाषाशुद्धिः एव। अतः अध्येतव्यमेव व्याकरणम्। उक्तं च -

व्याकरणशास्त्राच्या अध्यायनाचे प्रयोजन रक्षा, ऊह, आगम, लघु, असंदेह इ, असे महाभाष्यात म्हंटले आहे, आताच्या काळात व्याकरणाचे प्राधान्य प्रयोजन हे भाषाशुद्धी आहे. म्हणून व्याकरणशासत्रेचे अध्ययन करावे.

प्रयोजनम् -

यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत् ॥१७८॥

सकल - समग्रे, शकलम् - खण्डे, सकृत् - एकवारे, शकृत् - मले। मुनित्रयेण परिशोधितत्वात् संस्कृतव्याकरणं त्रिमुनि व्याकरणमिति प्रसिद्धम्। तत्र पाणिनिः सूत्रकारः, वररुचिः वार्तिककारः, पतञ्जलिः भाष्यकारः। एतेषु उत्तरोत्तरमुनीनां वाक् प्रमाणमिति परिगण्यते । पाणिनिना न केवलं सूत्राणि लिखितानि धातुपाठादयः अपि तेन कृताः। तस्य कृतयः तु -

तिन मुनिंणी व्याकरणाचे परीशोधण केले आहे त्यामुळे त्रिमुनीव्याकरण या नावाने पण प्रसिद्ध आहे, तिथे पाणिनि सूत्रकार, वररूची वार्तिककार, पतंजलि भाष्यकार आहेत, यांच्यामध्ये उत्तरोत्तर मुनींची वाणी प्रमाणाने परिगन्यते. पाणिनिंनि केवल सूत्रच नाही तर धातुपाठ देखील केला आहे.

पाणिनेः कृतिः -

अष्टकं धातुपाठश्च गणपाठस्तथैव च।
लिङ्गानुशासनं शिक्षा पाणिनीयममी क्रमात् ॥१७९॥

पाणिनीयसूत्राणां बीजभूतानि माहेश्वरसूत्राणि । तानि चचतुर्दशसंख्याकानि। १४ सूत्रेभ्यः १४ अनुबन्धेभ्यः ४४ सप्रयोजनाः प्रत्याहाराः सम्भवन्ति । कस्मात् अनुबन्धात् कति प्रत्याहाराः भवन्ति इत्येतं विषयं श्लोकोऽयं दर्शयति ।

पाणिनीयसूत्रांच मूल माहेश्वरसूत्र आहे, माहेश्वरसूत्रामध्ये एकूण चौदा सूत्र आहेत १४ सुत्रांपासून, १४ अनुबंधांपासून, ४४ सप्रयोजनांनी प्रत्याहार होतात. कोणत्या अनुबंधाने किती प्रत्याहार होतात या विषयि खालील श्लोक दाखवीत आहे.

प्रत्याहारा -

एकं त्रीणि पुनश्चैकं चत्वार्येकं त्रयं चतुः ।
एकं द्वे षट् तथैवैकं पञ्च पञ्च षडेव च ॥१८०॥

१ ण्-एकम्-अण्। अण्-इत्येव प्रत्याहारद्वयं विद्यते। 'अणुदित्सवर्णस्य चाप्रत्ययः' इति सूत्रे परणकारः गृह्यते तद्भिन्नस्थानेषु 'द्वलोपे पूर्वस्य दीर्घोऽणः' इत्यादिषु पूर्वणकारः। २ क्-त्रीणि-अक् इक् उक्। ३ ङ्-एकम्-एङ्। ४ च्-चत्वारि-अच् इच् एच् ऐच्। ५ ट्-एकम्-अट्। ६ ण्-त्रयम्-अण् इण् यण् । ७ म्- त्रयम्-अम् यम् ङम् ञम्। ८ ञ्-एकम्-यञ्। ९ ष् - द्वे-झष् भष्। १० श्-षट्-अश् हश् वश् झश् जश् बश्। ११ व्-एकम्-छव्। १२ य्-चत्वारि-यय् मय् झय् खय् चय्। १३ र्-पञ्च-यर् झर् खर् चर् शर्। १४ ल् -षट्-अल् हल् वल् रल् झल् शल्। रलयोः सूचकः र इत्यपि प्रत्याहारः सम्भवति सः न अत्र सूचितः। एवञ्च चतुश्चत्वारिंशत् प्रत्याहाराः। तत्र अप्रत्याहारेण स्वराः सङ्गृह्यन्ते स्वराः हस्वदीर्घप्लुतभेदेन

भिन्नाः| ह्रस्वादीनामुच्चारणकालः एवं निर्दिष्टः –

१ण् – एक - अण्, अण् हेच दोन प्रत्याहार बनतात, 'अणुदित्सवर्णस्य चाप्रत्ययः' या सूत्राने परणकार गृहीत धरतात, त्या स्थानांमध्ये "ढ्रलोपे पूर्वस्य दीर्घोऽणः" इत्यादि सूत्राने पूर्वणकार स्वीकारतात. २क् – तीन - अक्, इक्, उक्. ३ङ् – एक – एङ्. ४च् – चार - अच्, इच्, एच्, ऐच्. ५ट् – एक -अट्. ६ ण् - तीन अण्, इण्, यण्. ७ म् - तीन - अम्, यम्, डम्, ञम्. ८ञ् - एक - यञ्. ९ ष् - द्वे - झष् भष्. १०श् – सहा – अश्, हश्, वंशू, झशू, जश्, बश्. ११व् - एक – छव्. १२य् – चार – ययू, मयू, झय्, खय्, चय्, १३र् - पाच - यर्, झर्, खर्, चर्, शर्. १४लू – सहा – अल्, हल्, वल्, रल्, झल्, शल्. रलयोः सूचकः र हे सुद्धा प्रत्याहार बनतात, ते इथे सूचित केले नाहीत, असाप्रकारे ४४ प्रत्याहार आहेत. इथे अच् प्रत्याहाराणे स्वर वर्ण संघठीत करतात. स्वर हे ह्रस्व, दीर्घ, प्लुत या तीन प्रकारे भेद दिसून येतात. त्यांचे उच्चारणकाल असाप्रकारे निर्दिष्ठ केले आहे.

ह्रस्वाद्युच्चारणकालः –

एकमात्रो भवेत् ह्रस्वो द्विमात्री दीर्घउच्यते ।

त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रिकम् ॥१८१॥

॥ याज्ञवल्क्यशिक्षा ॥

अण् इण् इति विद्यते प्रत्याहारद्वयम् । द्वौ अनुबन्धभूतणकारौ च निर्दिष्टौ माहेश्वरसूत्रे। येन च कस्मिन् प्रत्याहारे कः णकारः आश्रयणीयः इति स्यात् सन्देहस्पन्दः । अतः उक्तम्

अण्, इण् हे दोन प्रत्याहार आहेत, अण्, इण् या प्रत्यहारामधील णकार माहेश्वरी सुत्रामध्ये निर्दिष्ठ केले आहे, त्यामुळे कोणत्या प्रत्याहारामध्ये कोणता णकार स्वीकारावा हा संदेह निर्माण होतो, म्हणून म्हणतात –

अण्-इण-व्यवस्था -

परेणैवेण्ग्रहाः सर्वे पूर्वेणैवाण्ग्रहा मताः।

ऋतेऽणुदित्सवर्णस्येत्येतदेकं परेण तु ॥१८२॥

'अणुदित्सवर्णस्य चाप्रत्ययः' इति सूत्रं विहाय यत्र अण्प्रत्याहारः उक्तः तत्र पूर्वणकारस्य (अइउण्), यत्र इण्प्रत्याहारः उक्तः तत्र परणकारस्य (लण्) च ग्रहणं कर्तव्यम्। अणुदित्सूत्रे तु परणकारस्यैव।

एतेषाम् अकारादीनां वर्णानाम् उत्पत्तिस्थानानि पाणिनीयशिक्षायाम् अष्ट निर्दिष्टानि।

'अणुदित्सवर्णस्य चाप्रत्ययः' या सूत्राच्या अभावी अण् (अइउण्) या प्रत्याहारामध्ये उक्त णकार हा पूर्वणकार घ्यावा आणि इण् [इउण् ऋलृक् एओङ् ऐऔच् हयवरट् लण्] या प्रत्याहारमध्ये लण् यातील णकार स्वीकारावा.

'अणुदित्सवर्णस्य चाप्रत्ययः' या सूत्रानेतर परणकार स्वीकारला जातो.

माहेश्वरी सूत्रातील अकरादि वर्णांचे उत्पत्तिस्थान [वर्ण उच्चारणस्थान] पाणिनिशिक्षामध्ये आठ प्रकारे निर्दिष्ठ केले आहे.

तानि च –

वर्णोच्चारणस्थानानि –

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।

जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥१८३॥

॥ पाणिनीयशिक्षा -१६॥

तत्र उरः- वक्षस्थानं प्रथम, कण्ठस्थानं द्वितीयं, शिरस्स्थानं तृतीयं, तालुस्थानं चतुर्थं, जिह्वामूलस्थानं तु पञ्चमं, नासिकास्थानं पष्ठम्, ओष्ठस्थानं

सप्तमं, दन्तस्थानञ्च अष्टमम्।

एषु स्थानेषु वर्णोत्पत्तिः अनेन क्रमेण भवति –

तिथे उर – वक्षस्थान पहिले, कण्ठस्थान दुसरे, शिरस्स्थान तिसरे, तालुस्थान चौथे, जिह्वामूलस्थान पाचवे, नासिकास्थान सहावे, ओष्ठस्थान सातवे आणि दन्तस्थान हे आठवे आहे.
या स्थानामध्ये वर्णउत्पत्ति या खालील क्रमाने होती.

वर्णोत्पत्तिप्रक्रिया –

आत्मा बुध्या समेत्यर्थान् मनो युक्त्ङे विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्॥
मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् ॥१८४ ॥

॥ पाणिनीयशिक्षा -६॥

सः आत्मा घटपटादिपदार्थान् बुद्धिविषयीकृत्य वक्तुमिच्छया मनः युनक्ति प्रेरयति वा। मनः कायाग्निम् (जठराग्निम्) अभिहन्ति । सः कायाग्निः प्राणसंज्ञं पवनं प्रेरयति । कायाग्निप्रेरितः मारुतः उरसि हृद्देशे चरन् गम्भीरं स्वरं जनयति। ततः सः वायुः कण्ठादिस्थानेषु आघातं विधाय वर्णान् उत्पादयति।

तो आत्मा घटापदार्थांना बुद्धीविषयीकृत्य बोलण्याच्या इच्छेने मानासोबत संयुक्त होतो प्रेरित होतो, मन हे कायाग्निला [जठराग्निला] प्रेरित करतो, तो कायाग्निला प्राणवायुला प्रेरित करतो, कायाग्निला प्रेरित झालेला वायु वक्षप्रदेशामध्ये [हृदयामध्ये] येवून गंभीर स्वर उत्पन्न करतो, तिथून तो वायु कण्ठादिस्थानामध्ये आघात करून वर्णांना उत्पन्न करतो.

एते वर्णाः कथमुच्चरणीयाः इत्यत्र पाणिनीयशिक्षायामेव निर्दिष्टम् -

हे वर्ण कसाप्रकारे उच्चारण करावे ते पाणिनीशिक्षा मध्ये सांगितले आहे.

वर्णोच्चरणविधिः -

व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।

भीता पतनभेदाभ्यां तद्वद्वार्णान् प्रयोजयेत् ॥१८५॥

॥ पाणिनीयशिक्षा-२५॥

येन प्रकारेण पतनभेदाभ्यां भीता व्याघ्री सावधानतया स्वशावकान् दंष्ट्राभ्यां धृत्वा अन्यत्र नयति तथैव वर्णानामुच्चरणेऽपि जागरूकतया भाव्यम्।

यः वर्णः स्वरः वा यथा उच्चरणीयः तथा यदि न उच्चार्यते तर्हि कः दोषः इति चेदुच्यते –

ज्या प्रकारे वाघीन आपल्या पिल्लांना आपल्या तोंडामध्ये सावकाश पणे इजा न होता एक जागेवरून दुसऱ्या जागेवर नेते त्या प्रकारे वर्ण उच्चारण जगरुत पणे करावे. जे स्वर किंवा वर्ण ज्या प्रकारे उच्चारण करायला हवे त्या प्रकारे जर उच्चारले नाही तर कोणता दोष होतो, ते म्हणतात –

स्वरवर्णादिदोषे अनिष्टप्रसक्तिः -

यदि वर्णोच्चारणे दोषः तर्हि तादृशवर्णट्टटितं पदं अभीष्टमर्थं न गमयति । यथा लोके फलेच्छुः कश्चन महाप्राणमनुच्चार्य पलमानय इति वदन् अनिष्टं मांसं प्राप्नुयात्। अतः उक्तं सोदाहरणं पाणिनिना मन्त्रमुपलक्ष्य –

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तः न तमर्थमाह।

स वाग्वज्जो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥१८६॥

॥पाणिनीयशिक्षा-५३॥

स्वरतः वर्णतः वा रहितः वैदिकमन्त्रः मिथ्याप्रयुक्तः सन् अभीष्टं प्रयोजनं नैव साधयति । स तु दुष्टप्रयोगः वाग्वज्रः भूत्वा यज्ञकर्तारमेव घातयति। त्वष्ट्रा कारिते आभिचारिके यज्ञे 'इन्द्रशत्रुर्वर्धस्व' इति मन्त्रः आसीत्। अनेन मन्त्रेणैव याज्ञिकैराहुतयः प्रदत्ताः किन्तु तैः मन्त्रे आद्युदात्तः स्वरः पठितः। येन इन्द्रः शत्रुः शातयिता (घातकः) यस्य सः इति बहिव्रीहिसमासलभ्यः अर्थः सिद्धः। अतः तत्र सम्भूतस्य वृत्रस्य संहारकः इन्द्रो बभूव । तैः मन्त्रे यदि अन्तोदात्तता कृता अभविष्यत् तदा तु वृत्रः इन्द्रस्य शातयिता अभविष्यत्। एवं दोषे उच्चरिते अभीष्टार्थाप्राप्तिः स्यात् सुष्ठु उच्चरिते तु अभीष्टार्थप्राप्तिः भवति। उक्तञ्च शुतौ 'एकश्शब्दः सुज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति' इति।

सूत्राणि व्याकरणशास्त्रे षोढा प्रविभक्तानि । तद्यथा -

स्वर किंवा वर्ण रहित वैदीक मंत्र जर उच्चारला तर अभिष्ट प्रयोजन साधत नाही, तो दुष्ट प्रयोग वाग्वज्र होऊन यज्ञ करत्याचाच घात करतो, राक्षसाने करविलेल्या आभिचारिक यज्ञामध्ये 'इन्द्रशत्रुर्वर्धस्व' असा मंत्र होता, याच मंत्राने यज्ञकर्त्याने आहुत्या दिल्या परंतु या मंत्राचा आद्युदात्तः स्वरामध्ये पाठ केला, म्हणून त्या रक्षसाचा संहारक इन्द्र झाला, असा प्रकारे दोषयुक्त उच्चारनाणे इष्ट अर्थ प्राप्त होत नाही आणि दोष रहित उच्चारनाणे इष्ट अर्थ प्राप्त होतो.

व्याकरणामध्ये सहा प्रकारचे सूत्र आहेत, ते असा प्रकारे -

सूत्रभेदाः -

संज्ञा च परिभाषा च विधिर्नियम एव च।

अतिदेशोऽधिकारश्च षडिविधं सूत्रलक्षणम् ॥१८७॥

संज्ञासूत्रम् - संज्ञासंज्ञिभावप्रत्यायकं सूत्रम्। यथा 'वृद्धिरादैच्' । एतत् सूत्रं वृद्धिः इति संज्ञा, आ ऐ औ इत्येते संज्ञिनः इत्येतं विषयं प्रत्याययति।

परिभाषासूत्रम् - अनियमे नियमकारिणी परिभाषा। नियमरहितस्थानेषु येन सूत्रेण नियमः क्रियते तत्सूत्रं परिभाषासूत्रम् । यथा 'तस्मिन्निति निर्देष्टे पूर्वस्य' इति सूत्रं सप्तमीविभक्तिनिर्देशद्वारा विधीयमानेषु कार्येषु नियमनमवबोधयति।

विधिसूत्रम् - आदेशादिविधायकं सूत्रम्। यत्सूत्रम् आदेशागमह्रस्वदीर्घादीन् विधत्ते तत्सूत्रं विधिसूत्रम्। यथा 'इको यणचि' । सूत्रमिदम् इकः स्थाने यण् आदिशति ।

नियमसूत्रम् - प्राप्तस्य विधेः नियामकं सूत्रम्। यथा 'रात्सस्य'। 'संयोगान्तस्य लोपः' इति सूत्रेण संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात् इति निर्दिष्टम्। किन्त्वेतत्सूत्रम् तं विधिं नियमयति रेफात् संयोगान्तस्य सस्यैव लोपः स्यात् इति प्राप्तार्थं सङ्कोचयन् ।

अतिदेशसूत्रम् -अतस्मिन् तद्धर्मापादकं सूत्रम्। यथा 'गोतो णित् । सूत्रमिदं णिद्भावरहिते सर्वनामस्थाने णिद्भावमापादयति।

अधिकारसूत्रम् - उत्तरोत्तरेषु स्वघटकपदसमर्थकं सूत्रम्। यथा 'कारके' । कर्तुरीप्सिततमं कर्म इत्यादिषु सूत्रेषु स्वघटकपदं समर्थयति। अतः कर्मादीनां कारकत्वं सम्भवति।

संज्ञासूत्र - संज्ञासंज्ञिभावप्रत्यायक सूत्र आहे,

उदा:- 'वृद्धिरादैच्' या सूत्रामध्ये वृद्धी ही संज्ञा आहे आणि आ, ऐ, औ हे संज्ञी आहेत,

परिभाषासूत्र – जिथे नियम नाही तिथे नियम करणारे सूत्र म्हणजे परिभाषा

सूत्र होय. नियमरहित स्थानामध्ये ज्या सूत्राने नियम केला जातो ते सूत्र म्हणजे परिभाषा सूत्र.

उदा:- "तस्मिन्निति निर्देष्टे पूर्वस्य" या सूत्राने सप्तमीविभक्तिनिर्देशद्वारा जे कार्य होते तिथे नियम करतो .

विधीसूत्र – आदेशविधायक सूत्र आहे. जे सूत्र आदेश, आगाम, ऱ्हस्व, दीर्घ यांचे विधान करतो ते सूत्र विधी सूत्र आहे.

उदा:- 'इको यणचि' या सूत्राने इक या स्थानी यण् चा आदेश होतो .

नियमसूत्र – प्राप्त विधीचा नियामक सूत्र.

उदा:- 'रात्सस्य' आणि 'संयोगान्तस्य लोपः' या सूत्राने संयोगान्त जे पद आहे त्याच्या अंतिम पदाचा लोप होतो. संयोगाच्या अन्ति जर रेफ असेल तर त्याच्या पुढील वर्णाचा लोप होत असेल तर सकारचाच होतो.

अतिदेशसूत्र – जे जस नाही त्यावर तसा धर्म आरोपित करणे म्हणजे अतिदेश सूत्र होय.

उदा:- "गोतो णित्" हे सूत्र णिद्भावरहित सर्वनामस्थानामध्ये णिद्भाव आरोपित करतो.

अधिकारसूत्र – उत्तरोत्तर सूत्रामध्ये स्वघटकपदांचा समर्थन करणारे सूत्र म्हणजे आधिकार सूत्र होय.

उदा:- "कारके" आणि "कर्तुरीप्सिततमं कर्म" हे सूत्र स्वघटकपदांचे समर्थन करतात. म्हणून कर्मादींचे कारकवत्व संभव होते.

सूत्रेषु अदृष्टानि पदानि सूत्रान्तरात् अनुवर्तनीयानि भवन्ति । अनुवृत्तिः च त्रिधा स्यात् । तदेवमुक्तमभियुक्तैः –

सूत्रामध्ये जे अद्रुष्ठ पद आहे त्याच पदांची अनुवृति करावी, तीन प्रकारची अनुवृति आहे,

अनुवृत्तिः -

सिंहावलोकिताख्यश्च मण्डूकप्लुतिरेव च।
गङ्गास्त्रोत इति ख्याता अधिकारास्त्रिधा मताः ॥१८८॥

क्वचित् सिंहावलोकनन्यायेन अनुवर्तनं भवति । यथा सिंहः वने व्रजन् तदा तदा पृष्ठतः विलोकयति तथोत्तरसूत्रस्थपदानां पूर्वसूत्रेषु अनुसन्धानम् सिंहावलोकनन्यायः। यथा 'उपपदमतिङ्' (२-२-१९) सूत्रात् 'कुगतिप्रादयः' (२ २-१८) सूत्रं प्रति 'अतिङ्' इति पदस्य अपकर्षः ।

क्वचित् मण्डूकप्लुतिन्यायेन अनुवर्तनम् । यथा मण्डूकः प्लवन् स्थानात् स्थानान्तरं गच्छति तथा सूत्रस्य सूत्रस्थपदस्य वा कानिचन सूत्राणि लङ्घयित्वा प्रवृत्तिः मण्डूकप्लुतिन्यायः । यथा 'परिक्रयणे सम्प्रदानमन्यतरस्याम" (१-४-४४) इति सूत्रात् 'अन्यतरस्याम् पदस्य' अभिनिविशश्च (१-४-४७) इति सूत्रे प्रवृत्तिः ।

अन्यत्र गङ्गास्त्रोतन्यायेन अनुवर्तनं भवति । यथा गङ्गाप्रवाहः अविच्छिन्नरूपेण गच्छति तथा सूत्रस्य सूत्रस्थपदस्य वा अविच्छिन्नरूपेण अग्रिमसूत्रेषु प्रवृत्तिः गङ्गास्त्रोतन्यायः । यथा 'कारके' (१-४-२३) इत्यस्य 'स्वतन्त्रः कर्ता' (१-४-५५) इति सूत्रपर्यन्तमनुवर्तनम् ।

क्वचित् सिंहावलोकन्यायेन अनुवृति होते, ज्या प्रकारे वनामध्ये सिंह चालत असताना पुन्हा पुन्हा मागे वळून पाहतो त्या प्रकारे आधीच्या सूत्रामध्ये त्याची अनुवृति होते.

उदा:- उपपदमतिङ्' (२-२-१९) या सूत्रातील 'अतिङ्' या पदाची

'कुगतिप्रादयः' (२ २-१८) या सूत्रामध्ये त्याचा अपकर्ष होतो.
कुठे कुठे मण्डूकप्लुतिन्यायाने अनुवृति होते,
ज्या प्रकारे बेडूक एका जागेवरून दुसऱ्या जागेवर लांब उडी मरतो त्या प्रकारे सूत्र किंवा सूत्रातील काही पद त्याच्या पुढील काही सूत्र सोडून त्याची अनुवृति होते, त्याला मण्डूकप्लुतिन्याय असे म्हणतात.
उदा :- "परिक्रयणे सम्प्रदानमन्यतरस्याम्" (१-४-४४) सूत्रातील 'अन्यतरस्याम्' पदाची अनुवृति "अभिनिविशश्च" (१-४-४७) या सूत्रात दिसून येते,
अन्यत्र गङ्गास्त्रोतन्यायाची अनुवृति होते, ज्या प्रकारे गंगेचा प्रवाह मध्ये कोणतेही व्यवधान न येता सतत वाहत राहते त्या प्रकारे सूत्र किंवा सूत्रातील पद अविच्छिन्नरूपाने पुढील सूत्रामध्ये अनुवृत्त होते, त्याला गङ्गास्त्रोतन्याय असे म्हणतात,
उदा :- "कारक"' (१-४-२३) या सूत्राची "स्वतन्त्रः कर्ता" (१-४-५५) या सूत्रापर्यन्त अनुवृति होते.

सूत्रेषु क्वचित् बहुलम् इति पदं प्रयुज्यते । बहुलपदघटितसूत्रप्रवृत्तिः चतुर्धा स्यात् -

सूत्रामध्ये कुठेतरी बहुल या पदाचा उपयोग होतो, आणि बहुल हे पद ज्या सूत्रामध्ये दिसून येते ते सूत्र प्रकारे प्रवृत होते.

बहुलम् -

क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचित् विभाषा क्वचिदन्यदेव ।
विधेर्विधान बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥१८९॥

क्वचित् नित्यप्रवृत्तिः, क्वचित् नित्याप्रवृत्तिः, क्वचित् विकल्पेन प्रवृत्तिः, क्वचित् अन्यरीत्या प्रवृत्तिः इति चतुर्धा बाहुलकस्य प्रवृत्तिः । यथा-

'तृतीया सप्तम्योर्बहुलम्' इति सूत्रे बहुलग्रहणात् सुमद्रम् उन्मत्तगङ्गम् इत्यादौ नित्यमम्भावः। अपदिशम् अपदिशेन इत्यादौ विकल्पेन अम्भावः । यथा वा 'विशेषणं विशेष्येण बहुलम्' इति सूत्रे बहुलग्रहणात् कृष्णसर्पः इत्यत्र नित्यं समासः। 'रामो जामदग्न्यः' इत्यत्र नित्यम् असमासः । क्वचिदन्यदेव इत्यस्य उदाहरणं तु एकवीरः इति । बहुलग्रहणात् वीरैकः इति रूपं न भवति किन्तु एकवीरः इति भवति ।

क्वचित् नित्यप्रवृत्ति, क्वचित् अनित्यप्रवृत्ति, क्वचित् विकल्पेन प्रवृत्ति, क्वचित् अन्यरीत्या प्रवृत्ति ह्या बहुल या शब्दाच्या चार प्रवृति आहेत.
उदा :- "तृतीया सप्तम्योर्बहुलम्" या सूत्रामध्ये बहुल ग्रहनाणे सुमद्रम्, उन्मत्तगङ्गम् इ. ठिकाणी नित्य 'अम्' भाव होतो. अपदिशम्, अपदिशेन इ. ठिकाणी विकल्पाने 'अम्' भाव होतो. 'रामो जामदग्न्यः' या ठिकाणी अनित्य समास होतो आणि असाच प्रकारे "विशेषणं विशेष्येण बहुलम्" या सूत्रातील बहुल ग्रहणाने कृष्णसर्प: या ठिकाणी नित्य समास होतो, क्वचित् अन्य ठिकाणी याचेच एकवीर: हे उदाहरण दिसून येते, बहुल ग्रहणाने वीरैक: हे रूप होत नाही परंतु एकवीर: हे रूप होते.

सूत्रैः पदानि व्युत्पाद्यन्ते । तेषु पदेषु कानिचन पदानि अव्ययपदेनाभिधीयन्ते। अव्ययस्य स्वरूपमेवमुक्तम्।

सूत्रांद्वारे पद उत्पन्न केले जातात, त्या पदांपैकी काही पद हे अव्ययपद आहेत, अव्ययाचे स्वरूप या प्रकारे सांगितले आहे.

अव्ययम् -

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्नव्येति तदव्ययम् ॥१९०॥

यत् सर्वेषु लिङ्गेषु सर्वासु विभक्तिषु सर्वेषु वचनेषु न परिवर्तते तत् अव्ययम्। यथा - प्रातर् ।

आ आङ् इति विद्यते अव्ययद्वयम् । न तयोः प्रयोगकाले भेदः दृश्यते आङः ङकारस्य इत्संज्ञया लुप्तत्वात्। अतः तद्विवेकार्थमाह –

जे कोणत्याच लिंगामध्ये, कोणत्याच विभक्तीमध्ये अथवा कोणत्याही वचनामध्ये ज्याचे परिवर्तन होत नाही ते म्हणजे अव्ययपद होय.

यथा – प्रातर्.

आ आणि आङ् हे दोन अव्ययपद आहेत, या दोनी पदाचे प्रयोगकाळामध्ये कोणतेही भेद दिसून येत नाही, आङ् या पदातील 'ङ्काराची' फक्त इत्संज्ञा करून लोप होतो. म्हणून त्याच्या विवेकार्थ म्हणतात –

आ-आङ्-भेदः –

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः।
एतमातं ङित्तं विद्यात् वाक्यस्मरणयोरहित्त् ॥१९१॥

ईषदर्थे क्रियायोगे मर्यादार्थे अभिविध्यर्थे च दृष्टः आकारः आङः इति ज्ञेयः। वाक्ये स्मरणे च दृष्टः आकारः अङितः इति विज्ञेयः। ईषदर्थे - आ उष्णम् (ओष्णम्) ईषदुष्णमित्यर्थः। क्रियायोगे - आ -अगच्छत् [आगच्छत्]। मर्यादार्थे - 'तेन विना' मर्यादा। यत्र अवधेः अनन्तर्भावः सा मर्यादा। यथा आ - अम्बुधेरस्य (आम्बुधेरस्य) राज्यम्। अम्बुधिमनन्तर्भाव्य अस्य राज्यं वर्तते इत्यर्थः। अभिविधिः - 'तेन सह' अभिविधिः। यथा आ-इन्द्रात् (एन्द्रात्) हरिभक्तिः। इन्द्रमपि अन्तर्भाव्य हरिभक्तिः इत्यर्थः। वाक्ये स्मरणे च अङित्। वाक्ये यथा 'आ एवं नु मन्यसे।' स्मरणे 'आ एवं किल तत्।'

तेषु अव्ययेषु प्रादयः अपि अन्यतमाः। ते च –

ईषद, क्रियायोग, मर्यादा, अभिविधी, या आर्थि जो आकार दिसतो तो ङ्कार संहित आङ् या अव्ययपदातील आहे.

वाक्य आणि स्मरण या आर्थि ङ्काररहित आकार हा 'आ' या अव्ययपदातील आहे. ईषदर्थे-आ उष्णम् (ओष्णम्) थोडेसे गरम या अर्थी, क्रियायोगे–आ-अगच्छत् [आगच्छत्] । मर्यादाणे – त्या शिवाय मर्यादा या अर्थी, जिथे अवधीचा अंतर्भाव होत नाही ती मर्यादा. यथा आ-अम्बुधेरस्य (आम्बुधेरस्य) राज्यम् | अम्बुधीला सोडून अंतर्भाव याचे राज्य आहे. अभिविधिः - तेन सह' अभिविधिः। यथा आ-इन्द्रात् (एन्द्रात्) हरिभक्तिः। हरिभक्तिमध्ये इंद्राचा देखील अंतर्भाव आहे. वाक्य आणि स्मरण या अर्थी प्रयोग केलेला आकार हा ङ्काररहित आहे.

अङित्। वाक्ये यथा 'आ एवं नु मन्यसे ।' स्मरणे 'आ एवं किल तत्।'

त्या अव्ययामध्ये प्रादी सुद्धा आहेत,

प्रादयः -

प्रपरापसमन्ववनिर्दुरभिव्यधिसूदतिनिप्रतिपर्यनवः।

उप आ ङिति विंशतिरेष सखे उपसर्गगणः कथितः कविना ॥१९२॥

श्लोकेऽस्मिन् निस् दुस् च परित्यक्ते। निर् दुर् अनयोः सादृश्यात् । ते च प्रादयः क्रियायोगे उपसर्गसंज्ञां लभन्ते। तेषां योगात् अर्थे परिवर्तनं स्यात्।

तदुक्तम् –

वरील श्लोकामध्ये निस् आणि दुस् या दोन प्रादी नाहीत, कारण निर् आणि दुर् या दोघासारखे आहे. त्या प्रादींची क्रियायोगामध्ये उपसर्ग संज्ञा होते, उपसर्ग संज्ञे नंतर त्यांच्या अर्थात देखील परिवर्तन होईल.

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।

प्रहाराहारसंहारविहारपरिहारवत् ॥१९३॥

उपसर्गः धातोः अर्थं बलादन्यत्र नयति। यथा 'हृञ् हरणे' धातोः उपसर्गयोगात् प्रहारादयः अर्थाः। यथा वा उपचयः वृद्धिः, अपचयः क्षयः। किन्तु उपसर्गयोगे अन्यः एव अर्थः भासते इति नियमः न विद्यते। उपसर्गवशात त्रिधा अर्थगतिः सम्भवति । तदुक्तम् –

उपसर्गसंहित धातूंचा अर्थ बलपूर्वक परिवर्तन होतो.

उदाः- **'हृञ् हरणे'** हा धातु उपसर्गाच्या योगात प्रहार इ. अर्थ होतो. जसे उपचय म्हणजे वृद्धी आणि अपयच म्हणजे क्षय. किंतु उपसर्गयोगामध्ये अन्य अर्थ होईल असा नियम नाही. उपसर्गाच्या योगात तीन अर्थ होण्याची संभवणा आहे.

धात्वर्थं बाधते कश्चित् कश्चित् तमनुवर्तते।

विशिनष्टि तमेवार्थम् उपसर्गगतिस्त्रिधा ॥१९४॥

कदाचित् उपसर्गः धात्वर्थं बाधते। यथा चयनार्थकचिञ्धातोः उपोपसर्गयोगात् वृध्यर्थः उपचयः इत्यत्र । कदाचित् धात्वर्थमेव अनुवर्तते । यथा सूते प्रसूते। कदाचित् तमेवार्थं विशेषयति। यथा सरति अनुसरति। अनुसृत्य सरति इति धात्वर्थं विशेषयति।

उपसर्गवशात् अनेके अर्थाः प्रपञ्चिताः भवन्ति । प्रधान्येन उपसर्गवशात् के के अर्थाः प्रकटिताः भवन्ति इत्ययं विषयः एवं सङ्गृहीतः –

कदाचित् उपसर्ग हा धातूच्या अर्थाला बाधित करतो, जसे कि चयनार्थ चिञ् धातुला उपसर्ग लावल्यास उपचय हा शब्द बनतो ज्याचा अर्थ वृद्धी असा आहे आणि कदाचित धातूचा अर्थ जसास तसा राहतो, जसे कि सुते

प्रसुते। कदाचित तो अर्थ विशेष रूपाने लागतो, जसे कि सरती अनुसरती अनुसृत्य सरती हा धातूचा विशेष रूपाने अर्थ आहे.
उपसर्गमुळे धातूचे अनेक अर्थ होतात, प्राधान्याने उपसर्गामुळे जे जे अर्थ प्रगट होतात त्या विषयी ते सांगतात -

उपसर्गः- द्योत्याः अर्थाः – प्र –

प्रादिकर्मण्युपरमे दिग्योगैश्चर्यजन्मसु।
नर्मप्रेम्णोः प्रकर्षेऽग्रे ज्ञाने प्रसवभूषणे ॥१९५॥
दोषे नियोगेऽवसरे सेवासाहसशुद्धिषु।
उपयोगे प्रकथनेऽनवधानबहुत्वयोः ॥१९६॥
माने हिंसाशास्त्रनाम्नोर्वञ्चनाविपर्यये।
सन्न्यासमृत्योः कालेऽथ तथा स्यान्मन्दमुख्ययोः ॥१९७॥

१ आदिकर्मादिषु - प्रक्रमते भोक्तुम्। २ उपरमे - उपरताः जनाः। प्रैति। ३ दिग्योगे - प्राची दिक्। ४ ऐश्वर्ये - प्रभुर्देशस्य। ५ जन्मनि - हिमवतः गङ्गा प्रभवति। ६ नर्मणि - प्रहसति। ७ प्रेम्णि - प्रणयः। ८ प्रकर्षे - प्रतपति। प्रवर्धते। ९ अग्रे - अग्रं हस्तस्य प्रहस्तः। पादाग्रं प्रपदम्। १० ज्ञाने - प्रणधिः। (गुप्तचरः प्रकर्षेण जानातीत्यर्थे प्रयोगः) ११ प्रसवे - प्रजनः। १२ भूषणे - प्रसाधयति। १३ दोषे - प्रलपति। १४ नियोगे - प्रयुङ्क्ते। १५ अवसरे- प्रस्तावः। १६ सेवायाम् - नृपं प्रकुरुते। १७ साहसे - परदारान् प्रकुरुते। १८ शुद्धौ - प्रसीदति। प्रसन्नः। १९ उपयोगे - शतं प्रकुरुते । व्ययीकरोति इत्यर्थः। २० प्रकथने - प्रवक्ति। २१ अनवधाने - प्रमाद्यति। २२ बहुत्वे - प्रभूतम्। प्रचुरम्। २३ माने - प्रदेशः। प्रस्थः। २४ हिंसायाम् –

प्रहरति। २५ शास्त्रनाम्नि - प्रक्रिया। प्रकरणम्। २६ वञ्चने - प्रतारकः। २७ अर्थविपर्यये - प्रवसति । प्रतिष्ठते। २८ सन्यासे - प्रव्रजति। २९ मृतौ - प्रति प्रलयः। ३० काले - प्राज्ञः। ३१ मन्दे - प्रबद्धं वदति (मन्दं वदतीत्यर्थः) ३२ मुख्ये - प्रधानम्।

१:- आदिकर्मादिपु - प्रक्रमते भोक्तुम् [भोजणासाठी प्रवृत होतो], २:- उपरमे - उपरताः जनाः। प्रैति [जातो] ३:- दिग्योगे-प्राची दिक् [दिशेच्या योगाने] ४:- ऐश्वर्ये–प्रभुर्देशस्य [ऐश्वर्ये या अर्थी] ५:- जन्मनि-हिमवतः गङ्गा प्रभवति [हिमवान स्थानातून गंगेचा उगम] ६:- नर्मणि-प्रहसति [क्रीडा या अर्थी] ७:- प्रेम्णि–प्रणयः [प्रेम या अर्थी] ८:- प्रकर्षे–प्रतपति [अधिक या अर्थी] प्रवर्धते [अधिक वृद्ध होतो] ९:- अग्रे-अग्रं हस्तस्य प्रहस्तः [हाताचा अग्र भाग] पादाग्रं प्रपदम् [पायाचा अग्र भाग] १०:- ज्ञाने–प्रणधिः [(गुप्तचर प्रकर्षाने जाणतात] ११:- प्रसवे–प्रजनः [जन्म या अर्थी] १२:- भूषणे-प्रसाधयति [भूषण या अर्थी] १३:- दोषे-प्रलपति [दोष या अर्थी] १४:- नियोगे–प्रयते [नियोगे या अर्थी] १५:- अवसरे-प्रस्तावः [अवसर या अर्थी] १६:- सेवायाम्-नृपं प्रकुरुते [सेवा या अर्थी] १७:- साहसे-परदारान् प्रकुरुते[साहस या अर्थी] १८:- शुद्धौ-प्रसीदति [प्रसन्न या अर्थी] १९:- उपयोगे-शतं प्रकुरुते [उपयोग या अर्थी] व्ययीकरोति इत्यर्थः २०:- प्रकथने–प्रवक्ति [प्रकथण करणे] २१:- अनवधाने–प्रमाद्यति [चुकतो] २२:- हुत्वे-प्रभूतम्। प्रचुरम्। [खूप जास्त] २३:- माने-प्रदेशः। प्रस्थः। [परिमाणी या अर्थी] २४:- हिंसायाम्–प्रहरति। [हिंसा या अर्थी प्रहार करतो] २५:- शास्त्रनाम्नि-प्रक्रिया। प्रकरणम्। [शास्त्रामध्ये] २६:- वञ्चने-प्रतारकः। [वंचना या अर्थी] २७:- अर्थविपर्यये-प्रवसति । प्रतिष्ठते। [थांबतो] २८:- सन्यासे-प्रव्रजति। २९ मृतौ-प्रति प्रलयः। [मृत्यू या अर्थी] ३०:- काले-प्राज्ञः। [काल या अर्थी] ३१:- मन्दे-प्रबद्धं वदति (मन्दं वदतीत्यर्थः) [मंद बोलतो] ३२:- मुख्ये-प्रधानम्। [प्रधान]

परा –

परा भृशेऽनाभिमुख्ये त्वराभिभवविक्रमे।

प्रशान्तावप्रसहने धर्षणे विद्रवे ऋषौ ॥१९८॥

१ भृशे - पराहन्ति। पराजितः। २ अनाभिमुख्ये - परागच्छति। पराह्लमुखः। ३ त्वरायाम् - परापतति। ४ अभिभवे - पराभवति। ५ विक्रमे - पराक्रमति । ६ प्रशान्तौ - परैति । ७ अप्रसहने - अध्ययनात् पराजयते। सोढुं न शक्नोति इत्यर्थः। ८ धर्षणे - प्रसभं परादृशः। ९ ऋषौ - पराशरः।

१:- भृशे-पराहन्ति। पराजितः। [पराजित होणे या अर्थी] २:- अनाभिमुख्ये-परागच्छति। पराह्लमुखः। [पाठ फीरवणे] ३:- त्वरायाम्-परापतति। [घाई घाई जातो] ४:- अभिभवे-पराभवति। [पराभूत करतो] ५:- विक्रमे-पराक्रमति । [पराक्रम करतो] ६:- प्रशान्तौ-परैति । ७:- अप्रसहने-अध्ययनात् पराजयते । सोढुं न शक्नोति इत्यर्थः। ८:- धर्षणे-प्रसभं परादृशः। ९:- ऋषौ-पराशरः। [ऋषिचे नाव]

अप -

अपान्यथात्वे विश्लेषे ह्रासोद्घाटनवारणे।

ईप्साव्यावृत्त्यनुत्कर्षन्यक्कारोत्पाशमुक्तिषु ॥१९९॥

प्रतिदानव्याजदोषद्रोहनिह्नवखेलने।

चौर्यनिर्देशपूजासु वैकृत्येऽंशे विपर्यये ।।२००॥

१ अन्यथात्वे - अपवर्तते । २ विश्लेषे - अपयुज्यते। ३ ह्रासे - अपचयः। ४ उद्घाटने - अपवृत्तं द्वारम्। ५ वारणे - अपहतं पापम्। ६ ईप्सायाम् - अपेक्षते। ७ व्यावृत्तौ - अपयाति। ८ अनुत्कर्षे - अपकृष्टः। ९ न्यक्कारे -

अपक्षिपति। १० उत्प्राशे - अपहसति। ११ मुक्तौ - अपवर्गः। १२ प्रतिदाने - अपायते ऋणम्। १३ व्याजे - अपदेशः। १४ दोषे - अपभाषा। अपवादः। १५ द्रोहे - अपराध्यति। अपकारः। १६ निह्नवे - अपजानीते। अपह्नते। १७ खेलने - हृष्टः ऋषभः अपस्किरते। १८ चौर्ये - अपहरति। १९ निर्देशे - अपदिशति। २० पूजायाम् - अपचितः विष्णुः। २१ वैकृत्ये - अपस्कीर्णमुखः। २२ अंशे - अपस्करः। २३ विपर्यये - अपनयः। अपमृत्युः।

१:- अन्यथात्वे-अपवर्तते। [अन्यप्रकरे या अर्थी] २:- विश्लेषे-अपयुज्यते। [विश्लेषित होते] ३:- ह्रासे-अपचयः। [कमी होणे] ४:- उद्घाटने-अपवृत्तं द्वारम्। [उद्घाटणे या अर्थे] ५:- वारणे-अपहतं पापम्। [दूर करणे] ६:- ईप्सायाम्-अपेक्षते। [मिळवण्याची ईच्छा] ७:- व्यावृत्तौ-अपयाति [व्यावृत्त होतो] ८:- अनुत्कर्षे-अपकृष्टः। [अपकृष्टः होतो] ९:- न्यक्कारे-अपक्षिपति। [झुकवणे] १०:- उत्प्राशे-अपहसति। ११:- मुक्तौ - अपवर्गः। १२:- प्रतिदाने-अपायते ऋणम्। [ऋण परत फेड करणे] १३:- व्याजे-अपदेशः। १४:- दोषे–अपभाषा। अपवादः। [दोष या अर्थी] १५:- द्रोहे-अपराध्यति। अपकारः। [द्रोह या अर्थी] १६:- निह्नवे-अपजानीते। अपह्नते। [कपट करतो या अर्थी] १७:- खेलने-हृष्टः ऋषभः अपस्किरते। [आनंदी बैल खेळतो] १८:- चौर्ये-अपहरति। [चोरी करतो] १९:- निर्देशे-अपदिशति। [निर्देशे या अर्थी] २०:- पूजायाम्-अपचितः विष्णुः। [पूजा या अर्थी] २१:- वैकृत्ये-अपस्कीर्णमुखः। २२:- अंशे-अपस्करः। २३:- विपर्यये-अपनयः। अपमृत्युः।

सम् –

सम्सम्यक्त्वे समन्तत्वे श्लेषे कूज़नवर्तने ।
सहभावे स्मृतौ क्रोधे वृद्धिवाचिकढौकने ॥२०१॥
अनिश्चये गुणाधानप्रतिज्ञात्यागसेवने।
क्रियान्तोद्योगनियमे विमर्शगणनाक्षये ॥२०२॥
नैकटयेऽनुकृतौ प्रीतौ स्वीकारोत्पत्तिवर्जने।
आभिमुख्ये परिचये कालेऽल्पपरिहारयोः ॥२०३॥

१ सम्यक्त्वे - सम्प्रयच्छति। २ समन्तत्वे - सैन्याः सम्पतन्ति । सम्राट् । ३ श्लेषे - संयोगः। सङ्गमः। ४ कूजने - शकटानि सङ्क्रीडन्ति । ५ वर्तने - संयाति प्रास्थिकी स्थाली। ६ सहभावे - सङ्घः। सम्भूय यानम्। ६ स्मृतौ - सङ्कल्पः। ७ क्रोधे - संरभते। ८ वृद्धौ - सम्पत् । ९ वाचिके - सन्दिशति । १० ढौकने - समाहरति । समूहते। ११ अनिश्चये - सन्देहः। १२ गुणाधाने - संस्करोति । १३ प्रतिज्ञायाम् - संजानीते। १४ त्यागे - सन्यसति । १५ सेवने- संवाहति । १६ क्रियान्ते - समाप्तिः । १७ उद्योगे - १८ नियमे - संयमः। १९ विमर्शे - संपृच्छते । २० गणनायाम् - सङ्कलयति। २१ क्षये - संहरति । २२ नैकट्ये - सन्निकृष्टः । समीपम्। २३ अनुकृतौ - पद्मसङ्काशः। २४ प्रीतौ - सम्भाषते। २५ स्वीकारे - सङ्गृह्णाति । २६ उत्पत्तौ - गर्भः सम्भवति । २७ वर्जने - सञ्चक्षा खलाः। २८ आभिमुख्ये - सम्मुखः। २९ परिचये - सम्पृच्छते। ३० काले - समयः। ३१ अल्पे - समर्घः। ३२ परिहारे - समाधीयते।

१:- सम्यक्त्वे - सम्प्रयच्छति। [चांगल्या प्रकारे देतो] २:- समन्तत्वे -

सैन्याः सम्पतन्ति । सम्राट् । [चारी बाजूनी सैनिक आहेत] ३:- श्लेपे - संयोगः। सङ्गमः।संयोग,संगम] ४:- कूजने - शकटानि सङ्क्रीडन्ति। [कुजन] ५:- वर्तने - संयाति प्रास्थिकी स्थाली। ६:- सहभावे - सङ्घः। सम्भूय यानम्।[संघ] ६:- स्मृतौ - सङ्कल्पः। [संकल्प] ७:- क्रोधे - संरभते। [क्रोधित होतो] ८:- वृद्धौ - सम्पत् । [संपत्ति] ९:- वाचिके - सन्दिशति । १० ढौकने - समाहरति । समूहते। ११ अनिश्चये - सन्देहः। १२ गुणाधाने - संस्करोति । १३ प्रतिज्ञायाम् - संजानीते। १४ त्यागे - सन्यसति । १५ सेवने - संवाहति । १६ क्रियान्ते - समाप्तिः । १७ उद्योगे - १८ नियमे - संयमः। १९ विमर्श - संपृच्छते । २० गणनायाम् - सङ्कलयति। २१ क्षये - संहरति । २२ नैकट्ये - सन्निकृष्टः । समीपम्। २३ अनुकृतौ - पद्मसङ्काशः। २४ प्रीतौ - सम्भापते। २५ स्वीकारे - सङ्गृह्णाति । २६ उत्पत्तौ - गर्भः सम्भवति । २७ वर्जने - सञ्चक्षा खलाः। २८ आभिमुख्ये - सम्मुखः। २९ परिचये - सम्पृच्छते। ३० काले - समयः। ३१ अल्पे - समर्घः। ३२ परिहारे - समाधीयते।

अनु –

अनु पश्चात्कृपाज्ञानसान्त्वने सेवनेच्छयोः।
सादृश्याचरणप्रश्नादेशाङ्गीकृतमार्गणे ॥२०४॥
प्रोत्साहने चानुकूल्ये पश्चात्तापानुपूर्वयोः।
प्रसाधने चोपकारे सातत्यालोचनान्वये ॥२०५॥

१ पश्चात् - अनुचरः। २ कृपायाम् - अनुशोचति । ३ ज्ञाने - अनुभवति। अनुमानम्। ४ सान्त्वने - अनुकूलयति। ५ सेवने - अन्वास्ते। ६ इच्छायाम् - अनुरोधः। ७ सादृश्ये - अनुहरति । अनुकरोति। ८ आचरणे - अनुष्ठानम्। ९ प्रश्ने - अनुजिज्ञासते। १० आदेशे - अनुशास्ति। ११ अङ्गीकृतौ - अनुमोदते। १२ मार्गणे - अन्विषति। १३ प्रोत्साहने - होत्रे

अनुगृह्णाति। १४ आनुकूल्ये-अनुकूलः। अनुरक्तः। १५ पश्चात्तापे-अनुशयः। १६ आनुपूर्व्याम्-अनुक्रमति। १७ प्रसाधने - चन्दनेन अनुलिम्पति। १८ उपकारे-अनुकल्पते। १९ सातत्ये-अनुबध्नाति। २० आलोचने-अनुसन्धत्ते। २१ अन्वये-अनुगतः।

१ पश्चात् - अनुचरः। [अनुगमन करणारा] २:- कृपायाम् - अनुशोचति । [कृपा करणारा] ३:- ज्ञान - अनुभवति। [अनुभव करत आहे] अनुमानम्। [अनुमान] ४:- सान्त्वने - अनुकूलयति। [सांत्वन देत आहे] ५:- सेवने - अन्वास्ते। ६:- इच्छायाम् - अनुरोधः। [अनुरोध करत आहे] ७:- सादृश्ये- अनुहरति । अनुकरोति। ८:- आचरणे - अनुष्ठानम्। [अनुष्ठान करत आहे] ९:- प्रश्न - अनुजिज्ञासते। [जानण्यासाठी प्रश्न करतो] १०:- आदेशे - अनुशास्ति । [अनुशासन करत आहे] ११:- अङ्गीकृतौ - अनुमोदते । [स्वीकार करत आहे] १२:- मार्गणे - अन्विपति। १३:- प्रोत्साहने - होत्रे अनुगृह्णाति ।[होत्रला प्रोत्साहीत करत आहे] १४:- आनुकूल्ये - अनुकूलः। अनुरक्तः। १५:- पश्चात्तापे - अनुशयः। १६:- आनुपूर्वी- अनुक्रमति।[क्रमशः जात आहे] १७:- प्रसाधने - चन्दनेन अनुलिम्पति।[चंदणाने लेपन करतो] १८:- उपकारे - अनुकल्पते। १९:- सातत्ये - अनुबध्नाति । २०:- आलोचने - अनुसन्धत्ते । २१:- अन्वये - अनुगतः।

अव -

अव क्रोधे बोधरोधे धैर्यालम्बनभूषणे।

न्यग्भावाभिभवादानभोजने श्लेषधर्षणे ॥२०६॥

दयैकाग्रयक्लृप्तसेवाप्रहासालोकशुद्धिषु ।

अनुत्साहप्रसाराज्ञावेलाशङ्कनमिश्रणे ॥२०७॥

१ क्रोधे - अवख्याति । २ बोधे - अवगतम् । ३ रोधे - अवरोधः। ४ धैर्ये - अवष्टम्भः। ५ भूषणे - अवतंसयति । ६ न्यग्भावे - अवनमति । ७ अभिभवे-अवमन्यते। अवजानाति । ८ आदाने - अवचिनोति । ९ भोजने - अवदंशः। १० श्लेषे - अवगृहनम् । ११ धर्षणे - अवमर्दः । १२ दर्पे - अवलिप्यते। १३ ऐकाग्रये - अवधत्ते। १४ क्लुप्ते - अवक्रीणीते। १५ सेवायाम् - अवलगति। १६ प्रहासे - अवस्तनोति। १७ आलोके - अवलोकयते। १८ शुद्धौ - अवदातः। १९ अनुत्साहे - अवसीदति। २० आज्ञायाम् - अवदति। २१ वेलायाम् - अवसरः। २२ आशङ्कने - अवदिशति। २३ मिश्रणे - अवदधाति सारेण अन्नम्।

१ क्रोधे-अवख्याति। २:- बोधे-अवगतम्।[ज्ञात झाले] ३:- रोधे-अवरोधः। [व्यवधान\अवरोध\अडथळा] ४:- धैर्ये-अवष्टम्भः। ५:- भूषणे-अवतंसयति। ६:- न्यग्भावे-अवनमति।[खाली झुकतो] ७:- अभिभवे-अवमन्यते। [जिंकतो] अवजानाति। [जाणत आहे] ८:- आदाने-अवचिनोति। [घेत आहे] ९:- भोजने-अवदंशः।[दंश करत आहे] १०:- श्लेपे-अवगृहनम्। ११:- धर्षणे-अवमर्दः। १२:- दर्प–अवलिप्यते। १३:- ऐकाग्रये-अवधत्ते। [अवधान\ध्यान देत आहे] १४:- क्लुप्ते-अवक्रीणीते। १५:- सेवायाम्-अवलगति। १६:- प्रहासे-अवस्तनोति । [प्रवास करत आहे] १७:- आलोके-अवलोकयते।[अवलोकन करत आहे] १८:- शुद्धौ-अवदातः। १९:- अनुत्साहे-अवसीदति। [खिन्न\निरुत्साही होतो] २०:- आज्ञायाम्-अवदति। २१:- वेलायाम्-अवसरः। २२:- आशङ्कने-अवदिशति। २३:- मिश्रणे-अवदधाति सारेण अन्नम्।

निर् –

निः पृथक्करणे खेदे वहिष्कृत्याग्रहे भृशे।

भोगेऽधिश्रयणे शान्तावन्तर्धानपदार्थयोः ॥२०८॥

आविष्करणसम्पत्त्योर्वियोगे दर्शने सुखे ॥

१ पृथक्करणे - निवारयति। निष्कासयति। २ खेदे - निर्गच्छति। ३ आग्रहे- निर्बन्धः। ४ भृशे - निष्पतति । निरीक्षते। ५ भोगे - निर्विशति । ६ अधिश्रयणे - आग्नेयमष्टाकपालं चरुं निर्वपेत्। ७ शान्तौ - दीपः निर्याति। ८ अन्वाख्याने - निर्वक्ति। ९ सम्पत्तौ - निष्पत्तिः। निर्मितिः। १० वियोगे - निर्मुक्तः। निरामयः। ११ दर्शने - निर्दिशति । १२ सौख्ये - निर्वाणम्। १३ - अभावे - निर्मक्षिकम्।

१:- पृथक्करण – निवारयति [निवारण करतो]। २:- खेद – निर्गच्छति [खेद करून निघून जातो]। ३:- आग्रह - निर्बन्धः। ४:- भृश[विपुल] - निष्पतति । निरीक्षते । ५:- भोग - निर्विशति । ६:- अधिश्रयण - आग्नेयमष्टाकपालं चरुं निर्वपेत् । ७:- शान्ति - दीपः निर्याति ८:- अन्वाख्यान – निर्वक्ति [अन्वाख्यान करत आहे]। ९:- सम्पत्ति – निष्पत्तिः [निर्मिति]। १०:- वियोग - निर्मुक्तः। निरामयः[वियोग]। ११:- दर्शन - निर्दिशति । १२:- सौख्य – निर्वाणम् । १३:- अभाव – निर्मक्षिकम् [मक्षिका रहित]

दुर् –

दुरीषदर्थे निन्दायां कृच्छ्रानीप्सितवैकृते ॥२०९॥

१ ईषदर्थे - दुर्बलः। २ निन्दायाम् - दुश्चर्म । ३ कृच्छ्रे - दुर्गतिः। ४

अनीप्सिते- दुष्कृतम्। ५ वैकृते – दुर्मुखः

१:- ईषदर्थ [थोड या आर्थि] - दुर्बलः। २:- निन्दा - दुश्चर्म (कुत्सित चर्म)। ३:- कृच्छ्र - दुर्गतिः। ४:-अनीप्सित - दुष्कृतम्। ५ वैकृत - दुर्मुखः।

वि-

वि विशेषेऽत्यये व्याप्तौ परिवर्ते विपर्यये ।
निवृत्तिपृथुताव्याजव्याख्यानाश्वासभोजने ॥२१०॥
विरोधे प्रैषपर्यायक्रियाक्रीडनवण्टने ।
रोधोद्वाहक्लेशदूरशौर्योद्योगनिशामने ॥२११॥
दानेऽन्यथात्वे नानात्वे नाशाश्चर्योक्तिमिश्रणे ।
भेदशिक्षामोहमुख्यविचारासम्मुखे व्यये ॥२१२॥

१ विशेषे विराजते। विशिनष्टि। २ अत्यये-विभाति। ३ व्याप्तौ-विभुः। व्याप्नोति। ४ परिवर्ते-विनिमये-विक्रीणीते। व्यतिलुनीते। ५ विपर्यये-विस्मरति। ६ निवृत्तौ-विरमति। ७ पृथुत्वे-विकसति। विस्तीर्णम्। ८ व्याजे-व्यपदिशति। ९ व्याख्याने व्याचष्टे व्यनक्ति। १० आश्वासे विश्वसति। ११ भोजने-विदिशति। १२ विरोधे-विरुध्यते। विप्रतिपद्यते। १३ प्रैषे-विसृजति। १४ पर्याये-नृपं विशेते। क्रमेण सेवते इत्यर्थः। १५ क्रियायाम्-विदधाति। १६ क्रीडने-विहरति। १७ वण्टने-विभजति। १८ रोधे-विबध्नाति। १९ उद्वाहे-विवहति। २० क्लेशे-विषीदति। २१ दूरे-विप्रकृष्टः। व्यवहितः। २२ शौर्ये-विक्रामति। २३ उद्योगे-व्यवसायः। २४ विशामने विज्ञापयति। २५ दाने-वितरति २६ अन्यथात्वे-विपरिणमते। विवर्तते। २७ नानात्वे-

विकल्पते। विचित्रम्। २८ नाशे-विलीयते। २९ आश्चर्ये-विस्मयते। ३० उक्तौ-व्याहरति। ३१ मिश्रणे-व्यतिकीर्यते। ३२ भेदे-मन्त्रविस्तावः। ३३ शिक्षायाम्-व्युत्पन्नः। ३४ मोहे-विभ्रान्तः। ३५ मुख्ये-विशिष्टः। ३६ विचारे-विमृशति। ३७ असम्मुखे-विमुखः। ३८ व्यये-शतं विनयते।

१:- विशेष - विराजते। विशिनष्टि। २:- अत्यय - विभाति । ३:-व्याप्ति - विभुः। व्याप्नोति । ४:- परिवर्त - विनिमये - विक्रीणीते। व्यतिलुनीते। ५:- विपर्यय - विस्मरति । ६:- निवृत्ति - विरमति। ७:- पृथुत्व - विकसति। विस्तीर्णम् । ८:- व्याज - व्यपदिशति। ९:- व्याख्यान - व्याचष्टे। व्यनक्ति । १०:- आश्वासन - विश्वसति । ११:- भोजन - विदिशति । १२:- विरोध - विरुध्यते । विप्रतिपद्यते । १३:- प्रैप - विसृजति। १४:- पर्याय - नृपं विशेते । क्रमेण सेवते इत्यर्थः। १५:- क्रिया - विदधाति । १६:- क्रीडा - विहरति [खेळत आहे]। १७:- वण्टने - विभजति । १८:- रोध - विबध्नाति । १९:- उद्वाह - विवहति । २०:- क्लेश - विपीदति । २१:- दूर - विप्रकृष्टः । व्यवहितः [व्यवधानयुक्त]। २२:- शौर्य - विक्रामति । २३:- उद्योग - व्यवसायः। २४:- विशामन - विज्ञापयति। २५:- दान - वितरति। २६:- अन्यथात्व - विपरिणमते। विवर्तते। २७:-नानात्व - विकल्पते । विचित्रम्। २८:- नाश - विलीयते । २९;-आश्चर्य - विस्मयते। ३०:-उक्ति - व्याहरति । ३१:- ल्मिश्रण - व्यतिकीर्यते। ३२:- भेद - मन्त्रविस्तावः। ३३:-शिक्षा - व्युत्पन्नः। ३४:-मोह - विभ्रान्तः। ३५:-मुख्य - विशिष्टः। ३५:-विचार - विमृशति। ३६:-असम्मुख - विमुखः। ३७:-व्यय - शतं विनयते ।

आङ्-

आङाभिमुख्ये करणे ग्रहणे श्लेषधर्षणे ।

कान्तौ शापाधानकाङ्क्षानिषेधप्रह्वतावधे ॥२१३॥

विस्रम्भेऽभिविधौ बन्धे स्पर्धानिर्देशभूषणे ।
सम्प्रदाये पारतन्त्रये स्नाने संस्थानदैर्घ्ययोः ॥२१४॥
विज्ञानेऽङ्गीकृतौ त्यागे उत्कण्ठावृत्तिभोजने ।
स्थानाध्मानश्रमाह्वाननैकट्ये कालयापने ॥
स्पर्शावष्टम्भोपरमे भृशे कृच्छ्रादिकर्मणोः ॥२१५॥

१ आभिमुख्ये- आनीतः। आयाति । २ करणे- आचरति । ३ ग्रहणे - आदत्ते। ४ श्लेषे - आलिङ्गति। ५ धर्षणे- आस्कन्दति। ६ क्रान्तौ- आरोहति। आक्रमते। ७ शापे- आक्रोशति। ८ आधाने- आधत्ते। ९ काङ्क्षायाम् - आशास्ते। आकाङ्क्षति। १० निषेधे- आक्षिपति। १ प्रह्वे- आनतः। आवर्जयति। १२ वधे- पशुमालभेत। १३ विस्रम्भे- आश्वसिति। १४ अभिविधौ- आवृणोति। आच्छादयति। १५ बन्धे- आमुञ्चति। १६ स्पर्धायाम्- मल्लो मल्लम् आह्वयते। १७ निर्देशे- आज्ञा। १८ भूषणे- आभरणम्। १९ सम्प्रदाये- आमनन्ति। २० पारतन्त्रये - आयत्तः। २१ स्नाने- आप्लवते। २२ संस्थाने- आकृतिः। २३ दैर्घ्येआयामः। २४ विज्ञाने- आभाति। २५ अङ्गीकृतौ- आशृणोति माम्। २६ त्यागे - आपृच्छते गुरुम्। २७ उत्कण्ठायाम् - आतनुते प्रियाम्। २८ आवृत्तौ - आवर्तते। २९ भोजने - आहारः। ३० स्थाने - आधारः। आधीयते। ३१ आध्माने - आपूर्यते। ३२ श्रमे- आयस्यति। ३३ आह्वाने - आमन्त्रयति। आकारयते। ३४ नैकट्ये - आसादयति। आसन्नः। ३५ कालयापने - आगमस्वभावम्। किञ्चित्कालं प्रतीक्षस्व इत्यर्थः। ३६ स्पर्शे - गामालभ्य। ३७ अवष्टम्भे - आलम्बते। ३८ उपरमे - आनयति। ३९ भृशे - आभाषते। ४० कृच्छ्रे - आपत्। ४१

आदिकर्मणि - आरभते। ४२ ईषदर्थे - ओष्णम्।

१:- आभिमुख्य - आनीतः। आयाति । २:- करण- आचरति । ३:- ग्रहण - आदत्ते। ४:- श्लेष - आलिङ्गति। ५:- धर्षणे- आस्कन्दति। ६:- क्रान्ति- आरोहति । आक्रमते। ७:- शाप - आक्रोशति। ८:- आधान - आधत्ते। ९:- काङ्क्षा - आशास्ते। आकाङ्क्षति । १०:- निषेध- आक्षिपति । १:- प्रह्व- आनतः। आवर्जयति । १२:- वध- पशुमालभेत । १३:- विस्रम्भ - आश्वसिति। १४:- अभिविधि - आवृणोति । आच्छादयति। १५:- बन्ध - आमुञ्चति । १६:- स्पर्धा - मल्लो मल्लम् आह्वयते [स्पर्ध्येसाठी एक मल्ल दुसऱ्या मल्लला बोलवतो] । १७:- निर्देश - आज्ञा। १८:- भूषणे - आभरणम्। १९:- सम्प्रदाय - आमनन्ति। २०:- पारतन्त्रय - आयत्तः। २१:- स्नान - आप्लवते। २२:- संस्थान - आकृतिः। २३:- दैर्घ्ये - आयामः। २४:- विज्ञान - आभाति । २५:- अङ्गीकृत - आशृणोति माम्। २६:- त्यागे - आपृच्छते गुरुम्। २७:- उत्कण्ठा - आतनुते प्रियाम्। २८:- आवृत्ति - आवर्तते। २९:- भोजन - आहारः। ३०:- स्थान - आधारः। आधीयते। ३१:- आध्मान - आपूर्यते। ३२:- श्रम - आयस्यति। ३३:- आह्वान - आमन्त्रयति। आकारयते। ३४:- नैकट्ये - आसादयति। आसन्नः। ३५:- कालयापन - आगमस्वभावम् [किञ्चित्काल प्रतीक्षा करा]। ३६:- स्पर्श - गामालभ्य। ३७:- अवष्टम्भ - आलम्बते। ३८:- उपरमे - आनयति । ३९:- भृश - आभाषते [अधिक बोलत आहे]। ४०:-कृच्छ्र – आपत् [आपत्ति]। ४१:-आदिकर्म- आरभते। ४२:- ईषदर्थ- ओष्णम् [थोड गरम]।

नि -

नि न्यग्भावे गुप्तदाने स्वभावस्वापनिग्रहे।
शुतिव्यावृत्यवस्थाने कथनाधानयन्त्रणे ॥२१६॥

तेजने कारणे राशौ कौशकाज्ञान्तनाशने।
श्राद्धे परीक्षोपवेशे रते साम्याक्ष्ण्यनन्तरे॥
परिवर्ते भृशे लेशे बन्धे स्वदृष्टिकेतने ॥२१७॥

१ न्यग्भावे - निहन्यते। निमज्जति । २ गुप्तदाने - निक्षिपति । न्यासः। ३ स्वभावे - निसर्गः । ४ स्वापे - निद्राति । ५ निग्रहे - निकरोति। निगृहीतः। ६ श्रुतौ - निशाम्यति । ७ व्यावृत्तौ - निवर्तते । ८ अवस्थाने - निविशते। निवसति । ९ कथने - निर्दिशति । १० आधाने - निषेकः। ११ यन्त्रणे - नियच्छति। नियमः। १२ तेजने - निनश्यति। १३ कारणे- नियच्छति। निदधाति। १४ राशौ - निचिनोति। १५ कौशले - निष्णातः। निपुणः। १५ अज्ञायाम् - नियुक्तः। १६ अन्ते - निष्ठितः क्रतुः । १७ नाशने - निहन्ति । १८ श्राद्धे - निवपति । १९ परीक्षायाम् - निकषयति । २० उपवेशने - निषीदति । २१ रते - निधुवनति । २२ साम्ये - शशिनीकाशः । २३ अक्षिण- निमीलती । २४ अनन्तरे - सन्निकृष्टः । २५ परिवर्ते - नियमते । २६ भृशे - निरतः । २७ लेशे - निह्नुसति । २८ बन्धे - निबन्धाति ।

१:- न्यग्भाव [डोक्यापसून झुकणे] - निहन्यते। निमज्जति । २:-गुप्तदान - निक्षिपति । न्यासः। ३:- स्वभाव - निसर्गः । ४:- स्वाप - निद्राति । ५:- निग्रह - निकरोति। निगृहीतः। ६:- श्रुति - निशाम्यति । ७:- व्यावृत्ति - निवर्तते । ८:- अवस्थान - निविशते। निवसति । ९:- कथन - निर्दिशति । १०:- आधान - निपेकः। ११:- यन्त्रण - नियच्छति। नियमः। १२:- तेजन - निनश्यति। १३:- कारण - नियच्छति। निदधाति। १४:- राशि - निचिनोति। १५;- कुशलता - निष्णातः। निपुणः। १५:- अज्ञा - नियुक्तः। १६:- अन्त - निष्ठितः क्रतुः । १७:- नाश - निहन्ति । १८:- श्राद्ध - निवपति । १९:- परीक्षा - निकपयति । २०:- उपवेशन [बसने] -

निषीदति । २१:- रत - निधुवनति । २२:- साम्य - शशिनीकाशः । २३:- आँख - निमीलति । २४:- अनन्तर - सन्निकृष्टः । २५:- परिवर्त - नियमते । २६:- भृश - निरतः । २७:-लेश - निह्नुसति । २८:- बन्धन - निबध्नाति ।

अधि-अपि -

अधिस्वाम्याधिक्यनिन्दाभिचारे स्मृतिपाठयोः ।
पाकारम्भे प्रहसने प्रेरणोपरिभावयोः ॥२१८॥
स्वीकारे विनियोगे च लाभे सन्तानसम्मुखे ।
ज्ञानप्रस्तावयोः बन्धस्थगानोपगमेष्वपि ॥२१९॥

१ स्वाम्ये - अध्यास्ते। अधिपः । २ आधिक्ये - अधीष्टे। अध्याहारः। ३ निन्दायाम् - अधिक्षेपः। ४ अभिचारे - अधिचरति । ५ स्मृतौ - अध्येति। ६ पाठे - अधीते । ७ पाकारम्भे - अधिश्रयते । ९ प्रहसने - अधिचक्रे । १० प्रेरणा - अध्येषेति। अधीष्टम् । १ उपरिभावे - अधिशेते। अधिरोहति । १२ स्वीकारे - अध्यवसति । १३ विनियोगे - अधिकृतस्य कर्तृत्वम्। १४ लाभे - समधियच्छन्ति। १५ सन्ताने - अधिसृजति शरान्। १६ साम्मुख्ये - अध्यक्षः। १७ ज्ञाने - अधिगच्छति। १८ प्रस्तावे - शब्दानुशासनमधिक्रियते।

१:- स्वाम्य - अध्यास्ते । अधिपः । २:- आधिक्य-अधीष्टे । अध्याहारः । ३:- निन्दा-अधिक्षेपः । ४:- अभिचार-अधिचरति । ५:- स्मृति-अध्येति । ६:- पाठ-अधीते । ७:- पाकारम्भ-अधिश्रयते । ९:- प्रहसन-अधिचक्रे । १०:- प्रेरणा-अध्येपति । अधीष्टम् । ११:- उपरिभाव-अधिशेते । अधिरोहति । १२:- स्वीकार-अध्यवसति । १३:- विनियोग-अधिकृतस्य कर्तृत्वम् । १४:- लाभ-समधियच्छन्ति । १५:- सन्तान-अधिसृजति शरान् । १६:- साम्मुख्य-

अध्यक्षः। १७:- ज्ञान–अधिगच्छति [समजत आहे]। १८:- प्रस्ताव–शब्दानुशासनमधिक्रियते [शब्दानुशासन प्रस्तुत करत आहे]।

अपि -

१ बन्धे - अपिगृह्यते। २ स्थगाने - पिधत्ते। ३ उपगमे - अपियन्ति। ४ सम्भावनायाम् - तदपि अस्ति। समुच्चयादिष्वपि अर्थेषु अस्य उपयोगः भवति।

१:- बन्धे - अपिगृह्यते। २:- स्थगाने - पिधत्ते। ३:- उपगमे - अपियन्ति। ४:- सम्भावनायाम् - तदपि अस्ति। समुच्चयादि अर्थामध्ये पान याचा उपयोग होतो।

अति -

अत्युल्लङ्घननिर्वाहानर्थातिशयवञ्चने।

अन्यधर्मप्रापणानुज्ञानेऽन्तर्भावभूतयोः ॥२२०॥

१ उल्लङ्घने - अतिवर्तते । अतिचरति । २ निर्वाहे - अतिवाहयति। ३ अनर्थे- अत्याहितम् । ४ अतिशये - अतिशेते। अतिव्याप्तिः। ५ वञ्चने- अतिसन्धत्ते। ६ अन्यधर्मप्रापणे - अतिदेशः। ७ अनुज्ञाने - अतिसृजति। ८ अन्तर्भावे - अतिगच्छति नृपम्। ९ भूते - अतीतः।

१:- उल्लङ्घन- अतिवर्तते । अतिचरति । २:- निर्वाह- अतिवाहयति। ३:- अनर्थ - अत्याहितम् । ४:- अतिशय- अतिशेते। अतिव्याप्तिः। ५:- वञ्चन- अतिसन्धत्ते । ६:- अन्यधर्मप्रापण- अतिदेशः। ७:- अनुज्ञान- अतिसृजति। ८:- अन्तर्भाव - अतिगच्छति नृपम्। ९:- भूत- अतीतः।

सु - उत् -

सुसौष्ठवाकृच्छ्रगन्धे उज्जन्योच्चैस्त्वभूषणे।

विनाशकथनाभ्यासविपर्यासविलोचने ॥२२१॥

हिंसौत्सुक्योपदाशंसासूयासूचनसाहसे।

प्राबल्यतृप्तिनिर्योगदिग्योगे व्रतनिर्गमे ॥२२२॥

१ सौष्ठवे- सुष्ठु मनस्वी भवति सुमनायते। सुबद्धम्। २ आकृच्छ्रे- सुकरः घटः। ३ गन्धे- सुरभिः। सर्वत्र कर्मप्रवचनीयकारणात् अन्यार्थोऽपि स्यात्।

१:- सौष्ठव- सुष्ठु मनस्वी भवति सुमनायते। सुबद्धम्। २:- आकृच्छ्र - सुकरः घटः। ३:- गन्ध - सुरभिः। सर्वत्र कर्मप्रवचनीय कारण अन्यार्थी पण होतो.

उत् -

१ जन्मनि - उत्पद्यते। उदेति। २ उच्चैस्त्वे - उद्भान्तः। ३ भूषणे - उत्तंसयति। ४ तर्के - उन्नयति। ५ त्यागे - उच्छिष्टम्। ६ विनाशे - उत्सीदति । ७ कथने उच्चरते। उदीरयति। ८ अभ्यासे - उल्लसति । ९ विपर्यासे - उद्वर्तते । १० उल्लेखने- उल्लिखति । ११ हिंसायाम् - उज्जासयति । १२ औत्सुक्ये - उत्कण्ठ्यते। १३ उपदायाम - उत्क्रोशयति ।उत्कोचः। १४ प्रशंसायाम् - उत्कर्षः। उत्सवः। १५ सूचने - उत्कुरुते वाग्भिः। १६ साहसे - उत्कुरुते कन्याम्। १७ प्राबल्ये - उल्बणः। १८ तृप्तौ - उत्कृतोऽन्नेन। १९ निर्देश- उद्दिशति। २० दिग्योगे - उदग्देशः। २१ व्रतनिर्गमे - उदीक्षाणम्।

१:- जन्म – उत्पद्यते [उत्पन्न होतो]। उदेति [उगवतो]। २:- उच्चस्त्व - उद्भान्तः। ३:- भूषण – उत्तंसयति । ४:- तर्क - उन्नयति। ५:- त्याग -

उच्छिष्टम्। ६:- विनाश - उत्सीदति । ७:- कथन - उच्चरते। उदीरयति। ८:- अभ्यास - उल्लसति । ९:- विपर्यास - उद्वर्तते । १०:- उल्लेखन - उल्लिखति । ११:- हिंसा - उज्जासयति । १२:- औत्सुक्य - उत्कण्ठ्यते। १३:- उपदा - उत्क्रोशयति ।उत्कोचः। १४:- प्रशंसा - उत्कर्षः। उत्सवः। १५:- सूचन- उत्कुरुते वाग्भिः । १६:- साहस - उत्कुरुते कन्याम् । १७;- प्राबल्य - उल्बणः। १८:- तृप्ति - उत्कृतोऽन्नेन। १९:- निर्देश - उद्दिशति। २०:- दिग्योग - उदग्देशः।२१;- व्रतनिर्गम - उदीक्षाणम्।

अभि-

अभ्याग्रहोक्तिसाम्मुख्योदयाङ्गीकारवन्दने।
कामनाभोजनाभ्यङ्गाभितोऽर्थेनुकृतौ स्मृतौ ॥
न्यक्कारामनायनैकट्येपेशलत्ववशीकृतौ ॥२२३॥

१ आग्रहे - अभिनिविशते। २ उक्तौ - अभिधत्ते। अभिधेयम्। ३ साम्मुख्ये - अभिसरति। ४ उदये - अभ्युदेति। ५ अङ्गीकारे - अभ्युपगच्छति। ६ वन्दने - अभिवादयति। ७ कामनायाम्- अभिलषति। अभीप्सति। ८ भोजने - अभ्यवहरति । ९ अभ्यङ्गे - अभ्यनक्ति । १० अभितोऽर्थे - अभिनयति । अभिद्रवति। ११ स्मृतौ - अभिजानाति । १२ न्यक्कारे- अभिभवति । १३ आम्नाये - अभ्यस्यति। १४ नैकट्ये - अभ्याशः। १५ पेशलत्वे - अभिजातः।

१:- आग्रह - अभिनिविशते। २:- उक्ति - अभिधत्ते। अभिधेयम्। ३:- साम्मुख्य - अभिसरति। ४:- उदय - अभ्युदेति। ५:- अङ्गीकार - अभ्युपगच्छति। ६:- वन्दन - अभिवादयति। ७:- कामना - अभिलपति। अभीप्सति। ८:- भोजन - अभ्यवहरति । ९:- अभ्यङ्ग - अभ्यनक्ति । १०:- अभितः या अर्थी - अभिनयति । अभिद्रवति। ११:- स्मृति - अभिजानाति

। १२:- न्यक्कार [झुकवने] - अभिभवति । १३:-आम्नाय - अभ्यस्यति। १४:- नैकट्य (निकटता) - अभ्याशः। १५:- पेशलत्व - अभिजातः।

प्रति-

प्रति स्थाने विनिमये निषेधे प्रतिपालने।
निवृत्यङ्गीकृतिज्ञानप्रतीपोत्साहनिष्क्रये ॥२२४॥
यत्नप्रतिज्ञासङ्क्षेपवैपरीत्ये भृशे दिशि।
सादृश्यभ्रंशदिग्योगव्याप्तिसम्भावनारुजि ॥२२५॥

१ स्थाने - प्रत्यादिशति । २ निषेधे - प्रतिषेधः। ३ प्रतिपालने - प्रतीक्षते। ४ निवृत्तौ - प्रत्यागतः। ५ अङ्गीकारे - प्रतिगृह्णाति । ६ ज्ञाने - प्रत्ययः। प्रतीयते। ७ प्रतीपे - प्रत्युपकारः। प्रतिकृतम्। ८ उत्साहे - होत्रे प्रतिगृणाति। ९ निष्क्रिये - प्रतियातयति । १० यत्ने - प्रतिविधत्ते । ११ प्रतिज्ञायाम् - प्रतिजानीते। १२ सह्लक्षेपे - प्रत्याहारः। १३ वैपरीत्ये - प्रत्यवतिष्ठते। प्रतिकूलः। १४ सादृश्ये - प्रतिकृतिः। १५ भ्रंशे - प्रतिकीर्णमुखः। १६ दिग्योगे - प्रतीची। १७ व्याप्तौ - प्रतिकीर्णम्। १८ सम्भावनायाम् - प्रत्याययति । १९ रुजि - वृक्षं प्रति विद्योतते विद्युत्।

१:- स्थान - प्रत्यादिशति । २:- निषेध - प्रतिषेधः। ३:- प्रतिपालन - प्रतीक्षते। ४:- निवृत्ति - प्रत्यागतः। ५:- अङ्गीकार - प्रतिगृह्णाति । ६:- ज्ञान - प्रत्ययः। प्रतीयते। ७:- प्रतीप - प्रत्युपकारः। प्रतिकृतम्। ८:- उत्साह - होत्रे प्रतिगृणाति । ९:- निष्क्रिय - प्रतियातयति । १०:- यत्न - प्रतिविधत्ते । ११:- प्रतिज्ञा - प्रतिजानीते । १२:- सङ्क्षेप - प्रत्याहारः। १३:- वैपरीत्य [विपरीत या अर्थी] - प्रत्यवतिष्ठते। प्रतिकूलः। १४:- सादृश्य - प्रतिकृतिः। १५:- भ्रंश - प्रतिकीर्णमुखः। १६:- दिग्योग - प्रतीची। १७:- व्याप्ति - प्रतिकीर्णम्। १८:- सम्भावना - प्रत्याययति । १९:- रुजि - वृक्षं

प्रति विद्योतते विद्युत्।

परि -

पर्युद्वाहे समन्तत्वे विवर्ते वर्जने शुचि।
निन्दाव्यवस्थान्यक्कारनर्मालिङ्गननिर्गमे ॥२२६॥
क्रमभूषानिवसने क्षिपनिश्चयवेष्टने।
सेवासंन्यासापवर्तशक्तिसाङ्गल्यलाघवे ॥
परिज्ञाने विनिमये विस्तारव्याप्त्यतिक्रमे ॥२२७॥

१ उद्वाहे - परिणयति। २ समन्तत्वे - परिपूर्णः। परिधिः। ३ विवर्ते - परिणमते। ४ वर्जने - परिहरति । परिवर्जनम्। ६ शोके - परिदेवनम् । ७ निन्दायाम् - परिवदति। ८ व्यवस्थायाम् - परिभाषते। ९ न्यक्कारे - परिभवति । १० नर्मणि - परिहसति । ११ आलिङ्गने - परिगृह्णते। १२ निर्गमे- परिवाहः। १३ क्रमे - परिपाटी। १४ भूषायाम् - परिष्करोति कन्याम्। १५ निवसने- परिधत्ते। १६ क्षिपायाम् - परिचरति। १७ सन्न्यासे- परिव्रजति । १८ अपवर्तने- पर्यवस्यति। १९ शक्तौ - पर्याप्तः। परिकल्पते । २० साङ्गल्ये - परिचयः। २१ लाट्टवे - परिप्लवते । २२ परिज्ञाने - परीक्षते। २३ विनिमये - परिवर्तते। २४ विस्तारे - परिणह्यति। २५ व्याप्तौ - परिवेष्टि। २६ अतिक्रमे- परिवृत्तमहः।

१ उद्वाह - परिणयति। २ समन्तत्व - परिपूर्णः। परिधिः। ३ विवर्त - परिणमते। ४ वर्जन - परिहरति । परिवर्जनम्।६ शोक - परिदेवनम्। ७ निन्दा - परिवदति। ८ व्यवस्था - परिभाषते। ९ न्यक्कार (झुकाना)- परिभवति। १० नर्म - परिहसति । ११ आलिङ्गन - परिगृह्णते। १२ निर्गम -

परिवाहः। १३ क्रम - परिपाटी । १४ भूषा - परिष्करोति कन्याम् । १५ निवसन - परिधत्ते। १६ क्षिपा - परिचरति। १७ सन्यास - परिव्रजति । १८ अपवर्तन - पर्यवस्यति। १९ शक्ति - पर्याप्तः। परिकल्पते । २० साङ्गल्य - परिचयः। २१ लाट्टव - परिप्लवते । २२ परिज्ञान - परीक्षते। २३ विनिमय - परिवर्तते। २४ विस्तार- परिणह्यति । २५ व्याप्ति – परिवेष्टि । २६ अतिक्रम– परिवृत्तमहः ।

उप -

उपसामीप्यदाक्षिण्यप्रजननारम्भभेदने ।

उत्कोचाराधने ज्ञानावज्ञाप्रस्तावशिक्षणे ॥२२८॥

भोगाभोजनसादृश्यभूषालिङ्गनगहणे।

सान्त्वनानुग्रहत्यागापकारे यज्ञकर्मणि ॥२२९॥

यत्नच्छायारहोभाषाविरामोद्वाहलेपने।

औद्धत्येऽङ्गीकृतौ युक्तावाचान्तावासने बलौ॥

लिप्सासम्पर्कगुह्येषु भृशाध्याहारवैकृते ॥२३०॥

१ सामीप्ये - उपयाति। उपसर्पति। २ प्रजननम् - उपसर्या गौः। गर्भग्रहणप्राप्तकाला इत्यर्थः। ३ आरम्भे - उपक्रमते। ४ भेदने - उपजपति। उपधा । ५ उत्कोचे - उपयच्छति। उपप्रदानम्। ६ आराधने - उपतिष्ठते सूर्यम्। ७ ज्ञाने - उपलभते। ८ अवज्ञायाम् - उपेक्षते । ९ प्रस्तावे - उपन्यस्यति। उपोद्घातः। १० शिक्षणे - उपदिशति । ११ भोगे - उपभुङ्क्ते। १२ अभोजने - उपवासः। १३ सादृश्ये- उपमिमीते। १४ भूषायाम् - कन्यामुपस्कुरुते । १५ आलिङ्गने - उपगर्हति। १६ गर्हणे - उपालभते। १७ सान्त्वने - कर्मकरान् उपवदते। १८ अनुग्रहे - उपकरोति। १९ त्यागे -

उपेक्षते। २० अपकारे - उपहन्ति। उपद्रवः। २१ यज्ञकर्मणि - उपाकरोति पशुम्। उपाकर्म। २२ प्रतियत्ने - एधः दकस्य उपस्कुरुते । २३ छायायाम् - उपरागः। २४ रहोभाषणे - परदारान् उपवदते। उपमन्त्रयते । २५ विरामे - उपरमते। २६ उद्वाहे - कन्यामुपयच्छते। २७ लेपने - उपलिम्पति । २८ औद्धत्ये - उपप्लवते । २९ अङ्गीकृतौ - अभ्युपगम्य । उपेत्य । ३० युक्तौ - उपपद्यते। ३१ आचान्तौ - उपस्पृशति । ३२ आसने - उपविशति । ३३ बलौ - उपहरति । ३४ लिप्सायाम् - उपयाचते। ३५ सम्पर्के - रथिकानुपतिष्ठते। ३६ गुह्ये - उपह्वरः। ३७ भृशे - उपक्षीणः। उपरुणद्धि । ३८ अध्याहारे - उपस्कृतं वाक्यम्। ३९ वैकृते - उपस्कृतः। इत्येवम् उपसर्गयोगात् प्रायः अर्थाः सम्भवन्ति।

प्रादयः क्रियायोगे उपसर्गसंज्ञाः भवन्ति इत्युक्तम्। क्रियावाचिनः धातवः इति कथ्यन्ते । धातूपसर्गयोः संहिता (वर्णानाम् अतिशयितः सन्निधिः) नित्या। तदुक्तम् –

१:- सामीप्य - उपयाति। उपसर्पति। २:- प्रजनन - उपसर्या गौः। [गर्भग्रहण काळास प्राप्त झालेली गाय।] ३:-आरम्भ - उपक्रमते। ४:- भेदन - उपजपति। उपधा । ५:- उत्कोच - उपयच्छति। उपप्रदानम्। ६:- आराधन- उपतिष्ठते सूर्यम् । ७:- ज्ञान - उपलभते। ८:- अवज्ञा - उपेक्षते । ९:- प्रस्ताव - उपन्यस्यति। उपोद्घातः। १०:- शिक्षण - उपदिशति । ११:- भोग- उपभुक्ङ्क्ते। १२:- अभोजन - उपवासः। १३:- सादृश्य - उपमिमीते। १४:- भूषा - कन्यामुपस्कुरुते । १५:- आलिङ्गन - उपगर्हति। १६:- गर्हण - उपालभते। १७:- सान्त्वन - कर्मकरान् उपवदते। १८:- अनुग्रह - उपकरोति। १९:- त्याग - उपेक्षते। २०:- अपकार - उपहन्ति। उपद्रवः। २१:- यज्ञकर्म- उपाकरोति पशुम्। उपाकर्म। २२:- प्रतियत्न -

एधः दकस्य उपस्कुरुते । २३:- छाया - उपरागः। २४:- रहोभाषण - परदारान् उपवदते । उपमन्त्रयते। २५:- विराम - उपरमते। २६:- उद्वाह - कन्यामुपयच्छते। २७:- लेपन - उपलिम्पति । २८:- औद्धत्य - उपप्लवते । २९:- अङ्गीकार - अभ्युपगम्य। उपेत्य । ३०:- युक्ति - उपपद्यते। ३१:- आचान्ति - उपस्पृशति। ३२:- आसन - उपविशति । ३३:- बलि - उपहरति । ३४:- लिप्सा - उपयाचते । ३५:- सम्पर्क – रथिकानुपतिष्ठते । ३६:- गुह्य - उपह्वरः। ३७:- भृश - उपक्षीणः। उपरुणद्धि । ३८:- अध्याहार - उपस्कृतं वाक्यम्। ३९:- वैकृत - उपस्कृतः। उपसर्गाच्या योगमध्ये प्रायः हा अर्थ सम्भव आहे.

संहिता -

संहितैकपदे नित्या नित्या धातूपसर्गयोः।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥२३१॥

एकपदे, धातूपसर्गयोः, समासे च संहिता नित्या। वाक्ये तु विवक्षामनुसृत्य संहिता भवति। यथा रामः, प्रजायते, राजपुत्रः इत्यादौ एकपदत्वादिना नित्या संहिता। सः अवदत्। सोऽवदत्। इत्यादिवाक्येषु तु विवक्षानुगुण्येन संहिता। यथा भ्वादयः धातुसंज्ञकाः तथा सनादिप्रत्ययान्ताः अपि धातवः इति कथ्यन्ते । ते च सनादयः –

एकपदामध्ये, धातु आणि उपसर्ग तसेच समासामध्ये पण संहिता नित्य होते. वाक्यामध्ये विवक्षाधीन होतो. यथा रामः, प्रजायते, पुत्रः इत्यादिमध्ये एकपद झाल्याने नित्य संहिता आहे. सः अवदत्, सोऽवदत् इत्यादि वाक्यामध्ये संहिता होते. यथा भ्वादयः धातुसंज्ञकाः तथा सनादिप्रत्ययान्ताः अपि धातवः इति कथ्यन्ते ।

सनादयः -

सन्-क्यच्-काम्यच्-क्यङ्-क्यषोऽथाचारक्विब्-णिजङ्गौ तथा।

यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः ॥२३२॥

उदाहरणसूत्राणि -

१ सन् – 'गुप्तिज्किद्भ्यः सन्'।

२ क्यच् – 'सुप आत्मनः क्यच्'।

३ काम्यच् - 'काम्यच्च'।

४ क्यङ् - 'कर्तुः क्यङ् सलोपश्च'।

५ क्यष् - 'लोहितादिडाज्भ्यः क्यष्'।

६ णिच् - 'सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरा-दिभ्यो णिच्'।

७ यङ् - 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्'।

८ यक् - 'कण्ड्वादिभ्यो यक्'।

९ आय - 'गुपूधूपविच्छिपणिपनिभ्यः आयः'।

१० ईयङ् - 'ऋतेरीयङ्'।

११ णिङ् - 'कमेर्णिङ्'।

१२ क्विप् - 'सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः'।

धातवः दशसु गणेषु विभक्ताः रूपभेदात् व्याकरणशास्त्रे। तेषु गणेषु प्रायः विकरणप्रत्ययाः भिद्यन्ते। ते च गणाः -

व्याकरणशास्त्रमध्ये रूपभेदाच्या कारणाने धातु दहा गणामध्ये विभक्त आहे, त्या दहा गणांचे विकरण प्रत्यय भेद प्रदर्शित करतात, ते दहा गण हे आहेत-

गणाः -

भ्वाद्यदादी जुहोत्यादिर्दिवादिः स्वादिरेव च।

तुदादिश्च रुधादिश्च तनादिक्रीचुरादयः ॥२३३॥

क्र.	गणः	विकरणप्रत्ययः	उदाहरणम्
1	भ्वादिः	शप्	भवति
2	अदादिः	शप् [लुक्]	अत्ति
3	जुहोत्यादिः	श्लुः	जुहोति
4	दिवादिः	श्यन्	दिव्यति
5	स्वादिः	ॱश्नुः	सुनोति
6	तुदादिः	शः	तुदति
7	रुधादिः	ॱश्नम्	रुणद्धि
8	तनादिः	उः	तनोति
9	क्र्यादिः	ॱश्ना	क्रीणाति
10	चुरादिः	शप्	चोरयति

लकाराः –

प्रत्येकस्मिन् गणेऽपि दश लकाराः सन्ति । प्रत्येकं लकारोऽपि विशिष्टार्थं धरति । तदुक्तम् -

प्रत्येक गणामध्ये दहा लकार आहेत, प्रत्येक लकारचे एक विशिष्ट अर्थ होतो.

लट् वर्तमाने लेट् वेदे भूते लुङ्-लङ्-लिटस्तथा।

विध्याशिषोस्तु लिङ्-लोटौ लुट् लुट् लुङ् च भविष्यति ॥२३४॥

लट्-वर्तमाने, लेट्-वेदे, लुङ - भूतकालसामान्ये, लङ् - अनद्यतनभूते, लिट् - भूतानद्यतनपरोक्षे, लिङ् - विधौ, लोट् -अशिषि, लुट् - अनद्यतनभविष्यति, लृट् - भविष्यति, लृङ् - हेतुहेतुमद्भावे भूते भविष्यति वा। अयं तु प्राधान्येन व्यपदेशः एव । अन्येऽपि अर्थाः निर्दिष्टाः वर्तन्ते व्याकरणशास्त्रे।

दशसु गणेषु दशसु लकारेषु च विभक्तं क्रियापदं अकर्मकं सकर्मकं द्विकर्मकं वा स्यात् । तेषां स्वरूपमेवमुक्तम् -

वर्तमानामध्ये लट्, वेदामध्ये लेट्, भूतसामान्यात लुङ्, अनद्यतन भूत यामध्ये लङ्, अनद्यतन परोक्ष भूत यामध्ये लिट्, विधि अर्थी लिङ्, आशीरर्थी लोट्, अनद्यतन भविष्य अर्थी लुट्, भविष्य अर्थी लृट्, हेतुहेतुमद्भाव मध्ये भूत या भविष्य यामध्ये लृङ्। हे प्रधानरूपामध्ये एक व्यपदेश ही आहे, व्याकरणशास्त्रा मध्ये अन्य पण अर्थ निर्दिष्ट आहेत.

दहा गण तसेच दहा लकारामध्ये विभक्त क्रियापद अकर्मक अथवा सकर्मक अथवा द्विकर्मक होतो, त्यांचे स्वरूप असा प्रकारे सांगितलेले आहे –

सकर्मकाकर्मकद्विकर्मकाः -

कर्तृकर्मक्रियायुक्तः प्रयोगः स्यात् सकर्मकः।
अकर्मकः कर्मशून्यः कर्मद्वन्द्वो द्विकर्मकः ॥२३५॥

यद्वा -

क्रियापदं कर्तृपदेन युक्तं व्यपेक्षते यत्र किमित्यपेक्षाम् ।
सकर्मकं तं सुधियो वदन्ति शेषस्ततो धातुरकर्मकः स्यात् ॥२३६॥

यद्वा -

फलव्यापारयोरेकनिष्ठतायामकर्मकः।

धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः॥२३७॥

॥ वैयाकरणसिद्धान्तकारिकाः - १३॥

धातोः अर्थद्वयम् । फलं व्यापारश्च । यथा पच्-धातोः फलं विक्लित्तिः। विक्लित्त्यनुकूला क्रिया, वह्निज्वालनादिः व्यापारः। यथा वा गम्-धातोः फलम् उत्तरदेशसंयोगः। तदनुकूला क्रिया व्यापारः। एवं फलव्यापारयोः धातुः। येषां धातूनां फलं व्यापारः च एकाधिकरणनिष्ठः सः अकर्मकः भवति । यथा वृद्धधातोः फलं वर्धनं व्यापारः तदनुकूला क्रिया। 'वृक्षः वर्धते' इत्यत्र फलव्यापारौ वृक्षनिष्ठौ अतः सः धातुः अकर्मकः। अर्थात् फलसमानाधिकरणव्यापारवाचकत्वम् अकर्मकत्वम् । येषां धातूनां फलं व्यापारः च भिन्नाधिकरणनिष्ठः सः सकर्मकः भवति। अर्थात् फलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम्। यथा 'कृष्णः तण्डुलं पचति' इत्यत्र विक्लित्तिरूपं फलं तण्डुलनिष्ठम् । व्यापारश्च कृष्णनिष्ठः। अतः अयं धातुः सकर्मकः एव।

धातुचे दोन अर्थ होतात. फल आणि व्यापार, यथा पच्-धातु चा फल विक्लृत्ति आहे. विक्लृत्यनुकूल क्रिया, वह्निज्वालादि व्यापार आहे. यथा – गम्धातुचे फल उत्तरदेशसंयोग आहे, आणि त्याचे अनुकूल क्रिया व्यापार, या प्रकारे फल एवं व्यापाराने मिळुन धातु होतो. ज्या धातुंचे फल आणि व्यापार हे एकाधिकरणनिष्ठ होतो ते अकर्मक होतात, ज्याप्रकारे वृद्धधातुचा फल वर्धन आहे आणि व्यापार त्याचे अनुकूल क्रिया आहे. वृक्षः वर्धते – फल आणि व्यापार वृक्षनिष्ठ आहे. त्यामुळे तो धातु अकर्मक आहे. अर्थात् – फल आणि व्यापाराचे यदि सामानाधिकरण्य होते तर अकर्मकता होतो.

ज्या धातुंचे फल आणि व्यापार भिन्न अधिकरणनिष्ठ होते, ते सकर्मक होतात. अर्थात् – फल आणि व्यापार ची व्यधिकरणता अकर्मकता होती, यथा – कृष्णः तण्डुलं पचति (कृष्ण तांदूळ शिजवत आहे) इथे विक्लृत्तिरूप फल तण्डुलनिष्ठ आहे. व्यापार कृष्णनिष्ठ आहे. अतः हा धातु सकर्मक आहे.

अकर्मकाः तावत् श्लोकेन अत्र सङ्गृहीताः -

[अकर्मक धातु या श्लोकामद्धे सांगतात]

शमनं ध्वननं मज्जनविकलं जृम्भणदम्भनरोदनहसनम् ।
कुटिलोत्सुकते भ्रमणं यतनं क्षरणं जरणं शकनं ग्लानिः ॥२३८॥
वृद्धिक्षयभयजीवितमरणं लज्जासत्तास्थितिजागरणम्।
शयनक्रीडारुचिदीप्त्यर्थं धातुगणं तमकर्मकमाहुः ॥२३९ ॥

एवं चेदपि एकः एव धातुः कदाचित् सकर्मकः भवति कदाचित् अकर्मकः। अतः सम्भवति अकर्मकस्य निर्णये भ्रमः। तस्मात् अकर्मकनिर्णयः एवं करणीयः -

यद्यपि इथे सङ्ग्रह केलेला आहे तथापि कोणता धातु कधी सकर्मक तर कधी अकर्मक होतो. अतः अकर्मकच्या निर्णयामध्ये भ्रम होतो, म्हणून अकर्मक निर्णय असा प्रकारे करतील –

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसङ्ग्रहात्।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥२४०॥

धातोरर्थान्तरे वृत्तेः, कर्मणः धात्वर्थेनोपसङ्ग्रहात् , कर्मणः प्रसिद्धेः, कर्मणः

अविवक्षातः अकर्मिका क्रिया इति अन्वयः। धातोरर्थान्तरे वृत्तेः उदाहरणम्- 'वह प्रापणे' इति धातोः भारं वहति (भारं प्रापयति) इति उदाहरणम्। अत्रायं धातुः सकर्मकः। अस्य अर्थान्तरे क्वचित् अकर्मकत्वम्। यथा नदी वहति (नदी प्रस्रवति)। धात्वर्थोपसङ्ग्रहस्य उदाहरणम् - जीवति । जीवधातोः प्राणधारणमर्थः। अत्र प्राणरूपकर्मणः धात्वर्थे एव अन्तर्भूतत्वात् अस्य अकर्मकत्वम् । एवं नृत्यति इत्यत्रापि। अस्य धातोः अङ्गविक्षेपः अर्थः। अत्रापि कर्मणः धात्वर्थे एव अन्तर्भूतत्वात् अकर्मकत्वम्। कर्मणः प्रसिद्धेः उदाहरणम् - मेघो वर्षति। अत्र वर्षणकर्मणः जलस्य प्रसिद्धत्वात् अकर्मकत्वम् । अविवक्षायाः उदाहरणम् - हितान्न यः संशृणुते स किंप्रभुः (कुमारसम्भवः), अस्य, हितात् हितकारिणः पुरुषात् , यः स्वहितं न मन्यते स कुत्सितः राजा इत्यर्थः। अत्र स्वहितस्य कर्मत्वस्य अविवक्षितत्वात् अकर्मकत्वम्।

धातुचा अन्य अर्थ होने, धातुच्या अर्थामध्येही कर्माचे उपसङ्ग्रह होने, कर्म प्रसिद्ध होने, कर्मची अविवक्षा करने – या चार स्थितिमध्ये क्रिया अकर्मक होती. प्रथम अन्यार्थाचे उदहरण देतात – वह प्रापणे या धातुने भारं वहति [ओझ वाहतो] – इथे हा धातु सकर्मक आहे, याच धातुचा अर्थान्तर होते तर याला अकर्मकत्व प्राप्त होते. यथा नदी वहति [नदी वाहत आहे] – इथे धातु अकर्मक आढळून येतो. धात्वार्थातील कर्माचे उदाहरण देतात – जीवति [जीवंत आहे] जीव धातुचा प्राणधारण हा अर्थ आहे. इथे प्राणरूप कर्माचे धातुच्या अर्थामध्ये अन्तर्भाव असल्या कारणाने त्याचे अकर्मकत्व सिद्ध होते. नृत्यति हे पण उदाहरण आहे. या धातुचा अंगविक्षेप हा अर्थ आहे. अंगरूपकर्मचे धात्वर्थामध्ये समावेश झाल्या कारणाने हे पण अकर्मक होतो. प्रसिद्ध कर्माचे उदाहरण देतात – मेघो वर्षति [मेघ बरसतात] इथे वर्षाचे कर्म जल प्रसिद्ध झाल्याने इथे अकर्मकत्व होते. अविवक्षाचे

उदाहरण – हितान्न यः संश्रृणुते स किंप्रभुः । इथे हितकारीचे वचन जो राज्य एकत नाही तो कुराजा (दुष्ट राजा) होतो, इथे स्वहित चे कर्मत्व विवक्षित नाही अतः अकर्मकत्व आहे.

द्विकर्मकधातवः -

दुह्याच्पच्दण्ड्धिप्रच्छिचिब्रूशासुजिमथ्मुषाम् ।
कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम् ॥२४१॥

एतेषां धातूनां प्रयोगे अपादानादिकारकाणाम् अविवक्षायां द्विकर्मकत्वम् एषां सिद्धयति । एषु दुह्यादीनां द्वादशानां गौणे कर्मणि लकारः। अतः कर्मणि प्रयोगे गौणकर्मणः अभिधानात तस्य प्रथमा। यथा कर्तरि - वामनः बलिं वसुधां याचते। कर्मणि - वामनेन बलिः वसुधां याच्यते । नीहृकृष्वहां प्रधाने कर्मणि लकारः। अतः कर्मणि प्रयोगे प्रधानकर्मणः अभिधानात् तस्य प्रथमा। यथा कर्तरि - कृषिकः ग्रामम् अजां नयति। कृषिकेण ग्रामम् अजा नीयते। गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणां प्रयोगे अणौ यः कर्ता सः णौ कर्मसंज्ञां प्राप्नोति इति कथनात् एतेऽपि धातवः द्विकर्मकाः भवन्ति। तत्र बुध्यर्थकस्य भक्षार्थकस्य शब्दकर्मकाणाञ्च प्रयोगे प्रयोज्ये कर्माणि प्रधानकर्मणि वा लकारः। त्रीन् विहाय अन्येषां प्रयोज्ये कर्मणि लकारः। तद्यथा बुध्यर्थकस्य धातोः प्रयोगे कर्तरि- गुरुः छात्रं श्लोकार्थं बोधयति इति। कर्मणि- गुरुणा छात्रः श्चोकार्थं बोध्यते । गुरुणा छात्रं श्लोकार्थः बोध्यते इति वाक्यद्वयमपि साधु । बुध्याद्यर्थकात् भिन्नस्य गत्यर्थकस्य धातोः प्रयोगे कर्तरि पिता बालं विद्यालयं गमयति इति।

कर्मणि तु पित्रा बालः विद्यालयं गम्यते इत्येव वाक्यम्। तदुक्तम् :

या धातुच्या प्रयोगामध्ये अपादानादि कारकांची अविवक्षात द्विकर्मकत्व सिद्ध होतो. यामधील पहिल्या बारा दुहादींचे गौण कर्मामध्ये लकार होतो. म्हणून कर्मणि प्रयोगमध्ये गौण कर्मची अभिहित होण्या पूर्वी प्रथमा होते. यथा – कर्तरि – वामनः बलिं वसुधां याचते। कर्मणि – वामनेन बलिः वसुधां याचते। नी, हृ, कृष्, वह् या चौघांचे प्रधान कर्मामध्ये लकार होतो. म्हणून कर्मणि प्रयोगामध्ये प्रधान कर्म अभिहित असल्याने त्याची प्रथमा होती. यथा – कर्तरि – कृषिकः ग्रामम् अजां नयति। कृषिकेण ग्रामम् अजा नीयते। गत्यर्थ, बुद्ध्यर्थ, प्रत्यवसानर्थ, शब्दकर्म आणि अकर्मक धातुच्या प्रयोगमध्ये अण्यन्तावस्थाचा कर्ता ण्यन्तावस्थामध्ये कर्मसंज्ञक होतो. त्यामुळे हे धातुपण द्विकर्मक होतात. बुद्ध्यर्थक, भक्षार्थक, शब्दकर्मकाच्या प्रयोगामध्ये प्रयोज्य अथवा प्रधान कर्मामध्ये लकार होतो. तिघाणा सोडून अन्य धातुच्या प्रयोज्य कर्मात लकार होतो. यथा – बुद्ध्यर्थक धातुच्या कर्तरि प्रयोगामध्ये – गुरुः छात्रं श्लोकार्थं बोधयति। कर्मणि प्रयोग – गुरुणा छात्रः श्लोकार्थं बोध्यते, गुरुणा छात्रं श्लोकार्थः बोध्यते – हे दोनी वाक्य साधु आहेत. बुद्ध्यर्थक से भिन्न गत्यर्थक धातुच्या प्रयोगामध्ये – कर्तरि – पिता बालः विद्यालयं गमयति। कर्मणि – पित्रा बालः विद्यालयं गम्यते। उक्तार्थाचा सङ्ग्रह या कारिकामध्ये करत आहेत् –

गौणे कणि दुह्यादेः प्रधाने नीहृकृष्वहाम्।
बुद्धिभक्षार्थयोः शब्दकर्मणां च निजेच्छया।
प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः॥२४२॥

नञ्प्रयोगस्थले सामान्यतः नञ् क्रियया सह एव सम्बध्यते। किन्तु कदाचित् समासवृत्तिबलात् नञ् उत्तरपदेन सहापि अन्वेति । तदुक्तम् -

समान्यतः जब नञ् चा प्रयोग करतात तर नञ् चा संबन्ध साक्षात् क्रिया

सोबतच येतो. किन्तु कदाचित् समासामध्ये उत्तरपदा बरोबर पण नञ् चा संबन्ध होवू शकतो.

नञः अर्थद्वयम् -

[नञ् चे दोन अर्थ आहेत]

निषेधविवक्षायां वाक्ये नञ् प्रयुज्यते। किन्तु नञः अर्थद्वयं विद्यते। येन प्रयोगकाले अर्थभेदः सम्भवति। तदुक्तम्

निषेधविवक्षेत वाक्यामध्ये नय् प्रयुक्त होते, किंतु नयः दोन अर्थी होते. त्यामुळे प्रयोगकाळात अर्थभेद होतो.

प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ्।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥२४३॥

नञः अर्थद्वयम् - प्रसज्यप्रतिषेधः पर्युदासः चेति। प्रधानक्रियया सह यत्र नञः अन्वयः भवति तत्र प्रसज्यप्रतिषेधत्वम्। यत्र पुनः उत्तरपदेन नञः अन्वयः क्रियते तत्र पर्युदासत्वम्। यदा नञः असमस्य स्वातन्त्रयेण प्रयोगः तदा तस्य प्रसज्यप्रतिषेधत्वम्। अर्थात् तादृशस्य नञः प्रधानक्रियया सह अन्वयः। यथा - अहं पुस्तकं न स्वीकृत्य विद्यालयं गच्छामि। अत्र वाक्ये नञः प्रधानक्रियया सह अन्वयः। अतः अस्य वाक्यस्य तात्पर्यं पुस्तकं स्वीकरोमि विद्यालयं न गच्छामि इत्यत्र।

यदा तु नञः समस्य अस्वातन्त्रयेण प्रयोगः तदा पर्युदासत्वम्। अर्थात् नञः उत्तरपदेन सह अन्वयः। यथा - अहं पुस्तकम् अस्वीकृत्य विद्यालयं गच्छामि। वाक्येऽस्मिन् नञः उत्तरपदेन अन्वयः। तस्मात् पुस्तकं न स्वीकरोमि विद्यालयं गच्छामि इति अर्थः सिद्ध्यति।

नञः अर्थद्वयं भवति इत्युक्तम् । प्राचीनाः प्रकारान्तरेण नञः षडर्थाः इत्याहुः। तद्यथा –

प्रसज्जप्रतिषेध आणि पर्युदास। जेंव्हा प्रधान क्रिया बरोबर नञ् चा अन्वय होतो तेंव्हा प्रसज्जप्रतिषेध आणि जेंव्हा उत्तरपदा बरोबर अन्वय होतो तेंव्हा पर्युदास होतो. असमस्त स्थलावर नञ् ची प्रधान क्रियासह अन्वय होतो तेंव्हा प्रसज्जप्रतिषेध होतो. अर्थात् इथे नञ् स्वतन्त्र आहे. यथा – अहं पुस्तकं न स्वीकृत्य विद्यालयं गच्छामि – इथे नञ् चा अन्वय प्रधान क्रियासह होतो. म्हणून विद्यालय जात नाही हा अर्थ फलित होतो. समस्त स्थलावर उत्तरपदसह अन्वय झाला तर पर्युदास होतो. अर्थात् इथे नञ् अस्वतन्त्र आहे. म्हणून उक्त वाक्यामध्ये नञ् ची उत्तरपदासह अन्वयामुळे पुस्तक घेऊन जात नाही [पण विद्यालयात जातो] हा अर्थ फलित होतो.
नञ् के दो अर्थ होते है ऐसा कहा है। प्राचीन आचार्यों के मतानुसार नञ् के छह अर्थ है –

नञः षडर्थाः -

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥२४४॥

तत्सादृश्यम् - अब्राह्मणः। तदभावः - अपापम्। तदन्यत्वम् - अनश्वः। तदल्पता - अनुदरा कन्या (अल्पोदरा कन्या इत्यर्थः) । अप्राशस्त्यम् - अपशवः वा अन्ये गोऽश्वेभ्यः। विरोधः - अधर्मः, असुरः (सुरविरोधी इत्यर्थः) इत्यादि।

उक्तेषु उदाहरणेषु अनुदरा कन्या इत्यत्र अनुदरा इति विशेषणम् कन्या इति विशेष्यम् । यत्र विशेष्यविशेपणभावः तत्र विशेष्यस्य यल्लिङ्गं यद्विवचनं या च विभक्तिः तदेव विशेषणस्यापि भवति। तदुक्तम् –

तत्सादृश्यम् [त्याच्या सारखे] – अब्राह्मणः [वर्णत्वाणे भिन्न आणि मनुष्यत्वाने तुल्यत्व] तदभावः [त्याचा अभाव] – अपापम् [पापचा अभाव] तदन्यत्वम् [त्याच्या अन्यत्वाने] – अनश्वः [अश्वेतर] तदल्पता [त्याच्या अल्पत्वाने] - अनुदरा कन्या [कृश उदरवाली कन्या] अप्राशस्त्यम् [अप्रशस्तता] - अपशवः वा अन्ये गोऽश्वेभ्यः [गाय, अश्व यांसह भिन्न पशु] विरोधः - अधर्मः, असुरः [सुरविरोधी] इत्यादि।

उक्त उदाहरणामध्ये अनुदरा कन्या इथे अनुदरा हे विशेषण आहे कन्या हे विशेष्य आहे. जहाँ विशेषणविशेष्यभाव होतो तिथे विशेष्याच्या अनुसार ही विशेषणाचे लिंग, विभक्ति आणि वचन होतो.

विशेष्यविशेषणभावः -

यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य।
तल्लिङ्गं तद्वचनं सा च विभक्तिर्विशेषणस्य ॥२४५॥

अत्रार्थे अन्या कारिका -

याः विशेष्येषु दृश्यन्ते लिङ्गसंख्याविभक्तयः।
प्रायः ता एव कर्तव्याः समानार्थे विशेषणे ॥२४६॥

एकस्य वाक्यस्य श्लोकस्य वा अन्वयकाले प्रथमं विशेषणमुक्त्वा ततः विशेष्यं वक्तव्यम्। तत्रापि प्रथमं कर्तृविशेषेणं ततः कर्ता, कर्मविशेषेणं ततः कर्म क्रियाविशेषणं ततः क्रिया इत्येवंरूपेण निरूपणीयम्। उक्तञ्च –

एका श्लोकाचे किंवा वाक्याचे अन्वय करते वेळी प्रथम विशेषण त्याच्या नंतर विशेष्य सांगितलं पाहिजे, त्याच्यामध्ये पण पहिल्यांदा कर्तृविशेषण नंतर कर्ता, कर्मविशेषण नंतर कर्म, क्रियाविशेषण आणि नंतर क्रिया हे निरूपण क्रम ठेवा.

अन्वयः -

विशेषणं पुरस्कृत्य विशेष्यं तदनन्तरम्।

कर्तृकर्मक्रियायुक्तमेतदन्वयलक्षणम् ॥२४७॥

'पश्यैतां पाण्डुपुत्राणामाचार्यमहतीं चमूम्॥' अन्वयः - आचार्य पाण्डुपुत्राणाम् एतां महतीं चमूं पश्य।

'पश्यैतां पाण्डुपुत्राणामाचार्यमहतीं चमूम् ॥' अन्वयः – आचार्य (कर्ता) पाण्डुपुत्राणाम् एतां (विशेषण) महतीं (विशेषण) चमूं (विशेष्य (कर्म)) पश्य (क्रियापद)।

अपरः श्लोकः -

आदौ कर्तृपदं वाच्यं द्वितीयादिपदं ततः।

त्क्वातुमुँल्ल्यप् च मध्ये कुर्यादन्ते च क्रियापदम् ॥२४८॥

कानिचन सुबन्तानि सर्वनामानि इति अभिधीयन्ते । तेषु सर्वनामसु इदम् अदस् **तत् एतत् इति चतुर्णां सर्वनाम्नां प्रयोगे भ्रमः जायते। अतः कदा कस्य प्रयोगः करणीयः इति विषये एवम् उक्तम् –**

कानिचन सुबन्त सर्वनाम पण होतो. त्याच्यात इदम्, अदस्, तत्, एतत् त्यांच्या प्रयोगामध्ये भ्रम होतो. त्यामुळे कधी कोणाचा प्रयोग करायचा या विषयी ते म्हणतात -

इदमादिप्रयोगः -

इदमः प्रत्यक्षगतं समीपतरवर्ति चैतदो रूपम्।

अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयात् ॥२४९॥

सामीप्ये द्योत्ये इदमशब्दः। ततः समीपतरे एतच्छब्दः । दूरे विद्यमानेषु वस्तुषु अदश्शब्दः। परोक्षविषयेषु तच्छब्दः इति विवेकः।

समीपार्थ द्योतित करन्यासाठी इदम् शब्द, थोडे जवळ एतत् शब्द, दूर विद्यमान वस्तुमध्ये अदस् शब्द आणि परोक्ष विषयात तत् शब्द असा विवेक करतात.

एवकारार्थः -

अयोगम् अन्ययोगं च अत्यन्तायोगमेव च।
व्यवच्छिनत्ति धर्माणाम् एवकारस्त्रिधा मतः॥२५०॥

एवकारार्थः त्रिविधः- अयोगव्यवच्छेदः अन्ययोगव्यवच्छेदः अत्यन्तायोगव्यवच्छेदः। तत्र अयोगव्यवच्छेदः यथा शङ्खः पाण्डुरः एव इत्यादौ ।

अत्र विशेष्ये शङ्खे पाण्डुरत्वायोगव्यवच्छेदः बोध्यते अर्थात् अत्र एवकारेण शङ्खे सर्वदा पाण्डुरत्वम् भवति इति बोध्यते। अन्ययोगव्यव्यच्छेदः पार्थः एव धनुर्धरः इत्यादौ । अत्र पार्थात् अन्यस्मिन् प्रशस्तधनुर्धरत्वं व्यवच्छिद्यते । एवकारेण पार्थात् अन्यस्मिन् प्रशस्तधनुर्धरत्वं नास्ति इति बोध्यते। अत्यन्तायोगव्यवच्छेदः नीलं सरोजं भवत्येव इत्यादौ। सरोजे नीलत्वात्यन्तायोगः व्यवच्छिद्यते। एवकारेण नीलं कमलम् अपि भवति इति बोध्यते।

सुबन्तेभ्यः तदस्यास्त्यस्मिन् इत्यर्थे मतुबादयः प्रत्ययाः विधीयन्ते। ते भूमाद्यर्थयुक्ताः स्युः। तदुक्तम् –

एवकाराचे तीन भेद होतात. अयोगव्यवच्छेद, अन्ययोगव्यवच्छेद आणि

अत्यन्तायोगव्यवच्छेद। अयोगव्यवच्छेद – शङ्खः पाण्डुरः एव [शंख शुक्लच् आहे] - इथे एवकाराणे सदैव ही शंखामध्ये पाण्डुरत्व राहत आहे हा बोध होतो. अन्ययोगव्यवच्छेद – पार्थ एव धनुर्धरः [पार्थ हाच धनुर्धर आहे] – इथे एवकाराणे पार्थाला सोडून अन्य कोणीहि उत्कृष्ट धनुर्धरत्व नही असा बोध होतो. अत्यन्तायोगव्यवच्छेद – नीलं सरोजं भवत्येव [निळा (पण) कमल आहे] – इथे एवकाराने नीळा कमल पण आहे हा असा बोध होतो.

मनुबादीनामाः -

भूमानिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
संसर्गोऽस्तिविवक्षयां भवन्ति मतुबादयः ॥२५१॥

भूमा - बहुत्वम्। यथा गोमान्, यवमान् (यस्मिन् यवाः अधिकाः सन्ति सः।) निन्दायाम् - ककुदावर्तिनी कन्या। प्रशंसायाम् - रूपवान् । नित्ययोगे - क्षीरिणः वृक्षाः। अतिशायने - उदरिणी कन्या। संसर्गे - दण्डी छत्री इत्यादि।

सुबन्तेषु कानिचन पदानि पुल्लिङ्गकानि कानिचन स्त्रीलिङ्गकानि कानिचन नपुंसकलिङ्गकानि। तत्रापि पुनः अकाराद्यन्तत्वेन भेदः विद्यते। अतः रूपभेदज्ञानार्थं शब्दानां कण्ठस्थीकरणमपेक्षितम्। किन्तु सर्वेषां शब्दानां कण्ठस्थीकरणापेक्षया यदि केचन प्रधानशब्दाः कण्ठस्थीक्रियन्ते तर्हि तत्सादृश्यात् अन्येषां स्मरणं सुकरम्। के ते प्रधानाः शब्दाः ये कण्ठस्थीकर्तुं योग्याः इति चेदुच्यते –

भूमा = बहुत्व। ज्याप्रमाणे गोमान्, यवमान् [ज्यामध्ये जूँ अधिक आहे असा], निन्दा–ककुदावर्तिनी कन्या. प्रशंसा याअर्थी–रूपवान्। नित्ययोगात–क्षीरिणः वृक्षाः। अतिशय याअर्थी–उदरिणी कन्या। संसर्ग अर्थी–दण्डी,

छत्री (जेंव्हा कानि दण्ड घेऊन उभा आहे तर तेंव्हा त्या दण्डाच्या संसर्गाच्या कारणाने तो दण्डी मानला जातो] इत्यादि. काही सुबन्त पुंलिंगामध्ये काही स्त्रीलिंगामध्ये तर काही नपुंसकलिंगात होतात. यांच्यात पण अकाराद्यन्त भेद दिसून येतात, म्हणून त्यांचे कण्ठस्थीकरण अपेक्षित आहे. किन्तु सारे शब्दाचे कण्ठस्थीकरण न करता पण काही प्रधान शब्द हे कण्ठस्थ केले तर सुलभता होती. त्या प्रधान शब्दांचा संग्रह इथे करतात -

पुंलिङ्गशब्दाः -

रामो हरिः करी भानुर्मरुत् कर्ता च चन्द्रमाः।

विद्वाँश्च भगवानात्मा दशैते पुंसि नायकाः ॥२५२॥

स्त्रीलिङ्गशब्दाः -

रमा रुचिर्नदी धेनुर्वाक्स्त्रीश्रीर्गौर्वधूस्तथा।

क्षुत् प्रावृट् च शरच्चैव द्वादश स्त्रीषु नायिकाः ॥२५३॥

नपुंसकलिङ्गशब्दाः -

ज्ञानं दधि पयो वर्म धनुर्वारि जगत्तथा।

मधु नाम मनोहारि दशैतानि नपुंसके ॥२५४॥

जातिलक्षणं प्रायः प्रतिदर्शनं भिद्यते। व्याकरणसूत्रेषु जातेरस्त्रीविषयादयोपधात् इत्यादिषु अपि जातिपदं श्रूयते। तत्र जातिपदस्य अयमर्थः ज्ञेयः –

जातिचे लक्षण सर्व दर्शनामध्ये भिन्न प्रकारे दिसून येतात. व्याकरणशास्त्रामध्ये जातेरस्त्रीविषयादयोपधात् इत्यादि सूत्रामध्ये जाति हे पद मिळते त्याच्या हा अर्थ आहे –

जातिः -

आकृतिग्रहणा जातिः लिङ्गानां च न सर्वभाक्।
सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥२५५॥

आकृतिग्रहणा - अनुगतसंस्थानव्यङ्ग्या। यथा तटत्वम्। लिङ्गानां च न सर्वभाक्। सकृदाख्यातनिर्ग्राह्या - असर्वलिङ्गत्वेन एकस्यां व्यक्तौ कथनात् व्यक्तयन्तरे कथनं विनापि सुग्रहा। यथा एकस्यां व्यक्तौ वृषलः इति कथनात् व्यक्त्यन्तरे तदपत्यादिषु कथनं विनापि सुग्रहं वृपलत्वं जातिः। तच्च असर्वलिङ्गम्। गोत्रम् अपत्यम्। चरणः शाखाध्येता। गोत्रं चरणाश्च जातिः।

वैयाकरणैः सन्धिः समासः कारकञ्च प्रधानत्वेन परिगण्यन्ते । तत्र सन्धिः वर्णकार्यम् समासः पदकार्यम् तत्रादौ प्रसिद्धसन्धिसह्लृग्राहिकाः कारिकाः प्रदर्श्यन्ते -

आकृतिच्या अनुसार – जसे – तटत्वम्। लिङ्गानां च न सर्वभाक्। सकृदाख्यातनिर्ग्राह्या – सर्वलिंग न होता एका व्यक्तिला म्हणल्या नंतर अन्य कोणाला न बोलता त्यांचे पण ग्रहण होते. यथा – एका व्यक्तिला वृषल असे म्हणून त्याच्या अपत्यामध्ये पुनः कथन करण्याची आवश्यकता नाही राहत. तो सर्वलिंग होतो. गोत्राचा अर्थ अपत्य होतो. चरण शाखाच्या अध्येताला म्हंटले जाते. गोत्र आणि चरण जाति बोलले जाते.

अच्-सन्धिः -

प्रधानाच्-सन्धयः श्लोकेऽस्मिन् संङ्गृहीताः।
अकोऽकि दीर्घसन्धिमाहुराद्गुणो भवेदिकि

त्ववर्ण एचि वृद्धिमेत्विको यणच्ययादयः।

स्युरेच एह्ल एत्यति प्रपूर्वता पदान्तगात्

सदा द्वितीयमीत्वमूत्वमेत्वमेति नान्यताम् ॥२५६॥

अक्प्रत्याहारात् अकि परे क्रमशः द्वयोः दीर्घः, अवर्णात् इक्प्रत्याहारे परे गुणः, अवर्णात् एच्-प्रत्याहारे परे वृद्धिः, इकः अचि परे यण् । एचः अचि परे अयादयः, पदान्तात् एह्लः अति (ह्रस्वाकारः) परे पूर्वरूपता च भवति। द्विवचने स्थितः ईकारः ऊकारः एकारः च प्रकृतिवद् भवति।

अक् प्रत्याहारघटित वर्णांच्या अक् परे असता क्रमशः दोघांच्या स्थानावर दीर्घ होतो. अवर्णाच्या इक् परे असता गुण, एच् परे असता वृद्धि, इक् च्या अच् परे असता यण्, एच् च्या अच् परे असता आयदय, एङ् च्या ह्रस्व अकार परे असता पररूप होतो, द्विवचनामध्ये स्थित ईकार, ऊकार आणि एकार प्रकृतिवत् [कोणते संधिकार्य प्राप्त नाही करत] राहतात.

हल्-सन्धिः-

सतू शचू षटू समेत्य तत्सवर्णतामितः

पदान्तझल् तु जश् सदा च चर्खरि प्रजायते।

स ञम् ञमि प्रयाति वा लघोः परोऽचि ङ्ङ् सदा

द्विरेति वा पदान्तझय्-परोऽमि शश्छकारताम् ॥२५७॥

सकारतवर्गौ शकारचवर्गाभ्यां षकारटवर्गाभ्यां च मिलित्वा तत्सवर्णौ भवतः। पदान्ते विद्यमानः झल् सदा जश् भवति । सः झल् खरि परे चर् भवति । किन्तु ञमि परे सः झल् जश् भूत्वा ञमेव भवति। पदान्तझयः परः शकारः छकारताम् एति वा यदि शकारः अम् परकः।।

सकार, तवर्ग शकार, चवर्ग आणि षकार, टवर्गाच्या योगामध्ये त्यांचे सवर्ण बनतात. पदान्तामध्ये विद्यमान झल् कायम जश् बनतो। तो झल् खर् परे असता चर् होतो. किन्तु ञम् च्या परे असता तो जश् होऊन ञम् ही रहतो. पदान्त झय् च्या परे शकाराचे विकल्पाने छकार होतो. यदि शकार अम् परक आहे तरी पण.

पदान्तझय्-परो ह एति वा पुरः सवर्णताम्

लघुलुगेति सन्धिः चकारवर्णके परे।

तवर्ग एति ले परे लकारतामिति ध्रुवं

स्वनुस्वरंस्त्रयं समेति नः सवर्णतश्छवि ॥२५८॥

पदान्तझयः हकारे परे पूर्वस्य सवर्णाक्षराणि प्राप्नोति । छकारे परे ह्रस्वस्य तुगागमः अनुबन्धलोपः सन्धिश्च भूत्वा च् इति भवति। लकारे परे तवर्गः लकारतामेति । नकारात् छवि परे छव्-प्रत्याहारस्थाक्षराणां सवर्णभूतं शकारं षकारं सकारं वा विन्दति तथा च नकारात् पूर्वं स्थितस्य स्वरस्योपरि अनुस्वारः च आयाति।

पदान्त झय् च्या नंतर जर हकार असेल तर पूर्वसवर्ण होतो. छकार च्या नंतर ह्रस्वला तुक् आगम होतो. अनुबन्धलोप व सन्धि होऊन चकार होतो. लकार च्या नंतर तवर्ग लत्व प्राप्त करतो. नकार च्यानंतर छव् परे असता छव् चा सवर्ण शकार, षकार या सकर ला प्राप्त करतो, तसेच नकार च्या नंतर पूर्व स्थित स्वरवर्णावर अनुस्वार होतो.

नमौ पदस्य मध्यगावनुस्वरौ परे झलि

त्वनुस्वरो ययि ध्रुवं सवर्णतां स विन्दते।

म आश्वनुस्वरत्वमेति हल्परः पदान्तगः

स वैत्यनुस्वरः पदान्तगः सवर्णतां ययि ॥२५९॥

पदस्य मध्ये विद्यमाननकारमकारयोः झलि परे अनुस्वारः, स च अनुस्वारः ययि परे परसवर्णतां प्राप्नोति । हलि परे पदान्तस्य मकारस्य अनुस्वारः स्यात्। पदान्तानुस्वारात् ययि परे विकल्पेन परसवर्णता।

पदच्या मध्ये विद्यमान नकार आणि मकार च्या झल् परे असता अनुस्वार होतो. आणि यय् परे असता परसवर्ण होतो. हल् परे असता पदान्त मकार चा अनुस्वार होतो. पदान्त अनुस्वार च्या यय् परे असता विकल्पाने परसवर्ण होतो.

विसर्गसन्धिः -

कखोः पफोर्विसर्ग एति वार्धतां स वा शरि
च्छवि त्रयं शषं समेति तस्य वर्णसाम्यतः।
तोऽति रुत्वमुत्वमेत्यतो हशीदमेव हि
त्ववर्णतोऽशि रुत्वमेति लोपगां यकारताम् ॥२६०॥

विसर्गात् कखयोः पफयोः वा परयोः विकल्पेन अर्धविसर्गः। शर्-प्रत्याहारे परे विकल्पेन, छवि परे नित्येन च, विसर्गस्य शर्-छव्-वर्णानां साम्यात् सशषेषु अन्यतमः वर्णः भवति । ह्रस्वाकारात् परस्य रोः ह्रस्वे अकारे परे उकारः तथैव हशि परे अपि उकारः भवति। ततः उभयत्रापि अच्सन्धिः करणीयः। अवर्णात् (अ आ) अशि परे अवर्णात् परस्य रेफस्य यकारता, यकारश्च लोपतां याति।

विसर्गाने क,ख किंवा प,फ परे असता अर्धविसर्ग होतो . शर् च्या परे असता विकल्पाने, छव् च्या परे नित्य, विसर्ग चा शर् – छव् वर्णा प्रमाणे स,श,ष यांच्यापैकी एक होतो. ह्रस्व अकार च्या परे ह्रस्व अकार असता आणि हश् परे रु चा उत्व होतो. यांच्या उपरान्त अच्सन्धि करा. अकार

(अ/आ) च्या अश् परे असता यत्व होतो, आणि यकार चा लोप होतो.

अपवादाः -

स एष एत अल्परौ विसर्गशून्यतां सदा
रि रश्च लोपमेति तत्पुरोऽण्समेति दीर्घताम् ।
सुबुद्धिभिः सुपाठकैः स्वसन्धिरोगनाशकैः
समग्रसन्धिरुच्यते रसैर्हि पञ्चचामरैः ॥२६१॥

सः एषः एतत्पदद्वयम् अल्प्रत्याहारे परे विसर्गरहितं भवति। रेफे परे रेफस्य लोपः भवति, पूर्वाक्षरस्य च दीर्घः। यः बुद्धिमान् पाठकः सन्धिरोगं नाशयितुमिच्छति सः एतैः पञ्चभिः श्लोकैः सर्वान् सन्धीन् करोति।

सः आणि एषः या दोन्ही चा विसर्गरहित प्रयोग होतो, अल् परे असता. रेफ च्या परे असता रेफ चा लोप होतो. आणि पूर्वाक्षर चा दीर्घ होतो. जो बुद्धिमान पाठक सन्धिरोगाचा नाश करण्याची ईच्छा बाळगतो, तो या पाच श्लोकाद्वारा उक्त सन्धि करतो.

स्थानयत्नैर्हलां सन्धिराधीयतां स्थानमात्राप्रभावादचां सन्धयः।
अश्खरोर्भेदतः स्यात् स वैसर्गिको रुर्भवेल्लोपभृद् योऽण्यवर्णादशि॥२६२॥

स्थानयत्नाभ्यां हलाम् सन्धिः स्थानमात्रज्ञानात् अचां सन्धिः अश्-खर् अनयोः प्रत्याहारयोः भेदतः विसर्गसन्धिः च आधीयताम् । अवर्णात् अशि परे रेफः लोपभृत् यकारः भवति।

स्थान आणि यत्न ला जानुन हल्सन्धि, स्थानमात्र ला जानुन अश्, खर् यांच्यातील भेद पाहून विसर्गसन्धि वाचा. अवर्ण च्या अश् परे असता रेफ चा यकार होतो.

हश्यति स्याद्तोऽरुः स उः सन्धिगः।

स्थानसाम्येन खर्षु व्यवस्था मता ॥२६३॥

अलि चैषोऽपि सोऽयं विसर्गप्रहृद् रो।

रि लोपे पुरोऽण् दीर्घतां विन्दते ॥२६४॥

ह्रस्वाकारात् रेफे परे ततः हशि ह्रस्वाकारे वा परे रोः उकारः। खर्षु परेषु स्थानसाम्येन व्यवस्था मता। सः एषः अनयोः अलि परे विसर्गाभावः रेफस्य रेफे परे तस्य लोपः पूर्ववर्णस्य दीर्घः च।

समासः प्रधान्येन प्रायः चतुर्धा विभक्तः। तत्पुरुषः कर्मधारयः बहुव्रीहिः द्वन्द्वः च। तेषां भेदज्ञानार्थमेषा कारिका सहकरोति -

ह्रस्व अकार च्या रेफ परे असता त्याचा परे हश् या अकार परे असता रु चा उत्व होतो. खर् च्या परे असता स्थानसाम्याने व्यवस्था पहा. सः आणि एषः यांच्या विसर्गाभाव सिद्ध होतो. अल् परे असता. रेफ चा रेफ च्या परे लोप आणि पूर्ववर्ण चा लोप होतो. समास चे चार भेद होतात. तत्पुरुष, कर्मधारय, बहुव्रीहि आणि द्वन्द्व, त्या भेदांचे अर्थ खालील कारिकामध्ये संगृहीत केलेले आहेत.

समासभेदाः -

चकारबहुलो द्वन्द्वः स चासौ कर्मधारयः।

यस्य येषां बहुव्रीहिः शेषस्तत्पुरुषः स्मृतः॥२६५॥

यस्मिन् समासे चकारबाहुल्यं सः द्वन्द्वः। यथा हरिः च हरः च गुरुः च हरिहरगुरवः। यत्र अस्मच्छब्दः तच्छब्दः वा प्रयुज्यते सः तत्पुरुषस्य भेदः कर्मधारयः। यथा श्वेतश्च असौ अश्वः च श्वेताश्वः। रक्ते च ते लते च रक्तलते। यत्र यस्य येषामित्यादयः प्रयोगाः स बहुव्रीहिः। यथा रक्तं वस्त्रं

यस्य सः रक्तवस्त्रः पुरुषः। तद्भिन्नः तत्पुरुषः। यथा कृष्णस्य भक्तः कृष्णभक्तः। अव्ययीभावे तु पदानि अव्ययत्वं प्राप्नुवन्ति । यथा प्रतिदिनम् इत्यादि।

ज्या समासामध्ये चकार चा बाहुल्याने प्रयोग होतो तो द्वन्द्व, यथा – हरिः च हरः च गुरुः च हरिहरगुरवः। जिथे अदस् किंवा तत् शब्द प्रयुक्त होतो. तो तत्पुरुषाचा भेद कर्मधारय. यथा श्वेतश्च असौ अश्वः च श्वेताश्वः. रक्ते च ते लते च रक्तलते. जिथे यस्य येषाम् इत्यादि प्रयोग होतो. तो बहुव्रीहि. यथा रक्तं वस्त्रं यस्य सः रक्तवस्त्रः पुरुषः. तद्भिन्न तत्पुरुष. यथा कृष्णस्य भक्तः कृष्णभक्तः. अव्ययीभावामध्ये पद अव्यय होतो. यथा – प्रतिदिनम् इत्यादि.

समासभेदानामुदाहरणमुक्तमत्र -

वृक्षशाखा तत्पुरुषः श्वेताश्वः कर्मधारयः।

रक्तवस्त्रो बहुव्रीहिर्द्वन्द्वश्चन्द्रदिवाकरौ ॥२६६॥

कारकाणि –

कारकाणि षटसंख्याकानि प्रोक्तानि ।

तानि च -

कर्ता कर्म च करणं सम्प्रदान तथैव च।

अपादानाधिकरणमित्याहुः कारकाणि षट् ॥२६७॥

कर्तृकारकं कर्मकारक करणकारकं सम्प्रदानकारकम् अपादानकारकम् अधिकरणकारकं चेति कारकाणि षट् । तत्र स्वतन्त्रः कर्ता। किन्नाम स्वातन्त्रयम् इत्यत्र भर्तृहरिः वाक्यपदीये वदति।

कर्ता, कर्म, करण, सम्प्रदान, अपादान आणि अधिकरण. कर्ता स्वतन्त्र असतो. स्वातन्त्र्य चा अर्थ भर्तृहरि वाक्यपदीय नामक ग्रन्थामध्ये सांगतात.

कर्ता -

प्रागन्यतः शक्तिलाभात् न्यग्भावापादनादपि।
तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्तनात् ॥२६८॥
अदृष्टत्वात् प्रतिनिधेः प्रविवेके च दर्शनात् ।
आरादप्युपकारित्वे स्वातन्त्र्यं कर्तुरूच्यते ॥२६९॥

॥ वाक्यपदीयम् ३-७-१०१ १०२॥

षड्भीः विशेषैः कर्तुः क्रियायां स्वातन्त्र्यम् उच्यते। तद्यथा करणादीनि का प्रवर्तितानि करणादिशक्तिं प्रतिलभन्ते कर्ता तु प्रागेव। कर्तृसन्निधौ च करणादीनि गौणीभवन्ति तधीने च तेषां प्रवृत्तिनिवृत्ती। प्रधानकर्तुः प्रतिनिधिर्न दृष्टः करणादीनां तु दृष्टः व्रीह्यपचारे नीवारैः इज्यते । प्रविवेकः अभावः। करणाद्यभावेऽपि शेते आस्ते इत्यादौ केवलः कर्ता दृश्यते। असौ तटस्थः सन् करणादिसिद्धौ उपकरोति न तु करणादिवत् अनुप्रविश्य।

सहा विशेष कर्ता स्वन्तत्र आहेत. यथा – कर्तृद्वारा प्रवृत्त करणादि करणादि शक्ति ला प्राप्त करतात, कर्ता तर पहले सारखाच असतो. कर्त्याच्याच जवळ करणादि गौण होतात. आणि त्यांच्या अधीन त्यांची प्रवृत्ति तसेच निवृत्ति होत असते. कर्त्याचा कोणी प्रतिनिधि नाही, परंतु कारणचा होतोअन्य कारण असताना त्याचा प्रयोग केला जातो. यथा - याग मध्ये व्रीहि स्थाने नीवार(तृणधान्यविशेष) चा प्रयोग केला जातो. प्रविवेक चा अर्थ अभाव आहे. करणादि चा अभाव असता शेते, आस्ते या स्थानांवर केवल कर्ताच् होतो. हा तटस्थ राहून करणादि ला सिद्ध करतो. न की त्यांच्या सारखे अनुप्रवेश करतो.

कर्मकारकम् -

निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम्।

तत्रेऽप्सिततमं कर्म चतुर्धान्यत् तु कल्पितम् ॥२७०॥

॥ वाक्यपदीयम् ३-७-४५॥

तत्र ईप्सिततमं कर्म निर्वर्त्यं विकार्यं प्राप्यं चेति त्रिधा मतम्। तत्रोदाहरणं यथा - निर्वर्त्यम् - घटं करोति। विकार्यम् - काष्ठानि भस्म करोति। सुवर्णं कुण्डलं करोति । प्राप्यम् - आदित्यं पश्यति।

ईप्सिततम, निर्वर्त्य, विकार्य आणि प्राप्य - कर्माचे असे तीन प्रकार [मत] सांगितलेले आहेत. उदाहरण – निर्वर्त्यम् - घटं करोति। विकार्यम् - काष्ठानि भस्म करोति। सुवर्णं कुण्डलं करोति। प्राप्यम् - आदित्यं पश्यति।

करणकारकम् -

क्रियायाः फलनिष्पत्तिः यद्यापारादनन्तरम्।

विवक्ष्यते यदा तत्र करणत्वं तदा स्मृतम् ॥२७१॥

॥ वाक्यपदीयम् ३-७-९०॥

यस्य कारकस्य व्यापारादनन्तरम् अव्यवधानेन क्रियायाः फलनिष्पत्तिः विवक्ष्यते तदा तत्र तस्य करणत्वं स्मृतम्। यथा रामेण बाणेन हतः वाली इत्यत्र बाणस्य करणत्वम्।

ज्या कारक च्या व्यापारच्या लगेच नंतर क्रिया निष्पन्न होती. तेंव्हा तो तिथे करण मानला जातो. यथा – रामेण बाणेन हतो वाली – इथे बाण या शब्दाला करणत्व प्राप्त आहे.

सम्प्रदानकारकम् -

अनिराकरणात् कर्तुस्त्यागाङ्गं कर्मणेप्सितम्।
प्रेरणानुमतिभ्यां वा लभते सम्प्रदानताम् ॥२७२॥

॥ वाक्यपदीयम् ३-७-१२९॥

त्यागकर्तुः अनिराकरणात् (दानविषयकस्य निषेधस्य अकरणात्) सम्प्रदानतां लभते। यथा सूर्याय अर्घ्यं ददाति इत्यत्र न सूर्यः दीयमानमर्घ्यतदातारं वा निराकरोति। अतः कर्मणा आप्तुमिष्टः सः सम्प्रदानतां लभते। प्रेरणानुमतिभ्यां च सम्प्रदानता लभ्यते। तद्यथा प्रेरणा - याचकाय भिक्षां ददाति। अनुमतिः - अङ्गीकारः - यथा उपाध्यायाय गां ददाति।

त्यागकर्त्याला निराकरण न होन्याने [दानविषयक निषेध न करण्याने] सम्प्रदानता प्राप्त करतो. यथा – सूर्याय अर्घ्यं ददाति – इथे सूर्यला दिला गेलेल्या अर्घ्याला अथवा त्याच्या दात्याला दूर करत नाही. त्यामुळे कर्मच्या द्वारा प्राप्त करण्याची इच्छाने तो सम्प्रदान मानला जातो. प्रेरणा – याचकाय भिक्षां ददाति। अनुमति – अङ्गीकार – उपाध्याय गां ददाति।

अपादानकारकम्-

अपाये यदुदासीनं चलं वा यदि वाऽचलम्।
ध्रुवमेवातदावेशात् तदपादानमुच्यते ॥२७३॥
पततो ध्रुव एवाश्चो यस्मादश्चात्पतत्यसौ।
तस्य त्वश्वस्य पतने कुड्यादिर्ध्रुव उच्यते ॥२७४॥

विभागे साध्ये यदवधिभूतं तत् अपादानमुच्यते। तच्च अवधिभूतं चलं वा

स्यात् अचलम् वा। यथा अश्वात् पतति । वृक्षात् पतति ।

विभाग साधन्यासाठी जो अवधिभूत होतो तो अपादान मानला जातो. तो अवधिभूत चल किंवा अचल राहू सकतो. यथा – अश्वात् पतति। वृक्षात् पतति।

अधिकरणकारकम् -

कर्तृकर्मव्यवहितामसाक्षाद्धारयत् क्रियाम्।

उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ॥२७५॥

॥ वाक्यपदीयम् ३-७-१४८॥

फलरूपां व्यापाररूपां वा क्रियां असाक्षात् धारयत् क्रियासिद्धौ उपकुर्वत् अधिकरणं स्मृतम्।

फलरूप अथवा व्यापाररूप क्रिया ला असाक्षात् धारण करणारा क्रियासिद्धिमध्ये उपकारक अधिकरण होतो.

षष्ठी -

सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः।

श्रुतायामश्रुतायां वा क्रियायां सोऽभिधीयते ॥२७६॥

यः सम्बन्धः कर्मादिरूपकारकविशेषेभ्यः अन्यः क्रियाकारकपूर्वकः क्रियायां श्रुतायां (मातुः स्मरति) अश्रुतायां वा (राज्ञः पुरुषः) सः षष्ठ्या अभिधीयते। सूत्रं च वक्ति 'षष्ठी शेषे' इति। कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः तत्र षष्ठी स्यात्।

अन्य क्रियाकारकपूर्व जो सम्बन्ध आहे, क्रिया असताना (मातुः स्मरति), नसताना (राज्ञः पुरुषः), कर्मादि कारकांपेक्षा भिन्न आहे, अन्य

क्रियाकारकपूर्व आहे तो षष्ठीने ज्ञापित होतो. हे 'षष्ठी शेषे' या सूत्राने सांगितलेल आहे. कारकप्रातिपदिकार्थांपेक्षा अन्य, स्वस्वामीभावादि संबन्ध शेष आहे, तिथे षष्ठी होते.

कारकविभक्तिः -

कदा काः विभक्तयः भवन्ति इति आपाततः निर्देशः कृतः एतासु कारिकासु। तदृश्यताम् -

[कधी कोणत्या विभक्तिचा प्रयोग करायचा या विषयी खालील करीकेतसांगितलेल आहे.]

निर्देशे प्रथमा प्रोक्ता सैव चामन्त्रणेष्वपि ।

द्वितीया कर्माणि प्रोक्ता तृतीया कर्तृकरणयोः ॥२७७॥

'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा'। 'सम्बोधने च'। 'कर्मणि द्वितीया'। 'कर्तृकरणयोः तृतीया' ।

'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' । "सम्बोधने च' ।या सूत्राने प्रथमा होती, 'कर्माणि द्वितीया' ने द्वितीया आणि 'कर्तृकरणयोः तृतीया' ने तृतीया होती.

ज्ञानज्ञाप्येऽङ्गविकारे हेतावपि च इष्यते ।

तादर्थ्ये सम्पदाने च चतुर्थी स्याच सर्वदा ॥२७८॥

'इत्थंभूतलक्षणे' इति तृतीया 'येनाङ्गविकारः'। 'हेतौ' इत्यनेन हेत्वर्थे तृतीया। 'तादर्थ्ये चतुर्थीवाच्या' इति वार्तिकेन तादर्थ्ये चतुर्थी ज्ञेया 'चतुर्थी सम्प्रदाने'।

१' इत्थंभूतलक्षणे' इससे तृतीया । 'येनाङ्गविकारः' ने तृतीया। 'हेतौ' याने हेत्वर्थमध्ये तृतीया, 'तादर्थ्ये चतुर्थीवाच्या' या वार्तिकाने तादर्थ्यमध्ये चतुर्थी होती. 'चतुर्थी सम्प्रदाने' ने चतुर्थी।

हेत्वपादानयोः पञ्चमी पष्ठी तु कर्तृकर्मसम्बन्धे ।
अधिकरणनिमित्तसत्वे सप्तमी स्यात् विषयेऽपि ॥२७९॥

'विभाषा गुणहेतावस्त्रियाम्' इत्यनेन हेतौ, 'अपादाने पञ्चमी' इत्यनेन अपादाने पञ्चमीविभक्तिर्भवति। 'कर्तृकर्मणोः कृति' इत्यनेन कर्तरि कर्मणि च षष्ठी । 'षष्ठी शेषे' इत्यनेन सम्बन्धे षष्ठी। 'सप्तम्यधिकरणे च' इत्यधिकरणे, 'निमित्तात्कर्मयोगे' इति निमित्ते, 'यस्य च भावेन भावलक्षणम्' इत्यनेन सत्त्वे च सप्तमी भवति

'विभाषा गुणहेतावस्त्रियाम्' याने हेतु असता पंचमी, 'अपादाने पञ्चमी' याने अपादानमध्ये पञ्चमीविभक्ति। 'कर्तृकर्मणोः कृति' याने कर्ता आणि कर्मामध्ये षष्ठी। 'षष्ठी शेषे' याने सम्बन्धमध्ये षष्ठी। 'सप्तम्यधिकरणे च' याने अधिकरण, 'निमित्तात्कर्मयोगे' इति निमित्ते, 'यस्य च भावेन भावलक्षणम्' याने सत्त्व असता सप्तमी होती.

कर्तृकर्मकारकयोः विभक्तिव्यवस्था -

कर्तृकर्मकारकयोः विभक्तियोजनकाले सामान्यतः एषा व्यवस्था ज्ञातव्या।

[कर्तृ आणि कर्म कारकाची विभक्तिव्यवस्था सामान्यतः या प्रकारे होती]

प्रथमान्तो यदा कर्ता द्वितीया कर्मणस्तदा ।
तदा कर्ता तृतीयान्तः प्रथमा कर्मणस्तदा ॥२८०॥

यदा कर्ता प्रथमाविभक्तौ भवति (अभिहिते प्रथमा) तदा कर्म द्वितीयाविभक्तौ तिष्ठति । यथा हरिः ग्रन्थं पठति। यदा तु कर्ता तृतीयाविभक्तौ (कर्तृकरणयोः तृतीया) तदा कर्म प्रथमाविभक्तौ भवति । यथा हरिणा ग्रन्थः पठ्यते।

जर कर्ता प्रथमाविभक्तिमध्ये असेल [भिहितमध्ये प्रथमा] तेंव्हा कर्म द्वितीया विभक्तिमध्ये रहतो. यथा - हरिः ग्रन्थं पठति । जेंव्हा कर्ता तृतीया विभक्तिमध्ये (कर्तृकरणयोः तृतीया) असेल तेंव्हा कर्म प्रथमा विभक्तिमध्ये होतो. यथा हरिणा ग्रन्थः पठ्यते ।

****

लाक्षणिकादिकारिकाः

(अस्मिन् प्रकरणे प्राध्यान्येन लक्षणवाचिकाः कारिकाः सङ्गृहीताः। तया सह अन्येऽपि केचन श्लोकाः अत्र उक्ताः, दश उपनिषदां नाम सङ्ग्राहकाः, पुराणानां नाम सङ्ग्राहकाः इत्याद्याः। याः कारिकाः विवरणं विना अवगन्तुं योग्याः तेषां व्याख्यानं न कृतम्। अत्र अकारादिक्रमेण विषयाः सङ्गृहीताः।)

या प्रकरणामध्ये प्राधान्याने लक्षणवाचिका कारिका सङ्ग्रहीत केलेल्या आहेत. त्याच्या सह इतर काही श्लोक येथे सांगितले आहेत. दहा उपनिषदे म्हणजे सङ्ग्राहका, पुराणानांचे नाव सङ्ग्राहका,इ. या कारिका विवरण विना समजण्यास योग्य असल्याने त्यांचे व्याख्यान येथे केलेले नाही. येथे अकारादिक्रमाने विषय सङ्ग्रहीत केले आहेत.)

अतिथिः -

एकरात्रं तु निवसन्नतिथिर्ब्राह्मणः स्मृतः।
अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते ॥२८१॥

॥मनुस्मृतिः ३-१०२॥

अज्ञातगोत्रनामानमन्यग्रामादुपागतम् ।
विपश्चितोऽतिथिं प्राहुस्तं शम्भुमिव पूजयेत् ॥२८२॥

अतिदेशः -

ये परत्र विहिताः धर्माः तमतीत्य तेषां देशः अतिदेशः इति निगदितः।

तदुक्तम् -

अन्यत्र विहित धर्मांच्या देशाला सोडून अन्य देश अतिदेश आहेत.

अन्यत्रैव प्रणीतायाः कृत्स्नायाः धर्मसंहतेः।

अन्यत्र कार्यतः प्राप्तिः अतिदेशोऽभिधीयते ॥२८३॥

यथा व्याकरणे कित्वादीनां धर्माणामन्यत्र अतिदेशः।

[जसे कि व्याकरणामध्ये कित्वादि धर्मांचे अन्यत्र अतिदेश आहे.]

अनाथः -

मातापितृविहीनस्तु रहितो मित्रबान्धवैः।

विगतस्वामिसम्बन्धात् अनाथः परिकीर्तितः॥२८४ ॥

अष्टविधविवाहाः -

ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः ।

गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ॥२८५॥

॥ मनुस्मृतिः ३-२१॥

ब्राह्मविवाहः दैवविवाहः आर्षविवाहः प्राजापत्यविवाहः आसुरविवाहः गान्धर्वविवाहः राक्षसविवाहः पैशाचविवाहः चेति विवाहः आचारानुगुण्येन अष्टधा विभक्तः । सर्वेषामपि लक्षणं प्रदत्तं मनुना। तद्यथा –

ब्राह्मविवाह, दैवविवाह, आर्षविवाह, प्राजापत्यविवाह, असुरविवाह, गांधर्वविवाह, राक्षसविवाह तसेच पिशाचविवाह, इ. विवाह आचारानुगुणाने आठ प्रकारचे आहेत. या सगळ्यांचे लक्षण मनु ऋषिने दिलेले आहेत. ते लक्षण या प्रकार आहेत -

ब्राह्मविवाहः-

आच्छाद्य चार्चयित्वा च श्रुतिशीलवते स्वयम्।

आहूय दानं कन्यायाः ब्राह्मो धर्मः प्रकीर्तितः ॥२८६॥

॥ मनुस्मृतिः ३-२७॥

विद्यावते शीलवते च पुरुषाय उत्तमवस्त्रान् आच्छाद्य अर्चयित्वा च कन्यायाः दानं ब्राह्मः विवाहः प्रकीर्तितः।

विद्यावान आणि शीलवान पुरुषाला उत्तम वस्त्र देऊन पूजा करुन कन्याचे कन्यादान करने म्हणजे ब्राह्मविवाह होय.

दैवविवाहः-

यज्ञे वितते सम्यक् ऋत्विजे कर्म कुर्वते।

अलङ्कृत्य सुतादानं दैवं धर्म प्रचक्षते ॥२८७॥

॥ मनुस्मृतिः ३-२८॥

ज्योतिष्टोमादिकर्मणि प्रवृत्ताय ऋत्विजे अलङ्कृत्य सुतायाः प्रदानं दैवविवाहः इति कथ्यते।

ज्योतिष्टोमादिमध्ये प्रवृत्त ऋत्विजाला अलंकृत करुन कन्यादान करणे म्हणजे दैवविवाह होय.

आर्षविवाहः-

एकं गोमिथुनं द्वे वा वरादादाय धर्मतः।

कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते ॥२८८॥

॥ मनुस्मृतिः ३-२९॥

गोमिथुनं धर्मार्थम् आदाय न तु शुल्कबुध्या यथाशास्त्रं कन्यादानम् आर्षः

विवाहः उच्यते।

गायच्या जोडीचे दान धर्मासाठी शुल्कबुद्धि करू नये शास्त्रानुरोध जे कन्यादान केले जाते त्याला आर्ष विवाह कहते है।

प्राजापत्यविवाहः-

सहोभौ चरतां धर्ममिति वाचानुभाष्य च।

कन्याप्रदानमभ्यर्च्य प्राजपत्यो विधिः स्मृतः॥२८९॥

॥मनुस्मृतिः ३-२७॥

'सह एव धर्मं चरताम्' इति वाचा उक्त्वा कन्यायाः प्रदानं प्राजापत्यः विवाहः।

दोघांनी मिळून धर्माचे आचरण करू असे म्हणून कन्यादान करणे म्हणजे प्राजपत्य विवाह होय.

आसुरविवाहः -

ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः।

कन्याप्रदानं स्वाच्छन्द्यात् आसुरो धर्म उच्यते ॥२९०॥

॥ मनुस्मृतिः ३-३१॥

कन्यायै कन्यायाः बन्धुभ्यः च यथेच्छं धनं दत्त्वा स्वेष्टायाः कन्यायाः आप्रदानं स्वीकारः आसुरः विवाहः। आर्षे धर्मोक्तरीत्या प्रदानम्, आसुरे स्वेच्छया प्रदानमिति भेदः।

कन्या आणि त्यांचे बंधुभावाच्या यथेच्छ धन देऊन स्वेष्ट कन्याबरोबर विवाह करने म्हणजे आसुर विवाह होय. आर्ष विवाहमध्ये धर्मोक्त रीतिने प्रदान आणि आसुर विवाहमध्ये स्वेच्छ रीतिने प्रदान हा भेद आहे.

गान्धर्वविवाहः -

इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च।

गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः ॥२९१॥

॥ मनुस्मृतिः ३-३२॥

कन्यायाः वरस्य च परस्परेच्छया अन्योन्यसंयोगः गान्धर्वः प्रोक्तः। कामसम्भवः अयं मैथुन्यः इत्यपि अभिधीयते।

कन्या आणि वराच्या परस्पर इच्छेने झालेला विवाह म्हणजे गान्धर्व होय. कामसम्भव चा अर्थ मैथुन्य होतो.

राक्षसविवाहः-

हत्वा छित्वा च भित्वा च क्रोशन्तीं रुदतीं गृहात्।

प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते ॥२९२॥

॥ मनुस्मृतिः ३-३३॥

बलात्कारेण कन्यायाः हरणं राक्षसः विवाहः इति कथ्यते।

बलपूर्वक कन्याचे हरण करने म्हणजे राक्षस विवाह होय.

पैशाचविवाहः -

सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति।

स पापिष्ठो विवाहानां पैशाचश्चाऽष्टमोऽधमः॥२९३॥

॥ मनुस्मृतिः ३-३४॥

सुप्तायाः पानमत्तायाः वा कन्यायाः उपगमनं पैशाचः विवाहः उक्तः।

सुप्त अथवा पानमत्त कन्याचे उपगमन म्हणजे पैशाच विवाह होय.

अष्टाङ्गप्रणामः -

पभ्द्यां कराभ्यां जानुभ्यां (कर्णाभ्याम्) उरसा शिरसा दृशा।

वचसा मनसा चैव प्रणामोऽष्टाङ्ग उच्यते ॥२९४॥

पायाने, हाथने,कानाने, उर, मस्तिष्कने, नेत्राने, वाणीने आणि मनाने केलेला प्रणाम अष्टांग मनला जातो.

आगमः -

तान्त्रिकमते आगमपदं भिन्नार्थे प्रयुज्यते। लोके तु वेदः आगमपदेन अभिधीयते। तल्लक्षणमेवमुक्तम् -

तान्त्रिकांच्या मतानुसार आगम हा शब्द अन्य अर्थामध्ये प्रयुक्त होतो. लोकामध्ये आगम या शब्दाने वेद अभिहित होतात. त्याचे लक्षण संगत आहेत्–

सिद्धं सिद्धैः प्रमाणैस्तु हितं वात्र परत्र वा।

आगमः शास्त्रमाप्तानाम् आप्तास्तत्त्वार्थवेदिनः ॥२९५॥

यैः सिद्धैः प्रमाणैः अत्र परत्र वा हितं सिद्ध्यति तादृशं शास्त्रमागमः।

ज्यांच्या द्वारे सिद्ध प्रमाणाने ईथे अथवा परत्र हित सिद्ध होतो, त्याला शास्त्रागम म्हणतात.

तान्त्रिकमतम् -

सृष्टिश्च प्रलयश्चैव देवतानां यथार्चनम् ।

साधनं चैव सर्वेषां पुरश्चरणमेव च ॥२९६॥

षटकर्म साधनं चैव ध्यानयोगश्चतुर्विधः।

सप्तभिर्लक्षणैर्युक्तमागमं तं विदुर्बुधाः ॥२९७॥

॥ वाराहीतन्त्रम्॥

सृष्टिः प्रलयः देवतार्चनं सर्वसाधनं पुरश्चरणं षट्कर्मसाधनं (षट कर्माणिशान्तिः वशीकरणं स्तम्भनं विद्वेषणम् उच्चाटनं मारणम्) ध्यानयोगः एतैः लक्षणैः संयुक्तः यः सः आगमः भवति।

सृष्टि, प्रलय, देवतार्चन, सर्वसाधन, पुरश्चरण, षट्कर्मसाधन (षट् कर्म – शान्ति, वशीकरण, स्तम्भन, विद्वेषण, उच्चाटन, मारण) ध्यानयोग या लक्षणाने संयुक्त आगम होतो.

आचारः -

पञ्चेन्द्रियस्य देहस्य बुद्धेश्च मनसस्तथा।
द्रव्यदेशक्रियाणां च शुद्धिराचार उच्यते ॥२९७-१॥

पञ्चेन्द्रिय, देह, बुद्धि, मन तथा द्रव्यदेशक्रिया या सगळ्यांच्या शुद्धिला आचार म्हणतात.

आचार्यः -

आचिनोति च शास्त्रार्थान् आचारे स्थापयत्यपि।
स्वयमाचरते यस्मात् तस्मादाचार्य उच्यते ॥२९८॥

शास्त्रार्थानामाचरणे अन्यान् प्रेरयति, स्वयं च यः आचरते सः आचार्यः भवति।

शास्त्रार्थाच्या आचरणामध्ये अन्याला प्रेरित करतात आणि जो स्वयं आचरण करतात, त्यांना आचार्य म्हणतात.

यद्वा -

उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः।

सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥२९९ ॥

॥ मनुस्मृतिः २-१४०॥

आत्मघाती :-

व्यापादयेत् वृथात्मानं स्वयं योऽग्न्युदकादिभिः।

अवैधेनैव मार्गेण आत्मघाती स उच्यते ॥३००॥

यः अविहितेन मार्गेण अग्न्युदकादिभिः वृथा आत्मानं व्यापादयेत् सः आत्मघाती। अयं व्यावहारिकः आत्मघातः। पारमार्थिकदृष्ट्या यथार्थज्ञानरहिताः सर्वेऽपि आत्मघातिनः इति उपनिषदः ब्रुवन्ति । उपनिषत्सु आत्महा इति शब्दप्रयोगः दृश्यते। तद्यथा - ताग्-स्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः।

जो व्यक्ति अविहित मार्गाने, अग्नि, जल इत्यादिने स्वतःचे कोणते कारण नसताना नुकसान पोहचवतो त्याला आत्मघाती म्हणतात. हा व्यावहारिक आत्मघात आहे. उपनिषदांच्या नुसार पारमार्थिक दृष्टिने पहिले तर तो यथार्थज्ञानरहित जे लोग आहेत ते सगळे आत्मघाती मानले जाते. उपनिषदामध्ये आत्म हा शब्दप्रयोग मिलतो. यथा - ताग्-स्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः।

आत्मा:-

यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह ।

यच्चास्य सन्ततोभावः तस्मादात्मेति कीर्त्यते ॥३०१॥

यच्छब्दाः सर्वे यस्मादर्थे द्रष्टव्याः।आप्लृ व्याप्तौ इति धात्वर्थयोगेन व्यापकः आत्मा। आदत्ते संहरति स्वात्मन्येव सर्वमिति लयाधिष्ठानमुच्यते। कार्यस्य च कारणे लयः इत्यात्मनः अनया व्युत्पत्या उपादानकारणत्वं लभ्यते।

इह लोके। विषयानत्तीत्यनेन योगेन उपलब्धृत्वमात्मनः लभ्यते। यच्चास्य सन्ततोभावः - यस्मात् अस्य जगतः सत्ता निरन्तरा विद्यते स आत्मा। आरोपितस्य अधिष्ठानसत्तातिरिक्तसत्ताकत्वस्य अनभ्युपगमात्। अनया व्युत्पत्या आत्मनः अधिष्ठातृत्वं लभ्यते।

यत् हा शब्द यस्मात् (याने) या अर्थी आहे, आप्लृ व्याप्तौ या धातूने निष्पन्न झाल्याने व्यापक अर्थात् आत्मा असे म्हणता येईल. आदत्ते संहरति स्वात्मन्येव सर्वमिति (जो स्वताः मध्येच सगळ काही उत्पन्न/संहार करतो) तो लयाचा अधिष्ठाता आहे. कार्याचे कारण लय आहे, असा व्युत्पत्तिने आत्म्याचे उपादानकारणत्व सिद्ध होते. इहलोकातील विषयाच्या योग्याने आत्म्याच्या उपलब्धाचा लाभ होतो. जो ज्याच्या संततभाव – ज्याच्यामुळे या जगांत निरन्तर सत्ता आहे ते म्हणजे आत्मा होय. आरोपित वस्तूची अधिष्ठान व्यतिरिक्त सत्ता स्वीकारल्या जात नाही. या व्युत्पत्तिने आत्माचे अधिष्ठातृत्व सिद्ध होते.

आर्यः -

कर्तव्यमाचरन् सम्यग् अकर्तव्यमनाचरन् ।

तिष्ठति प्रकृताचारे यः स आर्य इति स्मृतः॥३०२॥

जो व्यक्ति कर्तव्याचे चांगल्या प्रकारे आचरण करतो आणि अकर्तव्याचे अनाचरण करतो तो आर्य मानला जातो.

आश्रमाः –

चत्वारः आश्रमाः प्रसिद्धाः ब्रह्मचर्याश्रमः गृहस्थाश्रमः वानप्रस्थाश्रमः संन्यासाश्रमः इति । प्रत्येकस्मिन् आश्रमेऽपि पुनः उपविभागाः विद्यन्ते। ते च –

चार प्रकारचे आश्रम प्रसिद्ध आहेत. ब्रह्मचर्याश्रम, गृहस्थाश्रम, संन्यासाश्रम आणि वानप्रस्थाश्रम. पुन्हा त्यामध्ये उपविभाग आहेत.

चतुर्विधाः ब्रह्मचारिणः -

प्राजापत्यश्च गायत्रो वैदिको नैष्ठिकस्तथा।
एवं प्रकीर्तिताः ब्रह्मचारिणस्ते चतुर्विधाः ॥३०३॥

॥ शिवतत्त्वरत्नाकरः ४-४-६१॥

उपनयनादूर्धं यस्त्रिरात्रमक्षारलवणशी गायत्रीमधीते सः गायत्रः। यस्तु वेदस्य ग्रहणान्तं ब्रह्मचर्यं चरति सः ब्राह्मणः वैदिकः वा । ऋतुकाले स्वदारगामी नित्यं परस्त्रीविमुखः प्राजापत्यः। आमरणं गुरुकुलवासी नैष्ठिकः ब्रह्मन् उच्यते।

उपनयन संस्कारा नंतर जो तीन रात्रीपर्यन्त आक्षरलवणशी गायत्रीचे अध्ययन करतो तो गायत्र असे मानला जातो, जो वेद ग्रहणाच्या समाप्तिपर्यन्त ब्रह्मचर्याचे पालन करतो तो ब्राह्मण/वैदिक होतो. ऋतुकाळामध्ये स्वदारगामी नित्य परस्त्रीविमुख राहणार प्राजापत्य होतो. आमरण गुरुकुलवासी नैष्ठिक ब्रह्मन मानला जातो.

चतुर्विधाः गृहस्थाः -

गृही चतुर्विधस्त्वेषाः प्रथमो वार्तवृत्तिकः।
यायावरश्च स्वाधीनवृत्तिमौनीति भेदतः ॥३०४॥

॥ शिवतत्त्वरत्नाकरः ४-५-४५॥

कृषिगोरक्षादिकया वैश्यादिवृत्या जीवन् नित्यादिक्रियापरः वार्ताकवृत्तिः। यायावरस्तु अयाचितवृत्तिः याजनाध्यापनप्रतिग्रहविमुखः। षट्कर्मनिरतः याजनादिवृत्तिः सञ्चयी शालीनः स्वाधीनवृत्तिः वा । उद्धृतपरिपूताभिरद्भिः कार्यं कुर्वन् प्रत्यहं कृतोञ्छवृत्तिः ग्रामवासी घोरसंन्यासिकः मौनी वा।

गृहस्थ चतुर्विध आहे -

कृषिने, गोरक्षादिने वैश्यादिवृत्तिने जिंकले आहे, नित्यकर्मामध्ये राहणारे, तो वार्ताकवृत्तिक आहे. यायावर अर्थात् अयाचितावृति, याजन, अध्यापन आणि प्रतिग्रह (दान) जे यापेक्षा विमुख आहे. तृतीय षड्कर्मनिरत, याजनादिवृत्ति, सञ्चयी, शालीन, स्वाधीनवृत्ति ज्यांची आहे. बहते वाहत्या पाण्यात काम करून घेणे, भिक्षाटन करून जो घोर संन्यासी आहे त्याला मौनी असे म्हणतात.

चतुर्विधाः वानप्रस्थाः-

वानप्रस्थश्चतुर्धासावाद्य औदम्बरो भवेत्।

वैखानसोऽथ प्रक्षाली पौर्णिमश्चेति भेदतः॥३०५॥

॥ शिवतत्त्वरत्नाकरः ४-५-५२॥

आकृष्टपच्योषधीभिः ग्रामबहिष्कृताभिः अग्निहोत्रादीन् कुर्वन् वैखानसः। यः प्रातरुत्थाय यां दिशं पश्यति तत्रत्यौदुम्बरबदरीनीवारश्यामाकैः कर्मपरः सः औदुम्बरः। यस्तु जटावल्कलधारी अष्टौ मासान् वृत्युपार्जनं कृत्वा चातुर्मास्ये सङ्ग्रहीताशी कार्तिक्यां सङ्ग्रहीतपुष्पफलत्यागी वालखिल्यः पौर्णिमः। शीर्णपर्णफलवृत्तयः यत्र क्वचित् वसन्तः कर्मपराः फेनपाः प्रक्षालिनः वा। आकृष्टपच्योषधि, ग्रामबहिष्कृतांने अग्निहोत्रादि करणारा वैखानस होतो. जो प्रातः उठून ज्या दिशेला बघेल तिथे औदुंबर, बेर, नीवार आणि श्यामक या सर्वाने कार्य करतो. तो औदुंबर आहे. जो जटाधारी आणि वल्कलधारी आहे- आठ महीन्या पर्यन्त वृत्तिचे उपार्जन करून चातुर्मासामध्ये

संग्रहीताशी, कार्तिकमध्ये संग्रहीत पुष्प आणि फळ त्यागून करणारा वालखिल्य पौर्णिम असे म्हणतात. शीर्ण, पर्ण, फलाची वृत्ति करणारा, यत्र कुत्रचित् राहनारा, कर्मपर राहनारा फेनप अथवा प्रक्षाली असे म्हणतात.

चतुर्विधाः संन्यासिनः-

कुटीचको बहूदश्च हंसः परमहंसकः।

इति सन्न्यासिनां भेदाः चतुर्धा परिकीर्तिताः ॥३०६ ॥

॥ शिवतत्त्वरत्नाकरः ४-५-६४ ॥

स्वपुत्रगृहे भिक्षां चरन्तः त्रिदण्डिनः कुटीचकाः। बहूदकाः त्रिदण्डिनः शिक्यजलपवित्रपादुकासनशिखायज्ञोपवीतकौपीनकाषायवेषधराः तीर्थान्यटन्तः भैक्ष्यं चरन्तः आत्मानं प्रार्थयन्ते। हंसाः तु एकदण्डिनः शिखावर्जं यज्ञोपवीतधराः शिक्यकमण्डलुपाणयः ग्रामैकरात्रवासिनः कृच्छ्रचान्द्रायणपराः। परमहंसाः एकदण्डिनः मुण्डाः अयज्ञोपवीतिनः त्यक्तसर्वकर्माणः आत्मनिष्ठाः।

स्वतःच्या पुत्राच्या घरी भिक्षेचे आचारण करनारा त्रिदण्डी संन्यासी कुटीचक होत. बहूदक प्रकारचे त्रिदण्डी, मौञ्ज, जल, पवित्र, पादुका, आसन, शिखा, यज्ञोपवीत, कौपीन, काषायवेषधारी, तीर्थ करनेवाले, भिक्षेचे आचरण करनारा, आत्म्याची प्रार्थना करतात. हंस हे तर एकदंडी, शिखावर्ज्य, यज्ञोपवीतधारी, हातामध्ये शिक्य आणि कमंडलु घेऊन, एक गावमध्ये एकच् रात्र राहणारा, कृच्छचांद्रायण व्रताचे आचरण करणारा होतो. परमहंस एकदंडी, मुंड, अयज्ञोपवीत, सर्व कर्माला त्यागून आत्मनिष्ठ होतो.

इतिहासः -

धर्मार्थकाममोक्षाणामुपदेशसमन्वितम् ।

पूर्ववृत्तं कथायुक्तम् इतिहासं प्रचक्षते ॥३०७॥

जिथे धर्म, अर्थ, काम आणि मोक्ष या पुरुषार्थांचा उपदेश होतो. अतीत वृत्त, कथा होती, तो इतिहास होतो.

यत्र धर्मार्थकाममोक्षाख्याणां पुरुषार्थानाम् उपदेशः अतीतवृत्तं कथा च भवति सः इतिहासः।

जिथे धर्म, अर्थ, काम आणि मोक्ष या पुरुषार्थांचा उपदेश सांगितला आहे, तो इतिहास होय.

इष्टपूर्तदत्तकर्माणि -

अग्निहोत्रं तपः सत्यं वेदानां चानुपालनम्।

आतिथ्यं [१]वैश्वदेवश्च इष्टमित्यभिधीयते॥३०८॥

वापीकूपतडागादिदेवतायतनानि च।

अन्नप्रदानम् *आरामः पूर्तमित्यभिधीयते॥३०९॥

॥अत्रिसंहिता० १/४/४॥

[308] - अग्निहोत्र, तप, सत्य, वेदांचे अनुपालन, आतिथ्य, वैश्वदेव(श्रौतकर्म) यांना इष्ट असे म्हटले जाते.

[309] - वापी, कूप, तालाब, देवयतन, अन्न का प्रदान, उपवन यांना पूर्त असे म्हणतात.

[310] - शरणागताचे रक्षण, भूतदया, यज्ञ च्या अतिरिक्त पण केलेले दान दत्त असे मानले जाते.

शरणागतसत्राणं भूतानां चाप्यहिंसनम्।

***'बहिर्वेदि च यद्दानं दत्तमित्यभिधीयते ॥३१०॥**

***/१ श्रौतकर्मविशेषः। *२ उपवनम्। ३'यज्ञात् बहिरपि दानम्।**

उत्तरम् -

पक्षस्य व्यापकं सारम् असन्दिग्धमनाकुलम्।

अव्याख्यागम्यमित्येतद् उत्तरं तद्विदो विदुः ॥३११॥

प्रकृतेनत्वसम्बद्धमत्यल्पमपि भूरि च।

पक्षैकदेशव्यापि च तच्च नैवोत्तरं भवेत् ॥३१२॥

अस्तव्यस्तपदव्यापि निगूढार्थं तथाकुलम्।

व्याख्यागम्यमसारं च तच्च नैवोत्तरं भवेत् ॥३१३॥

ज्या पक्षाचा सार ज्ञात आहे, जो क्लिष्ट नाही, संदेह रहित असावा, बोलल्या नंतर ज्याला व्याख्या ची आवश्यकता नसेल अश्यास उत्तर म्हणाले जाते.

जेंव्हा उक्त वचन ऐकल्यानंतर स्पष्टता नसेल, संदेहनिवारण होत नसेल,जो एकदेशव्यापी असावा, ज्याला समजन्यासाठी व्याख्याचा आश्रय घ्यावा लागतो, जो सार रहित आहे ते उत्तर होऊ शकत नाही.

उपपुराणानि -

उपपुराणानि अपि अष्टादशसंख्याकानि । नाम्नः विषये मतभेदः विद्यते।

अत्र तु शिवतत्त्वरत्नाकरग्रन्थे उल्लिखितः श्लोकः प्रदर्श्यते -

[उपपुराण १८ आहेत, किन्तु त्यांच्या नावाच्या विषयामध्ये मतभेद आहे. इथे शिवतत्त्वरत्नाकरग्रन्थाच्या अनुसार एका श्लोकाद्वारे उपपुराणाचे नाव

सांगितले आहे –]

आद्यं सनत्कुमारोक्तं नारसिंहं ततः परम्।

स्कान्दसंज्ञं कुमारेण कथितं तदनन्तरम् ॥३१४॥

चतुर्थं शिवधर्माख्यं पुराणं नन्दिनेरितम्।

तथा दूर्वाससा प्रोक्तं नारदीयं ततः परम् ॥३१५॥

कापिलं मानवं चैव तथैवोशनसेरितम् ।

ब्रह्माण्डं च ततः पुण्यं वारुणाख्यं ततः परम् ॥३१६॥

ततःकालीपुराणाख्यं नाम्ना माहेश्वरं च तत् ।

ततः साम्बपुराणाख्यं सुसूक्ष्ममिति चेरितम् ॥३१७॥

पाराशरं च मारीचं भार्गवाख्यं ततः परम्।

सर्वाण्युपपुराणानि ब्रह्मज्ञानपराणि वै॥३१८॥

सनत्कुमार, नारसिंह, स्कंद, शिवधर्म, दुर्वासा के द्वारा प्रणीत, नारद, कापिल, मानव, उशनस, ब्रह्मांड, पुण्य, वरुण, काली, महेश्वर, सांब, पारशर, मारीच, भार्गव,

उपवासः -

उपावृत्तस्य पापेभ्यः यस्तु वासो गुणैः सह।

उपवासः स विज्ञेयः सर्वभोगविवर्जितः ॥३१९॥

उपवीतनिवीतप्राचीनावीताः -

यज्ञोपवीतस्य स्थानभेदात् प्रयोजनभेदात् च नामत्रयं विद्यते। उपवीतं निवीतं प्राचीनावीतम् इति। तदेवमुक्तम् -

यज्ञपविताचे स्थानभेद आणि प्रयोजनभेदाचे तीन भाग आहेत. उपवीत, निवीत, प्राचीनावीत.

उद्धृते दक्षिणे पाणवुपवीत्युच्यते व्दिजः।

सव्ये प्राचीन-आवीती निवीती कण्ठसज्जने ॥३२०॥

॥ मनुस्मृतिः १- ६३॥

दक्षिणे पाणौ उद्धृते यदि वामभागे यज्ञोपवीतं तर्हि स ब्राह्मणः उपवीतीति दक्षिणे भागे स्थिते प्राचीनावीतीति कण्ठे स्थिते निवीतीति कथ्यते।

यज्ञपवीत जर वाम भागच्या हाताने येऊन धारण केलेला तेंव्हा त्याला उपवीति असे म्हणतात, दक्षिणभागाणे होऊन धारण केले असेल तर तो त्याला प्राचीनावीति आणि मध्यामध्ये कण्ठाभरणा सारखे जर धारण केले असेल तर त्याला निवीति असे म्हणतात.

उपवेदाः –

वेदः मन्त्रब्राह्मणात्मकः। तत्र संहिता एव मन्त्रः इति कथ्यते । ब्राह्मणे पुनः त्रैविध्यम्। ब्राह्मणम् आरण्यकम् उपनिषत् चेति। स च वेदः चतुर्धा विभक्तः ऋग्यजुःसामाथर्वभेदेन। सन्ति चत्वारः उपवेदाः अपि। ते च –

मन्त्र आणि ब्राह्मण सहित ग्रन्थ वेद होत आहे. वेदामध्ये संहितेला मन्त्र असे बोलले जात आहे. ब्राह्मण पुनः तीन प्रकारचे होत आहे - ब्राह्मण, आरण्यक आणि उपनिषत्। वेद चार भागामध्ये विभक्त आहे - ऋग्वेद, यजुर्वेद, सामवेद, अथर्ववेद। चार उपवेद आहेत –

आयुर्वेदोऽथर्वेदश्च धनुर्वेदस्तथैव च।

गान्धर्ववेद इत्येवम् उपवेदाः चतुर्विधाः ॥३२१॥

॥शिवतत्त्वरत्नाकरः १-३६ ॥

उपवेदस्वरूपम् -

हेतुलिङ्गौषधिस्कन्धैरायुरारोग्यसाधनम् ।

आयुर्वेदः परिज्ञेयः धर्माद्यर्थैस्त्रिभिनरैः ॥३२२॥

धनुर्वेदो भवत्यत्र परिपन्थिनिरासकः ।

सप्तस्वरप्रभेदो हि सामगान्धर्ववेदयोः॥

अर्थवेदोऽन्नपानादिप्रधानमखतत्परः ॥३२३॥

॥ शिवतत्त्वरत्नाकरः -२-१६ ॥

हेतु, लिङ्ग, औषधि, स्कन्ध याने आरोग्यसाधन करणारा आयुर्देव तिन्ही पुरुषांचे ध्यान ठेवले पाहिजे.

परिपन्थिनिरासक असा धनुर्वेद आहे. सप्त स्वरांसहित सामवेद आहे.

उपाध्यायः -

एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः।

योऽध्यापपति वृत्यर्थम् उपाध्यायः स उच्यते ॥३२४॥

॥मनुस्मृतिः २-१४१॥

कालिदासः एतादृशज्ञानविक्रेतारमुपाध्यायं वणिजं ब्रुवन् शिक्षकेषु श्रेष्ठः कः इति अपि वदति। तद्यथा –

कालिदास या प्रकारचे ज्ञानविक्रेता उपाध्यायला वणिज् सांगून शिक्षकामध्ये मी कोणता श्रेष्ठ होतो, हे सांगतात -

लब्धास्पदोऽस्मीति विवादभीरोः तितिक्षमाणस्य परेण निन्दाम्।

यस्यागमः केवलजीविकायै तं ज्ञानपण्यं वणिजं वदन्ति ॥३२५ ॥

॥ मालविकाग्निमित्रम् १ -१७॥

यः पुरुषः उत्तमं स्थानं प्राप्तवानस्मीति विचिन्त्य स्थानरक्षणार्थं विवादाद्दरे तिष्ठति । यः च प्रतिस्पर्धिनः निन्दामपि सहते। यस्य विद्या जीविकायै केवलं विद्यते तं ज्ञानविक्रेतारं वणिजं वदन्ति ।

जो पुरुष उत्तम स्थान मिळाले असा विचारकरून स्थानाच्या रक्षण हेतु

विवादाने दूर रहत आहे, जो प्रतिस्पर्धीची निन्दा पण सहन करत आहे, ज्याची विद्या केवल जीविका साठी होत आहे. असि व्यक्तिला वणिज् असे म्हणतात.

शिष्टक्रिया कस्य चिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता।

यस्योभयं साधु स शिक्षकाणां धुरिप्रतिष्ठापयितव्य एव ॥३२६॥

॥ मालविकाग्निमित्रम् १ - १६॥

विद्यायां पारङ्गतत्वम् अधीतस्य च योग्यरीत्या अभिव्यक्तिनिपुणता एतद्वयं यस्मिन् विद्यते सः शिक्षकेषु उत्तमः।

ऋत्विक् –

विद्यामध्ये पारङ्गत आणि अधीत ज्ञानाची योग्यरीतिने अभिव्यक्त करण्याची निपुणता हे दोन गुण ज्यामध्ये आहे तो शिक्षकांमध्ये उत्तम आहे.

अग्न्याधेयं पाकयज्ञाननिष्टोमादिकान् मखान् ।

यः करोति वृतो यस्य सः तस्यत्विंगिहोच्यते ॥३२७॥

॥मनुस्मृतिः॥

अग्न्याधेयं (आहवनीयाद्यग्न्युत्पादकं कर्म) पाकयज्ञान् अग्नीष्टोमादीन् च यः यस्यार्थे करोति तस्य यजमानस्य सः ऋत्विग्भवति ।

अग्न्याधेय, पाकायज्ञ आणि अग्निष्टोम इत्यादि जो करतो तो त्या यजमानाचा ऋत्विग् होतो.

ऋषिः -

ऊर्ध्वरेतास्तपस्युग्रः नियताशीः च संयमी।

शापानुग्रहयोः शक्तः सत्यसन्धो भवेदृषिः॥३२८॥

उग्र तप करणारे, नियताशी, संयमी, शाप आणि अनुग्रहाने शक्त, सत्यसंध

अस्यानां ऋषि म्हणतात.

लौकिकेभ्यः ऋषयः एवं भिद्यन्ते –

लौकिकानां तु साधूनामर्थं वागनुवर्तते।

ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥३२९॥

॥ उत्तररामचरितम् १-१०॥

लौकिक लोगांपासून ऋषि या प्रकारे अलग होतात -

लौकिक साधुंची वाणी अर्थाचे अनुवर्तन करते. किन्तु ऋषिंची वाणी अर्थच् अनुवर्तन करतात.

ओषध्यः वनस्पतयः -

ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः।

अपुष्पाः फलवन्तो ये ते वनस्पतयः शृुताः॥३३०॥

॥मनुस्मृतिः १-४७॥

कलञ्जम् -

विषसंपृक्तबाणेन हतौ यौ मृगपक्षिणौ।

तयोर्मांस कलञ्जं स्यात् भुक्त्वा चान्द्रायणं चरेत् ॥३३१॥

विषयुक्त वाणाने हत मृग आणि पक्षिंचे जो मांस आहे त्याला कलञ्ज असे म्हणतात.

कलियुगम् –

कलियुगस्य वर्णनं दृश्यते बहुषु प्राचीनग्रन्थेषु। सहस्राधिकवर्षेभ्यः प्राक् उक्तविषयाणामाधुनिककाले साम्यता प्राचीनानां दूरदृष्टेः प्रमाणम्। कलियुगस्य वर्णनपराः केचन श्लोकाः –

कलियुगाचे वर्णन भरपूर ग्रन्थामध्ये उपलब्ध आहे. सहस्र वर्षापूर्वि उक्त

विषयाचे आधुनिक कालाने साम्य राहणे हा प्राचीनाची दूरदृष्टिचे परिणाम आहे. कलियुगाचे विषयक काही श्लोक आहेत -

अट्टशूलाः जनपदाः शिवशूलाः द्विजातयः।

कामिन्यः भगशूलिन्यः सम्भवन्ति कलौ युगे ॥३३२॥

कलौ युगे जनपदाः अन्नविक्रयणपराः ब्राह्मणाः वेदविक्रयणपराः स्त्रियः शरीरविक्रयणपराः च भवन्ति।

कलियुगामध्ये जनपद अन्नाचे विक्रेता, ब्राह्मण वेदों के विक्रेता आणि स्त्री शरीराची विक्रेता होईल.

धर्मः प्रव्रजितस्तपः प्रचलितं सत्यं

च दूरे गतं पृथ्वी मन्दकला नरः

कपटिनः चित्तं च शाठ्योर्जितम्।

राजानोऽर्थपरा न रक्षणपराः पुत्राः

पितुर्द्वेषिणः साधुः सीदति दुर्जनः

प्रभवति प्राप्ते कलौ दुर्युग ॥३३३॥

निर्बीजा पृथिवी निरौषधिरसाः

नीचा महत्त्वं गताः भूपाला निजधर्म-

कर्मरहिता विप्राः कुमार्गे गताः।

भार्या भतृविरोधिनी पररता पुत्राः

पितुर्दूषकाः हा कष्टं खलु

वर्तते कलियुगे धन्या मृता ये नरा ॥३३४॥

पृथ्वी आपली हरियाळी, धान्याल्या हरवले असेल, ओषधि लुप्त झालेली

असेल, नीच लोग महत्त्व मिळवतील, राजा आपला धर्म आणि कर्माने विलुप्त होऊन जातील, ब्राह्मण कुमार्गाचा अनुसरण करेल, भार्या पतिची विरोधिनी होईल आणि अन्यामध्ये रत होणारी असेल, पुत्र आपल्या पिताचा द्वेषी होईल, (अतः प्राचीन म्हणतात) जो कलियुगामध्ये नाही (मृत झालेले असेल) तो धन्य असेल.

कविः -

प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता।

तदनुप्राणनाज्जीवव्दर्णनिपुणः कविः ॥३३५॥

॥काव्यकौतुकम्॥

कायिकनमस्कृतिः -

जानुभ्यामवनीं गत्वा संस्पृश्य शिरसा क्षितिम् ।

क्रियते यो नमस्कारः प्रोच्यते कायिकस्तु सः॥३३६॥

घुडग्यावार बसून डोके भूमिवर ठेवून जो नमस्कार केला जातो. त्याला कायिक नमस्कार असे म्हणतात.

काव्यम् -

कवेः कर्म काव्यं तल्लक्षणमेवमुक्तम् -

गुणालङ्कारसहितौ शब्दार्थो दोषवर्जितौ।

गद्यपद्योभयमयं काव्यं काव्यविदो विदुः ॥३३७ ॥

काव्यस्य प्रयोजनं तु महत् । उक्तं च –

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।

सद्यः परनिर्वृतये कान्तासम्मिततयोपयुजे ॥३३८॥

यशसः प्राप्तिः, धनप्राप्तिः, व्यवहारज्ञानम्, अनिष्टनिवारणं, परमानन्दप्राप्तिः, कान्तासम्मितोपदेशप्राप्तिः इति काव्यस्य प्रयोजनम्।

यशाची प्राप्ति, धनाची प्राप्ति, व्यवहारज्ञान, अनिष्टनिवारण, परमानन्दप्राप्ति, कान्तासम्मितोपदेशप्राप्ति हे काव्याचे प्रयोजन आहे.

धर्मार्थकाममोक्षाणां वैचक्षण्यं कलासु च।

करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ॥३३९॥

॥काव्यालङ्कारः॥

ज्या काव्यामध्ये धर्म, अर्थ, काम आणि मोक्ष, कला, कीर्ति, प्रीति यांचा अन्तर्भाव आहे तो अच्छा काव्य होते.

तस्मिन् पुरुषे काव्योत्पत्तिः भवति यस्मिन् प्रतिभा निपुणता परिश्रमः च विद्यते। उक्तं भामहेन -

ज्याच्यामध्ये प्रतिभा, निपुणता आणि परिश्रम होते, त्यामध्ये काव्योत्पत्ति होते, भामह म्हणतात-

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।

काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥३४०॥

गुरूपदेशमध्येतुं शास्त्रं जडधियोप्यलम्।

काव्यं तु जायते जातु कस्यचित् प्रतिभावतः॥३४१॥

प्रथम श्लोकामध्ये काव्याचे उद्भवनाच्या हेतु सांगितले आहेत. द्वितीय श्लोकामध्ये सांगतात - गुरूपदिष्ट शास्त्राचे अध्ययन करण्यासाठी कोणी जड बुद्धिवाला पण पर्याप्त होईल काव्य तर कोणत्या प्रतिभावान् ला ही अवगत होऊ शकते.

कुलपतिः -

आचार्यो बहुशिष्याणां मुनीनामग्रणीस्तु यः।

व्रतयज्ञादिकर्माढ्यः स वै कुलपतिः स्मृतः॥३४२॥

अनेक विद्यार्थ्यांचे आचार्य, मुनिंचे नेता, व्रत, यज्ञ इत्यादि करणारे कुलपति असे म्हणतात.

यद्वाः-

मुनीनां दशसहस्रं योऽन्नपानादिपोषणात्।

अध्यापयति विप्रर्षिः असौ कुलपतिः स्मृतः॥३४३॥

गणाः-

छन्दसः निर्धारणे गणाः प्रधानं पात्रं वहन्ति । गुरुलघ्वाधारेण अष्ट गणाः रचिताः विद्यन्ते। तेषां लक्षणमेवमुक्तम् –

छन्दाच्या निर्धारणामध्ये गणांचे अत्यधिक महत्त्व आहे. गुरु आणि लघुच्या आधाराने आठ गणांची रचना केली आहे. त्याचे लक्षण या प्रकारे आहे -

सर्वगुर्मो मुखान्तर्लौ यरावन्तगलौ सतौ।

ग्माध्याद्यौ ज्भौ त्रिलो नोऽष्टौ भवन्त्यत्र गणास्त्रिकाः॥३४४॥

॥वृत्तरत्नाकरः७॥

सर्वगुः - सर्वे गुरवः यत्र सः सर्वगुरुः मगणः। मुखान्तर्लौ - मुखे आदौ अन्तः मध्ये लघुः ययोः तौ क्रमेण यगणरगणौ भवतः। अन्तगलौ - अन्ते गुरुः लघुः ययोः तौ सगणतगणौ भवतः। गुरुः मध्यश्च आद्यश्च ययोः तौ क्रमेण जगणभगणौ। त्रिलः- त्रयः

लघवः यस्य सः नगणः भवति।

सर्वगु - सर्व गुरु वर्ण जिथे होत आहे - मगण। मुखान्तर्लौ - मुखामध्ये आदि अन्तामध्ये मध्यामध्ये क्रमाने ज्याच्यात आहे तो यगण आणि रगण आहे. अन्तामध्ये ज्याचे गुरु वर्ण आहे - सगण आणि तगण. मध्य आणि आदिमध्ये ज्याचे गुरु आहे तो जगण आणि भगण आहे. तीन लघु ज्याच्यामध्ये तो नगण होत.

१	मगणः	— — —	सर्वगुरुः
२	यगणः	∪ — —	आदिलघुः
३	रगणः	— ∪ —	मध्यलघुः
४	सगणः	∪ ∪ —	अन्तगुरुः
५	तगणः	— — ∪	अन्तलघुः
६	जगणः	∪ — ∪	मध्यगुरुः
७	भगणः	— ∪ ∪	आदिगुरुः
८	नगणः	∪ ∪ ∪	सर्वलघुः

अत्रार्थे अन्यः श्लोकः -

मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुः पुनरादिलघुर्यः।

जो गुरुमध्यगतो रलमध्यः सोन्तगुरुः कथितोऽन्तलघुस्तः॥३४५॥

॥ छन्दोमञ्जरी॥

मगणः त्रिगुरुः। नगणः त्रिलघुः। भगणः आदिगुरुः। यगणः आदिलघुः। जगणः मध्यगुरुः। रगणः लघुमध्यः। सगणः अन्तगुरुः। तगणः अन्तलघुः।

अत्रार्थे अपरः श्लोकः -

आदिमध्यावसनेषु यरता यान्ति लाघवम् ।

भजसा गौरवं यान्ति मनौ तु गुरुलाघवम् ॥३४६॥

॥ छन्दःप्रभाकरः ॥

आदिमध्यावसनेषु लघुः चेत् क्रमशः यरतगणाः भवन्ति ।

आदिमध्यावसानेषु गुरुः चेत् क्रमशः भजसगणाः भवन्ति । सर्वगुरुः मगणः सर्वलघुः नगणः।

गर्वः -

ऐश्वर्यरूपलावण्यकुलविद्याबलैरपि।

इष्टलाभादिनान्येषामवज्ञा गर्व ईरितः॥३४७॥

ऐश्वर्य, रूप, लावण्य, कुल, विद्या, बल यांच्या माध्यमाने इष्टलाभा साठी जो अन्यांची अवज्ञा केली जाते त्याला गर्व असे म्हणतात.

गीतम् -

धातुमात्रासमायुक्तं गीतमित्युच्यते बुधैः।

तत्र नादात्मिको धातुर्मात्रा ह्यक्षरसञ्चयः ॥३४८॥

ज्यामध्ये धातु (नादात्मक) आणि मात्रा (अक्षरसमुच्चय) उचित होते त्याला गीत असे म्हणतात.

अपरः श्लोकः -

स्वरतालग्रामभेदरागरागाङ्गभूषितम् ।

संस्कृतं वा प्राकृतं वा गीतं गीतविदो विदुः ॥३४९॥

गीतिदोषाः -

शङ्कि तं भीषणं भीतमुद्धुष्टमनुनासिकम्।

काकस्वरं मूर्धगतं तथा स्थानविवर्जितम् ॥३५०॥

विस्वरं विरसं चैव विश्लिष्टं विषमाहतम्।

व्याकुलं तालुहीनञ्च गीतिदोषाश्चतुर्दश ॥३५१॥

॥नारदीयमहापुराणम्॥

शंकित, भीतियुक्त, उद्धुष्ट, अनुनासिक, काकस्वर जसे, मूर्धागत, स्थानरहित, विस्वर, विरस, विश्लिष्ट, विषमाहत, व्याकुल, तालुहीन असे चौदा गीती दोष आहेत.

गुरुः -

गुशब्दस्त्वन्धकारः स्यात् रुशब्दस्तन्निरोधकः।

अन्धकारनिरोधित्वात् गुरुरित्यभिधीयते ॥३५२॥

॥गुरुगीतम्॥

निषेकादीनि कर्माणि यः करोति यथाविधि ।

सम्भावयति चान्नेन स विप्रो गुरुरुच्यते ॥३५३॥

॥मनुस्मृतिः २-१४२॥

विद्वत्ता नीतिमत्ता च शासनक्षमता तथा।

विद्या चैते गुरूणां वै त्रिगुणाः परिकीर्तिताः॥३५४॥

गु शब्द अंधकारामध्ये आहे आणि रु त्याचा निरोधक आहे, या प्रकारे जो

अंधकाराला दूर करेल, परास्त करेल तो गुरु आहे.

विद्वता, नितिमत्ता, शासनक्षमता आणि विद्या हे गुरुचे गुण सांगितले आहेत.

गुरुः लघुः -

सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः।

वा पदान्ते त्वसौ ग्वक्रो ज्ञेयोऽन्यो मात्रिको लघुः ॥३५५॥

॥वृत्तरत्नाकरः १-९॥

यः वर्णः अनुस्वारसहितः विसर्गान्तः दीर्घयुक्तः संयोगपरः सः गुरुः भवति । पादान्ते तु सर्वत्र विकल्पेन गुरुत्वम्। अन्यत्र लघुरेव ज्ञेयः।

जो वर्ण अनुस्वारसहित, विसर्गान्त, दीर्घयुक्त आणि संयोगावर होतो तो गुरु होतो. पादाच्य अन्तामध्ये सर्वत्र विकल्पाने गुरु होते. अन्यत्र लघु होते.

चतुर्दश विद्यास्थानानि –

ग्रन्थेषु विद्यास्थानानि चतुर्दश प्रसिद्धानि। केषुचित् अष्टादश विद्यास्थानानि अपि उल्लिखितानि। ते च –

जे वर्ण अनुस्वारसहित, विसर्गान्त, दीर्घयुक्त आणि संयोगपर आहे. ते गुरु होत आहे. पादाच्या अन्तामध्ये सर्वत्र विकल्पाने गुरु होत आहे. अन्यत्र लघुच आहे.

ग्रंथामध्ये चौदा विद्यास्थान प्रसिद्ध आहेत, कुठे अठरा पण आहेत

पुराण, न्याय, मीमांसा, धर्मशास्त्र, वेद विद्या आणि धर्माच्या स्थान आहे.

जेंव्हा चार उपवेदांचे पण गणित केले जाते तेंव्हा अठरा होत आहेत.

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।

वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥३५६॥

श्लोकान्तरं च श्रूयते -

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।

धर्मशास्त्रं पुराणानि विद्याश्चैताश्चतुर्दश ॥

उपवेदैश्चतुर्भिस्तु ता एवाष्टादश स्मृताः ॥३५७॥

ग्रंथामध्ये चौदा विद्यास्थान प्रसिद्ध आहेत. काही अठराह पण आहेत. पुराण, न्याय, मीमांसा, धर्मशास्त्र, वेद विद्या आणि धर्माचे स्थान आहे. जेंव्हा चार उपवेदाचे पण गणित केले जाते तेंव्हा आठरा होते.

चतुष्पष्टिकलाः -

अथेतिहासागमौ च काव्यालङ्कारनाटकम्।

गायकत्वं कवित्वं च कामशास्त्रं दुरोदरम् ॥३५८॥

देशभाषालिपिज्ञानं लिपिकर्म च वाचनम्।

गणकव्यवहारौ च स्वरशास्त्रं च शाकुनम् ॥३५९॥

सामुद्रिकं रत्नशास्त्रं गजाश्वरथकौशलम् ।

मल्लशास्त्रं सूपकर्म भूरुहाणां च दोहदम् ॥३६०॥

गन्धवादो धातुवादः खनिवादो रसस्य च।

बिलवादोऽग्निसंस्तम्भः खड्गस्तम्भो जलस्य च ॥३६१॥

वाचः स्तम्भो वयस्तम्भो वश्याकर्षणमोहनम्।

विद्वेषणोच्चाटने च मारणं कालवञ्चनम् ॥३६२॥

परकायप्रवेशश्च पादुकासिद्धिरेव च।

वाक्सिद्धिर्गुटिकासिद्धिरैन्द्रजालिकमेव च ॥३६३॥

अञ्जनं परदृष्टेश्च वञ्चनं स्वरवञ्चनम्।

मणीमन्त्रौषधादीनां सिद्धयश्चोरकर्म च ॥३६४॥

चित्रलोहाश्मृमद्दारुणुचर्माम्बरक्रियाः।

अदृश्यकारणं दन्तिकारणं मृगयाविधिः ॥३६५॥

वाणिज्यं पाशुपाल्यं च कृषिरासवकर्म च।

लावकुक्कुटमेषादियुद्धकारककौशलम् ॥

चतुष्पष्टिकलास्त्वेताः विवद्भिः परिकीर्तिताः ॥३६६॥

॥शिवतत्त्वरत्नाकरः ४-२-४४ ५३॥

चम्पूः -

गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते ॥३६७॥

चान्द्रायणविधिः -

एकैकं वर्धयेत् पिण्डं शुक्ले कृष्णे च ह्रासयेत्।

इन्दुक्षये न भुञ्जीत एष चान्द्रायणो विधिः ॥३६८॥

॥पराशरस्मृतिः १०-२॥

प्रतिदिन एक एक पिंड बनवले पाहिजे, शुक्ल आणि कृष्ण कमी केले पाहिजे आणि इन्दुक्षयामध्ये भोजन नाही केले पाहिजे, असा चांद्रायनविधि आहे.

जपः -

जकारो जन्मविच्छेदः पकारः पापनाशनः ।

तस्मात् जप इति प्रोक्तः जन्मपापविनाशकः ॥३६९॥

जकार हा जन्मविच्छेद आणि पकार पापाचा नाशक आहे अतः जप हा जन्म आणि पापाचा नाशक आहे.

जोतिषशास्त्रम् :-

ज्योतिषां सूर्यादीनां गत्यादिज्ञापकं शास्त्र ज्योतिश्शास्त्रम्। तत्र विभागत्रयं विद्यते सिद्धान्तसंहिताहोरेति । तदुक्तम् -

ज्योतिष शास्त्र सूर्यादिच्या गतिचे ज्ञापक आहे. त्याचे तीन विभाग आहेत. - सिद्धान्त, संहिता आणि होरा।

सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम् ।

वेदस्य निर्मलं चक्षुः ज्योतिश्शास्त्रमनुत्तमम् ॥३७०॥

ज्योतिष शास्त्र सूर्यादिच्या गतिचा ज्ञापक आहे. त्याचे तीन विभाग आहेत - सिद्धान्त, संहिता आणि होरा.

तच्च ज्योतिश्शास्त्रं कालविधानार्थं प्रवृत्तम्। उक्तं च आर्चज्यौतिषे -

वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।

तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद यज्ञान् ॥३७१॥

यह शास्त्र कालविधानासाठी प्रवृत्त आहे. वेद यज्ञा साठी विहित आहे, यज्ञ कालानुपूर्व आहे. अतः हे कालविधायक शास्त्र ज्योतिषाला जाणणारा तो वेद यज्ञाला पण जाणू सकतो.

अस्य शास्त्रस्य च महत्त्वं च उक्तम् -

अप्रत्यक्षाणि शास्त्राणि विवादास्तेषु केवलम्।

प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ॥३७२॥

या शास्त्रामध्ये महत्त्व सांगतात - सर्व शास्त्रामध्ये केवल विवाद आहे, जो अप्रत्यक्ष आहे, किन्तु ज्योतिष शास्त्रामध्ये साक्षात् सूर्य आणि चन्द्र हे प्रत्यक्ष साक्षी आहेत.

ज्योतिश्शास्त्रप्रवर्तकाः -

सर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः।

कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः॥३७३॥

लोमशः पुलिशश्चैव च्यवनो यवनो भृगुः।

शौनकोऽष्टादशश्चैते ज्योतिश्शास्त्रप्रवर्तकाः॥३७४॥

पराशर अर्थात्-सूर्य, पितामह, व्यास, वसिष्ठ, अत्रि, पराशर, कश्यप, नारद, गर्ग, मरीचि, मनु, अंगिरा, लोमश, पुलिश, च्यवन, यवन, भृगु तसेच शौनक हे 18 ज्योतिषशास्त्राचे प्रवर्तक सांगितले आहेत.

तन्त्रम् -

तनोति विपुलानर्थान् तत्त्वमन्त्रसमन्वितान् ।

त्राणं च कुरुते यस्मात् तत्रमित्यभिधीयते ॥३७५॥

यत् तत्त्वमन्त्रसमन्वितान् अर्थान् अवबोधयति यच्च साधकं रक्षति तत् तन्त्रपदेन अभिधीयते।

तापत्रयम् -

त्रिविधं दुःखं प्रसिद्धम्। आध्यात्मिकम् आधिदैविकम् आधिभौतिकं च। आध्यात्मिकं च दुःखं द्विविधं शारीरं मानसं चेति। तत्र शिरोरोगादिकं शारीरं कामक्रोधादिकं मानसम्। व्याघ्रसर्पादिप्रयुक्तानि आधिभौतिकानि अतिवातवर्षादिनिमित्तानि आधिदैविकानि दुःखानि ।

जो तत्त्व, मन्त्राने समन्वित अर्थला सांगत आहे, जो साधकाची रक्षा करत आहे तो तन्त्र आहे. तीन दुःख आहेत - आध्यात्मिक, आधिदैविक आणि आधिभौतिक। आध्यात्मिक दुःख द्विविध आहे - शारीरिक आणि

मानसिक। शिरोरोगादि शारीरिक आहे, कामक्रोधादि मानसिक आहे. व्याघ्र, सर्पादि प्रयुक्त आधिभौतिक आणि अतिवात, वर्षादि निमित्त सर्व आधिदैविक आहे.

दुःखमाध्यात्मिकं चाधिदैविकं चाधिभौतिकम्।

आध्यात्मिकं मनो दुःखं व्याधयः पिटकादयः ॥३७६॥

आधिभौतिकदुःखं स्यात् कीटादिप्राणिसम्भवम् ।

वर्षतापादिसम्भूतं दुःखं स्यादाधिदैविकम् ॥३७७॥

तीन दुःख आहेत - आध्यात्मिक, आधिदैविक आणि आधिभौतिक। आध्यात्मिक दुःख द्विविध आहेत - शारीरिक आणि मानसिक। शिरोरोगादि शारीरिक आहे, कामक्रोधादि मानसिक आहे, व्याघ्र, सर्पादि प्रयुक्त आधिभौतिक आणि अतिवात, वर्षादि निमित्त सर्व आधिदैविक आहे.

दश अवताराः -

मत्स्यः कूर्मो वराहश्च नरसिंहश्च वामनः।

रामो रामश्च कृष्णश्च बुद्धः कल्की च ते दश ॥३७८॥

मत्स्य, कूर्म, वराह, नरसिंह, वामन, राम, परशुराम, कृष्ण, बुद्ध, कल्की हे दशावतार आहेत.

दश उपनिषदः -

ईशकेनकठप्रश्नमुण्डमाण्डूक्यतैत्तिरिः।

ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश ॥३७९॥

दश रूपकाणि –

काव्यं द्विधा विभक्तं दृश्यं श्राव्यं चेति । तत्र दृश्यकाव्ये दश विभागाः। ते

च-

काव्य दोन प्रकारे विभक्त केले आहे, दृश्य आणि श्राव्य. इथे दृश्यकाव्ये दहा विभाग आहेत -

नाटकं सप्रकरणं भाणः प्रहसनं डिमः।
व्यायोगसमवकारौ वीथ्यङ्केहामृग इति ॥३८०॥

प्रकरणं कविकल्पितवृत्तम् - यथा भवभूतेः मालतीमाधवम्। नाटकं ख्यातवृत्तम् - यथा कालिदासस्य अभिज्ञानशाकुन्तलम्। भाणः धूर्तस्य नायकस्य चरितयुक्तम् - यथा वरदाचार्यस्य वसन्ततिलकम्। व्यायोगः हास्यशङ्गारशान्तभिन्नरसयुक्तप्रसिद्धे तिवृत्तयुक्तम् - यथा भासस्य मध्यमव्यायोगः। समवकारः देवासुराश्रितख्यातवृत्तसंवलितम् - यथा वत्सराजस्य समुद्रमथनम्। डिमः - रौद्ररसप्रधानः यथा रामकवेः मन्मथोन्मथनम्। ईहामृगः मृगवदलभ्यायां नायिकायामभिलाषस्य वर्णनीयतया ईहामृगेति नाम - यथा वत्सराजस्य रुक्मिणीहरणम्। वीथी एकाङ्कयुक्तः रूपकविशेषः यथा माधवीवीथी। अङ्कः पुराणेतिहासप्रसिद्धकरुणारसप्रधानकथायुक्तः यथा शर्मिष्ठाययाति । प्रहसनं हास्यप्रधानम् - यथा महेन्द्रविक्रमस्य मत्तविलासः।

काव्य दोन प्रकारचे आहे - श्राव्य आणि दृश्य। दृश्याचे दस विभाग आहे- प्रकरण कविकल्पितवृत्त - यथा भवभूतिचा मालतीमाधवम्। नाटक ख्यातवृत्त - यथा कालिदासाचे अभिज्ञानशाकुन्तलम्। भाण धूर्त नायकाचे चरितयुक्त - यथा वरदाचार्याचे वसन्ततिलकम्। व्यायोग हास्य,शृङ्गार,शान्त भिन्नरसयुक्त प्रसिद्ध इतिवृत्तयुक्त - यथा भासाचे मध्यमव्यायोगः। समवकार देवासुराचे ख्यातवृत्तसंवलित - यथा वत्सराजाचे समुद्रमथनम्। डिम -

रौद्ररसप्रधान यथा रामकविचे मन्मथोन्मथनम्। ईहामृग नायिकाची अभिलाषाचे वर्णन- ईहामृग- यथा वत्सराजाचे रुक्मिणीहरणम्। वीथी एकाङ्कयुक्त रूपकविशेष यथा माधवीवीथी। अङ्क पुराण,इतिहास प्रसिद्ध करुणारसप्रधान कथायुक्त यथा शर्मिष्ठाययाति । प्रहसन हास्यप्रधान - यथा महेन्द्रविक्रमाचे मत्तविलासः।

उपरूपकाणि –

अष्टादश उपरूपकाणि च विद्यन्ते। तानि च -

नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्।
प्रस्थानोल्लाप्यकाव्यानि प्रेक्षणं रासकं तथा ॥३८१॥
संलापकं श्रीगदितं शिल्पकं च विलासिका।
दुर्मल्लिका प्रकरिणी हल्लीशो भणिकेति च ॥३८२॥

दिक् -

कृत्वैकमवधिं तस्मादिदं पूर्वं च पश्चिमम्।
इति निर्दिश्यते दिशो यया सा दिगिति स्मृता ॥३८३॥

प्राङ् प्रत्यङ् इत्यादिव्यवहाराणां यः हेतुः सः दिक् इत्यर्थः ।

प्राक्, प्रत्यक् इत्यादि व्यवहाराचे जो हेतु आहे तो दिक् आहे.

दीक्षा -

गुरोः सकाशात् नियमपूर्वकं मन्त्रोपदेशः दीक्षा इति कथ्यते। तल्लक्षणप्रदर्शिकाः कारिकाः एवं विद्यन्ते –

गुरु साक्षात नियमपूर्वक मंत्रोउपदेश करतात त्याला दीक्षा असे म्हणतात.

त्याचे लक्षण प्रदर्शित करणाऱ्या कारिका -

दिव्यज्ञानं यतः दद्यात् कुर्यात् पापस्य संक्षयम् ।

तस्मात् दीक्षेति सा प्रोक्ता मुनिभिस्तत्त्ववेदिभिः॥३८४॥

ज्याने दिव्यज्ञान प्राप्त होते आणि पापाचा क्षय होतो, याला सत्य जाणणारे ऋषि दीक्षा असे म्हणतात.

यद्वा -

दीयते विमलं ज्ञानं क्षीयते कर्मवासना।

तेन दीक्षेति सा प्रोक्ता मुनिभिस्तत्त्ववेदिभिः॥३८५॥

शुद्धज्ञानाची प्राप्ती आणि कर्मवासनेचा नाश, याला सत्य जाणणारे ऋषि दीक्षा असे म्हणतात.

दीनः -

देहीति याचते यस्तु काङ्क्षया कृपणं गिरा।

दारिद्यात् दैन्यमापन्नः स दीनः परिकीर्तितः ॥३८६॥

जो कांक्षाने वाणीने मला दे असि याचना करतो, दरिद्रताने आपन्न तो दीन होतो.

दृष्टान्तः -

यत्र वाक्यद्वये बिम्बप्रतिबिम्बतयोच्यते।

सामान्यधर्मौ वाक्यज्ञैः स दृष्टान्त निगद्यते ॥३८७॥

जिथे दोन वाक्यामध्ये बिंब आणि प्रतिबिंब होते, सामान्य धर्म पण होतो, त्याला दृष्टांत असे म्हणतात.

देशान्तरम -

महानद्यन्तरं यत्र गिरिर्वा व्यवधायकः।

वाचो यत्र विभिद्यन्ते तद्देशान्तरमुच्यते ॥३८८॥

महानदी जिथे सुरू आहे, पर्वत व्यवधायक आहे, भाषा जिथे भिन्न आहे, तिथे अन्य देश होतो.

दैवज्ञः (ज्योतिश्शास्त्रवित्) -

अद्वेषी नित्यसन्तोषी ब्राह्मणो गणितेक्षणः।

ग्रहाचारविधानज्ञः स वै ज्योतिषिकः स्मृतः॥३८९॥

यद्वा -

अद्वेषी नित्यसन्तोषी गणितागमपारगः।

अनेकहोराशास्त्रज्ञः पञ्चसिद्धान्तकोविदः॥

ऊहापोहपटुः सिद्धमन्त्रो जानाति जातकम् ॥३९०॥

अद्वेषी, नित्यसंतुष्ट, गणितामध्ये निपुण, अनेक होराशास्त्रज्ञ, ऊहापोहपटु, जातकाचा ज्ञाता ज्योतिषिक आहे.

द्विजः -

मातुर्यदग्रे जायन्ते द्वितीयं मौजिबन्धनात् ।

ब्राह्मणक्षत्रियविशः तस्मादेते द्विजाः स्मृताः ॥३९१॥

यः द्वितीयवारं जातः सः द्विजः भवति। नूतनया उत्पत्तिः जन्म इत्यभिधीयते। मातुः उदरात् जननं तु प्रथमं जन्म यच्च सर्वेषां प्राणिनां सामान्यम्। द्वितीयं जन्म मौञ्जीबन्धनोत्तरं ब्राह्मणक्षत्रियविशां विशेषः ।

द्वितीय जन्म प्राप्त द्विज होत आहे. नूतनतया उत्पत्ति जन्म होत आहे. आईच्या गर्भातुन प्रथम जन्म जो सर्व प्राणियांचे होत आहे, द्वितीयामध्ये जिबन्धनाच्या उपरान्त ब्राह्मण, क्षत्रिय आणि वैश्यांचे होत आहे.

धर्मः -

पुरुषार्थचतुष्टये प्रथमः अन्येषामाधाररूपेण स्थितः पुरुषार्थः धर्मः। तल्लक्षणं च एवमुक्तम् 'यतः अभ्युदयनिःश्रेयससिद्धिः सः धर्मः' इति। अर्थात् यादृशेन आचारेण यादृशया च जीवनपद्धत्या समेषामभ्युदयः सिध्यति, यतः च मोक्षः प्राप्यते सःधर्मः। स च धर्मः वेदेभ्यः स्मृतिभ्यः सतामाचारेभ्यः च ज्ञातव्यः। धर्ममोक्षौ चतुर्विधपुरुषार्थेपु तटस्थानीयौ। तयोः धर्ममोक्षाख्यतटयोः अन्तराले प्रवहन्ती अर्थकामरूपनदी अभीप्सितार्थप्रदायिनी स्यात् । नद्याः तटातिलहट्टने तु प्रवाहवशात् स्यादेव हानिः। यतः कामानामुपशमः न तावान् सुलभः। उक्तं च मनुना -

चार पुरुषार्थामध्ये धर्म अन्यतम आहे. ज्या प्रकारे जीवन पद्धतिने आचाराने सर्व अभ्युदय, उत्कर्ष सिद्ध होते आणि ज्याने मोक्ष प्राप्त होतो. धर्म वेद, स्मृति, सज्जनाचे आचार (व्यवहार) राणे ज्ञात कले पाहिजे. चारी पुरुषार्थामध्ये धर्म आणि मोक्ष तटस्थ आहे. त्यांच्यामध्ये बहती अर्थ आणि कामाची नदी अभीप्सितार्थाची प्रदायिका झाली पाहिजे. त्याला पार करते वेळी अवश्य ही त्याच्या प्रवाहद्वारा हानि होईल कारण कामाचे उपशम एवढे सुलभ नाही.

न जातु जातः कामानाम् उपभोगेन शाम्यति।
हविषा कृष्णवत्मैव भूय एवाभिवर्धते ॥३९२॥

॥ मनुस्मृतिः २-९४॥

अतः महान्तं प्राधान्यं प्रददुः प्राचीनाः धर्मविषये।

धर्मलक्षणमेवं ब्रवीति मनुः -

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।

धीर्विद्या सत्यमक्रोधः दशकं धर्मलक्षणम् ॥३९३॥

॥मनुस्मृतिः ६-९२॥

धृति, क्षमा, दम, अस्तेय, शौच, इन्द्रियनिग्रह, बुद्धि, विद्या, सत्य, अक्रोध हे धर्माचे लक्षण सांगितले आहेत. धर्माचे अवश्य ही पालन केले पाहिजे असे प्राचीन म्हणतात.

स च धर्मः आचरणीयः एव इति निर्दिशन्ति प्राचीनाः -

धारणात् धर्म इत्याहुः धर्मो धारयते प्रजाः।

तस्माद्धर्मं प्रशंसन्ति धर्मो रक्षति रक्षितः॥३९४॥

धर्मः एव हतः हन्ति धर्मो रक्षति रक्षितः।

तस्माद्धर्मो न हन्तव्यः मा नो धर्मो हतोऽवधीत् ॥३९५॥

यः धर्म हन्ति तं धर्मः नाशयति । यः धर्म रक्षति तं धर्मः पालयति। अतः न धर्मः नाशनीयः। धर्म नाशयित्वा मा वयं नाशं गच्छेम।

कदाचित् धर्मस्य विषये संशयः उदेति इदानीमेषः धर्मः वा न वा इति । तदा किं प्रमाणत्वेन स्वीकरणीयमिति आकाक्षायां मनुः ब्रवीति -

जो धर्माची रक्षा करतो, धर्म त्याची रक्षा करतो. जो धर्माला नष्ट करतो धर्म त्याला नष्ट करत आहे. अतः धर्माला नष्ट नाही केले पाहिजे, धर्माचे नाश करून आम्हाला नाशाकडे नाही जायचे, कदाचित् धर्माच्या विषयामध्ये संशय होत आहे, हे धर्म आहे या नाही यावर प्रमाण सांगताना मनु ऋषि म्हणतात की –

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।

आचारश्चैव साधूनामात्मनः तुष्टिरेव च ॥३९६॥

॥ मनुस्मृतिः २-६॥

वेदोक्तिः, तद्विदां स्मृतिः शीलश्च, साधूनामाचारः, कदाचित् आत्मनः तुष्टिः वा प्रमाणत्वेन स्वीकर्तव्यः।

वेदाची उक्ति, वेदाला जणाऱ्यांची स्मृति आणि शील, साधुंचे आचार, कदाचित् आत्माच्या तुष्टि त्यांचे प्रमाणाच्या रूपामध्ये स्वीकार करू शकतो.

धर्मशास्त्रम् -

वर्णाश्रमानुरूप्येण धर्माधर्मविभाजकम् ।

धर्मशास्त्रमनुष्ठेयधर्माणां च नियामकम् ॥३९७॥

धीरः -

विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः॥३९८॥

॥ कुमारसम्भवः १-५९॥

विकारहेतु असताना देखील पण ज्याचे चित्त विकाराला प्राप्त नाही करत तो धीर होतो.

विकारहेतौ विद्यमानेऽपि येषां चेतांसि न विक्रियन्ते ते एव धीराः इत्यर्थः।

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु

लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।

अद्यैव वा मरणमस्तु युगान्तरे वा

न्यायात् पथः प्रविचलन्ति पदं न धीराः॥३९९॥

धूर्तः -

मुखं पद्मदलाकारं वाणी चन्दनशीतला।

हृदयं कर्तरीतुल्यं त्रिविधं धूर्तलक्षणम् ॥४००॥

मुख पद्मदल के आकार का, वाणी चंदन जैसी शीतल, और हृदय क्रोध से भरा हुआ – ये तीन धूर्त के लक्षण हैं ।

ध्यानम् -

तद्रूपप्रत्ययैकाग्रया सन्ततिश्चान्यनिस्पृहा।

तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पद्यते तथा ॥४०१॥

उक्तञ्च योगसूत्रे 'तत्र प्रत्ययैकतानता ध्यानम् ' इति । अथ वा -

ब्रह्मैवास्मीति सद्वृत्या निरालम्बतया स्थितिः।

ध्यानशब्देन विख्याता परमानन्ददायिनी ॥४०२॥

ध्यान अर्थात् सर्व प्रकारे विचारांची धाराप्रवाहेचा अभाव राहने. एकाग्रता हे ध्यान आहे. अन्यनिस्पृहा अर्थात् अन्य विषया मध्ये प्रीति/आकर्षण न होने.

नवरसाः -

शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः।

बीभत्सरौद्रौ शान्तश्च रसा नव प्रकीर्तिताः॥४०३॥

शृङ्गार, वीर, करुण, अद्भुत, हास्य, भयानका, बीभत्स, रौद्र आणि शांत हे नवरस प्रख्यात आहेत.

नाम -

शब्देनोचारितेनेह येन द्रव्यं प्रतीयते ।

तदक्षरविधौ युक्तं नामेत्याहुमनीषिणः ॥४०४॥

ज्याच्या उच्चारणमात्राने द्रव्य ज्ञात होते, तो अक्षरसमुदाय नाव आहे.

नायकाः -

नायकाः चतुर्धा प्रविभक्ताः धीरोदात्तः धीरललितः धीरशान्तः धीरोद्धतः चेति । तेषां लक्षणानि एवं विद्यन्ते -

नायक हे चार प्रकारे विभक्त केले आहे. धीरोदात्त, धीरललित, धीरशान्त, धीरोद्धत. त्याचे लक्षण या प्रकारे सांगितले आहे -

धीरोदात्तः -

नेता विनीतो मधुरः त्यागी दक्षः प्रियंवदः।

रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा ॥४०५॥

बुध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः।

शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः॥४०६॥

महासत्त्वोऽतिगम्भीरो क्षमावानविकत्थनः।

स्थिरो निगूढाहंकारो धीरोदात्तो दृढव्रतः॥४०७॥

नेता,विनीत ,मधुर ,त्यागी ,दक्ष ,प्रियंवद ,रक्तलोक ,शुचि , शुध्द वाणीवाला, रूढवंश ,स्थिर, युवा होय, तो बुद्धि, उत्साह, स्मृति, प्रज्ञा, कला, मान या सर्वाने युक्त होय. शूर, दृढ, तेजस्वी, शास्त्रचक्षुष आणि धार्मिक होय. महासत्त्व, अतिगंभीर, क्षमावान्, अविकत्थन, स्थिर, निगूढ अहंकारी आणि दृढव्रत हे धीरोदात्ताचे गुण आहेत.

धीरललितः - धीरशान्तः-

निश्चिन्तो धीरललितः कलासक्तः सुखी मृदुः।

सामान्यगुणयुक्तस्तु धीरशान्तो द्विजादिकः॥४०८॥

निश्चिंत,कलासक्त, सुखी आणि मूदु धीरललित होतो. सामान्य गुणांने युक्त असा द्विजादि धीरशांत होतो.

धीरोद्धतः -

दर्पमात्सर्यभूयिष्ठः मायाच्छद्मपरायणः।

धीरोद्धतस्वहङ्कारी चलश्छद्म विकत्थनः॥४०९॥

॥धनञ्जयस्य दशरूपकम्॥

दर्प, मात्सर्य याने युक्त, माया आणि छद्म (वेशांतर) मध्ये परायण, स्वहङ्कारी (थोडा अहंकारी) चलछद्म, विकत्थन असा धीरोद्धत होतो.

नारायणः -

आपो नारा इति प्रोक्ता आपो वै नरसूनवः।

ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः॥४१०॥

॥मनुस्मृतिः-१-१०॥

नरेण सृष्टत्वात् आपः नाराः प्रोक्ताः। प्रलयकाले ताः एव परमात्मनः यतः आश्रयभूताः आसन् अतः सः नारायणः स्मृतः। नारा आयनं यस्य सः नारायणः।

नर द्वारा निर्माण झाल्या कारणाने जलाला नार असे म्हणतात. प्रलय काळामध्ये तो परमात्माच्या आश्रयभूत आहे अतः ते नारायण असे म्हणतात. नारा ज्याची आयन आहे तो नारायण.

निसर्गः स्वभावः -

निसर्गः सुदृढाभ्यासजन्यः संस्कार उच्यते।

अजन्यस्तु स्वतः सिद्धः स्वरूपो भाव उच्यते ॥४११॥

निसर्गतः सुदृढ आणि अभ्यासजन्य संस्कार म्हणतात. जो अजन्य आहे, स्वतः सिद्ध आहे, तो स्वरूप स्वभाव आहे.

नृत्यम् -

देवरुच्या प्रतीतो यस्तालमानरसाश्रयः।

सविलासोऽङ्गविक्षेपः नृत्यमित्युच्यते बुधैः ॥४१२॥

नैमित्तिकम् -

निमित्तमात्रमाश्रित्य यो धर्मः सम्प्रवर्तते।

नैमित्तिकः स विज्ञेयो प्रायश्चित्तविधिर्यथा ॥४१३॥

पञ्च यज्ञाः -

पञ्चयज्ञाः सर्वैः अर्हैं कर्तव्यत्वेन निर्दिष्टाः श्रुतिस्मृतिपु। ते च -

देवयज्ञो भूतयज्ञः पितृयज्ञस्तथैव च।

नृयज्ञो ब्रह्मयज्ञश्च पञ्चयज्ञाः प्रकीर्तिताः॥४१४॥

तैत्तिरीयारण्यके एतेषां यज्ञानां लक्षणमेवमुक्तम् - 'यदग्नौ जुहोत्यपि समिधं तद्देवयज्ञस्सन्तिष्ठते यत्पितृभ्यः स्वधाकरोत्यप्यपस्तत्पितृयज्ञस्सन्तिष्ठते यद्भतेभ्यो बलिं हरति तद्भतयज्ञस्सन्तिष्ठते यद्-ब्राह्मणेभ्योऽन्नं ददाति तन्मनुष्ययज्ञस्सन्तिष्ठते यत्स्वाध्यायमधीयीतैकामप्यूचं यजुस्साम वा तद्ब्रह्मयज्ञस्सन्तिष्ठते' इति। अर्थात् यागादीनामाचरणं देवयज्ञः, पितृभ्यः

तर्पणादिप्रदानं पितृयज्ञः, भूतेभ्यः आहारादिप्रदानं भूतयज्ञः, ब्राह्मणेभ्यः अन्नप्रदानं मनुष्ययज्ञः, वेदाध्ययनं ब्रह्मयज्ञः।

तैत्तिरीय आरण्यकामध्ये याचे लक्षण या प्रकारे सांगितले आहे. ज्या यज्ञामध्ये अग्निमध्ये समिधा प्रदान केली जात आहे. तो देवयज्ञ आहे, पितरासाठी स्वधा हा पितृयज्ञ, भूतासाठी बलि भूतयज्ञ आणि ब्राह्मणाना अन्नदान मनुष्ययज्ञ, वेदाध्ययन ब्रह्मयज्ञ आहे.

पञ्च सूनाः -

कण्डनी पेषणी चुल्ली उदकुम्भी च मार्जनी।

पञ्च सूना गृहस्थस्य ताभिः स्वर्गं न विन्दति ॥४१५॥

उखळ, पाठा, चूल, पान्याचा घडा, मार्जनी (झाडू) हे पाच गृहस्थाची पुत्रिया आहेत.

पतिव्रता -

आतर्ति मुदिता हृष्टे प्रोषिते मलिना कृशा।

मृते म्रियते या पत्यै सा स्त्री ज्ञेया पतिव्रता ॥४१६॥

या स्त्री पतै आर्ते सति आर्ता, पतौ हृष्टे मुदिता, पतौ परित्यक्ते मलिना कृशा च, पतौ मृते च म्रियते सा ज्ञेया पतिव्रता ।

जो स्त्री पति दु:खी असल्यावर दु:खी, आनंदित असल्यावर आनंदित होते, पतिने त्यागल्यावर तेंव्हा मलिन आणि कृश होती. तथा पतिच्या मृत्यु उपरांत स्वत:पण मृता प्रमाणे होऊन जाते, ती पतिव्रता आहे.

परा- पश्यन्ती - मध्यमा वैखरी -

वाक् परा पश्यन्ती मध्यमा वैखरी इति चतुर्धा विभक्ता| तच्च चातुर्विध्यमेवं

वर्णितम् -

वाणी चार प्रकारची आहे - परा, पश्यन्ती, मध्यमा आणि वैखरी. परा मूलचक्रस्थ, पश्यन्ती नाभि मध्ये स्थित, मध्यमा हृदयात स्थित आणि वैखरी कण्ठामध्ये स्थित आहे.

परा वाक् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।

हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥४१७॥

परार्धम्

स्थानात्स्थानं दशगुणमेकैकं गुण्यते द्विजः।

ततो ह्यष्टादशे भागे परार्द्धमभिधीयते ॥४१८॥

परिमाणम् (प्रस्थादिपरिमाणविशेषः) –

पलं प्रकुञ्जकं मुष्टिः कुडवस्तच्चतुष्टयम् ।

चत्वारः कुडवाः प्रस्थः चतुष्प्रस्थं तथाढकम् ॥ ४१९ ॥

चतुराढको भवेद्द्रोणः खारी द्रोणचतुष्टयम् ।

द्विद्रोणश्च भवेच्छूर्पः कुम्भोऽपि द्रोणविंशतिः ॥ ४२०॥

मुष्टिचतुष्टयं कुडवः । चत्वारः कुडवाः प्रस्थम् चतुःप्रस्थम् | आढकम् | चतुराढकः द्रोणः । द्रोणचतुष्टयं खारी।

पशुपतिः -

ब्रह्माद्याः स्थावरान्ताश्च पशवः परिकीर्तिताः।

तेषां पतिर्महादेवः स्मृतः पशुपतिः स्मृतौ ॥४२१॥

ब्रह्मामध्ये स्थावर (इहलोकात विद्यमान) सर्व पशु या पदाने वाच्य आहे आणि या सर्वाचे पति (पालक) महादेव पशुपति या नावाने ओळखले जातात.

पाठकगुणाः -

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।

धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥४२२॥

॥ पाणिनीयशिक्षा-३३॥

मधुरस्य भावः माधुर्यं सुश्राव्यमित्यर्थः। अक्षरव्यक्तिः सुस्पष्टवर्णोच्चारणम्। पदच्छेदः पदविभागः। सुस्वरः माधुर्यगुणोपेतः प्रभावकरश्च स्वरः। धैर्यम् मनोदाढर्यम्। लयसमर्थं लयात्मकतारतम्योपेतम्। एते षट् पाठकसम्बन्धिनः गुणाः। एतैः षड्गुणैः युक्तः उत्तमपाठकः।

ज्याच्या वाणीमध्ये मधुरता आहे, जो स्पष्ट उच्चारण करत आहे, उचित पदविभाग करत आहे, मधुर स्वर आहे, धैर्य ज्याच्यात आहे, वाणीमध्ये लय (प्रकरणानुरोध ध्वनिमध्ये ऊच-नीच) आहे, तो उत्तम पाठक आहे.

पाठकाधमाः -

गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः।

अनर्थज्ञोल्पकण्ठश्च षडेते पाठकाधमाः॥४२३॥

॥ पाणिनीयशिक्षा-३२॥

यः गानं कुर्वन् पठति स गीती। यः शीघ्रं पठति सः शीघ्री। यः शिरः कम्पयन् पठति सः शिरःकम्पी। यः लिखितं दृष्ट्वा पठति सभायां भाषते सः लिखितपाठकः। अर्थं जानाति इति अर्थज्ञः न अर्थज्ञः अनर्थज्ञः तात्पर्यज्ञानशून्यः इति भावः। अल्पकण्ठः अनभ्यस्तपाठकः मन्दोच्चारकः वा एते षड् पाठकेषु अधमाः।

जो गायन करत वाचतो त्याला गीती, जे शीघ्र वाचतो त्याला शीघ्री, जो डोकेहालवत वाचतो त्याला शिर: कम्पी, जो सभेत लिहलेले पाहून वाचतो

त्याला लिखितपाठक असे म्हणतात. जो अर्थ जानतो तो अर्थज्ञ आणि अर्थ न जाणणारा अनर्थज्ञ होतो, अर्थात् तात्पर्यज्ञानशून्य होतो. अल्पकण्ठ, अनभ्यस्तपाठक, मन्दोच्चारक वा एते षड् पाठकेषु अधमाः।

पुराणम् -

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।

वंशानुचरितं चेति पुराणं पञ्चलक्षणम् ॥४२४॥

सर्गः (उत्पत्तिः) प्रतिसर्गः (प्रलयः) वंशः वंशचरितं मन्वन्तरवर्णनं च यत्र विद्यते तत् पुराणम्।

सर्ग (उत्पत्ति), प्रतिसर्ग (प्रलय), वंश वंशचरित, मन्वन्तरवर्णन हे सर्व जिथे आहे त्याला पुराण असे म्हणतात.

पुस्तकम् -

तैलाद्रक्षेजलाद्रक्षेद्रक्षेच्छिथिलबन्धनात् ।

मूर्खहस्ते न दातव्यं वदेदेवञ्च पुस्तकम् ॥४२५॥

तेल, जल, शिथिल बंधन यांच्यापासून पुस्तकाची रक्षा केली पाहिजे. मूर्खांच्या हाथामध्ये कधी पण पुस्तक देऊ नये, असे स्वयं पुस्तक म्हणत आहे.

प्रकृतिः

प्रकृष्टवाचकः प्रश्च कृतिश्च सृष्टिवाचकः।

सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्तिता ॥४२६॥

प्र अर्थात् प्रकृष्ट(अतिशय), कृति हे सृष्टिवाचक आहे. अतः सृष्टिमध्ये प्रकृष्ट आहे. त्याला प्रकृति असे म्हणतात.

प्रायश्चित्तम् -

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।
तपो निश्चयसंयुक्त प्रायश्चित्तं तदुच्यते ॥४२७॥
प्रायः पापं विजानीयात् चित्तं तस्य विशोधनम्।
विशोधनं च पापस्य प्रायश्चित्तं विदुर्बुधाः॥४२८॥

प्रायः अर्थात् तप चित्त अर्थात् निश्चय याने युक्त प्रायश्चित्त होते.

बान्धवः -

उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे ।
राजद्वारे श्मशाने च यः तिष्ठति स बान्धवः॥४२९॥

यद्वा -

मातृपक्षसमुद्भताः पितृपक्षसमुद्भवाः।
आत्मसम्बन्धिनो ये च बान्धवास्ते प्रकीर्तिताः॥४३०॥

ब्रह्मचर्यम् -

मनसा वचसा चैव सर्वावस्थासु सर्वदा।
सर्वत्र मैथुनत्यागः ब्रह्मचर्यं प्रचक्षते ॥४३१॥

मैथुनत्यागः एव ब्रह्मचर्यमित्युक्तम्। मैथुनस्य स्वरूपमेवमष्टधोक्तं ग्रन्थेषु

स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम्।
सङ्कल्पोऽध्यवसायश्च क्रियानिवृतिरेव च ॥४३२॥
एतद् मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः।
विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम् ॥४३३॥

स्मरणम् - रागादिपूर्वकं स्त्रयादिविषयकचिन्तनम्। कीर्तनम् - रागादिपूर्वकं सौन्दर्यवर्णनम् । केलिः - रागादिपूर्वकः परिहासादिव्यवहारः । प्रेक्षणम् - रागादिपूर्वकः स्त्रयादिविषयकज्ञानम्। गुह्यभाषणम् - रागादिपूर्वकं रहसि सम्भाषणम् । सङ्कल्पः - रागादिपूर्वकः इयं मे स्यादिति निश्चयः। अध्यवसायः- अनया रेमिष्ये इति निश्चयः । क्रियानिवृतिः - अनुभवविशेषः। एतादृशः अष्टभिः मैथुनैः रहितं ब्रह्मचर्यं भवति।

स्मरण - रागादिपूर्वक स्त्रयादिविषयकचिन्तन। कीर्तन - रागादिपूर्वक सौन्दर्यवर्णन। केलि - रागादिपूर्वक परिहासादिव्यवहार। प्रेक्षण - रागादिपूर्वक स्त्रयादिविषयकज्ञान। गुह्यभाषण - रागादिपूर्वक एकान्तामध्ये सम्भाषण । सङ्कल्प - रागादिपूर्वक हे माझी आहे निश्चय। अध्यवसाय - यांच्या साथ रमण करु असा निश्चय । क्रियानिर्वृति - अनुभवविशेष। असे आठ मैथुनाने रहित ब्रह्मचर्य होत आहे.

भक्तिः-

मुक्तिप्रापकसामग्रीषु भक्तिः प्रधाना प्रसिद्धा च। तस्याः लक्षणमेवभिहितम् -

मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी।
स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते ॥
स्वात्मतत्त्वानुसंधानं भक्तिरित्यपरे जगुः॥४३४॥

॥विवेकचूडामणिः-३१,३२॥

शिवानन्दलहर्यां चेतोवृत्तेः इष्टदेवतायामेव स्थितिः भक्तिः इत्युक्तम्। तद्यथा

अङ्कोलं निजबीजसन्ततिरयस्कान्तोपलं सूचिका
साध्वी नैजविभुं लता क्षितिरुहं सिन्धुः सरिद्वल्लभम् ।
प्राप्नोतीह यथा तथा पशुपतेः पादारविन्दद्वयं
चेतोवृत्तिरुपेत्य तिष्ठति सदा सा भक्तिरित्युच्यते ॥४३५॥

॥ शिवानन्दलहरी ६१॥

नवधा भक्तिः -

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥४३६॥

श्रवणं, कीर्तनं, स्मरणं, पादसेवनम्, अर्चनं, वन्दनं, दास्यं, सख्यम्, आत्मनिवेदनमिति भक्तिः नवधा सम्भवति । तत्रोदाहरणानि तु -

श्रवण, कीर्तन, स्मरण, पादसेवन, अर्चन, वन्दन, दास्य, सख्य, आत्मनिवेदन हे नवधा भक्ति आहे. त्याचे उदाहरण -

श्रीविष्णोः श्रवणे परीक्षिदभवद्वैयासकिः कीर्तने
प्रह्लादः स्मरणे तदङ्घ्रिभजने लक्ष्मीः पृथुः पूजने।
अक्रूरस्त्वभिवन्दने कपिपतिर्दास्येऽथ सख्येऽर्जुनः
सर्वस्वात्मनिवेदनेबलिरभूत्कृष्णाप्तिरेषां परम् ॥४३७॥

भगवद्गुणस्य श्रवणे परीक्षितः, कीर्तने शुकः, स्मरणे प्रह्लादः, पादसेवने श्रीलक्ष्मीः , पूजने राजा पृथुः, वन्दने अक्रूरः, दास्ये हनूमान् , सख्ये अर्जुनः, सर्वस्वनिवेदने राजा बलिः च विशिष्यन्ते।

भक्ति नव प्रकारकि आहे. उदाहरण या प्रकारे आहे -
भगवद्गुणाचे श्रवण करण्यामध्ये परीक्षित, कीर्तनामध्ये शुक, स्मरणमध्ये प्रह्लाद, पादसेवनामध्ये श्रीलक्ष्मी, पूजनामध्ये राजा पृथु, वन्दनमध्ये अक्रूर,

दास्यमध्ये हनूमान, सख्यमध्ये अर्जुन, सर्वस्वनिवेदनामध्ये राजा बलि विशेष आहे.

भगवान् –

भगः अस्य अस्ति इति भगवान्। को नाम भगः इति चेदुक्तम् –

भग ज्यांचे आहे त्यांना भगवान असे म्हणतात. भग अर्थात् -

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।

वैराग्यस्याथ मोक्षस्य षण्णां भग इतीरणा ॥४३८॥

॥ वि० पु० -६-५-७४॥

ऐश्वर्याचे, समग्राचे, धर्माचे, यशाचे, धनाचे, वैराग्याचे, मोक्षाचे भग याने ग्रहण होतो.

भगवतः लक्षणमेवं कथितम् -

उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम्।

वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति ॥४३९॥

॥ वि० पु० -६-५-७८ ॥

उत्पत्ति, प्रलय, भूतांची गति आणि अगतिला जो जानतो, विद्या आणि अविद्येचा ज्ञाता त्याला भगवान असे म्हणतात.

भारतवर्षम् -

उत्तरेण समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।

वर्ष तद्भारतं नाम भारती यत्र सन्ततिः॥४४०॥

उत्तर दिशेला हिमाद्रि, दक्षिणेला समुद्राने व्याप्त हा भारतवर्ष आहे, जिथे भारती हि संतति आहे.

मनोहरम् -

यस्मिन्सक्तं मनः पुंसां नान्येन ह्रियते मनः।

अन्येभ्यः यच्च हरति तन्मनोहरमुच्यते ॥४४१॥

यस्मिन् सक्तं पुंसां मनः नान्येन ह्रियते वशीक्रियते। यच्च अन्येभ्यः विषयेभ्यः मनः हरति तत् मनोहरमिति कथ्यते।

ज्यामध्ये मनुष्याचे मन आसक्त झाल्यानंतर अन्य कोणाच्या वशामध्ये नाही होत, अन्य कोणी हारण करू शकत नाही, जो अन्य विषयाने मनाचे हरण होऊ देत नाही तो मनोहारी असे म्हणतात.

मन्त्रः -

मननात् त्रायते यस्मात् तस्मात् मन्त्रः प्रकीर्तितः॥४४२॥

महापुरणम् -

सृष्टिश्चापि विनाशश्च स्थितिस्तेषां च पालनम्।

कर्मणां वासना मननां च क्रमेण च॥४४३॥

वर्णनं प्रलयानां च मोक्षस्य च निरूपणम्।

सङ्कीर्तन हरेरेव देवानां च पृथक् पृथक् ॥

महापुराणं विज्ञेयम् एकादशलक्षणम् ॥४४४॥

अष्टादश महापुराणानि -

मद्वयं भद्वयं चैव त्रयं वचतुष्टयम्।

अनापलिङ्गकूस्कानि पुराणानि नवद्वयी ॥४४५॥

तेषु पुराणेषु मकारेण आरभ्यमाणं द्वयम्। मद्वयम् - मत्स्यपुराणं मार्कण्डेयपुराणम् । भद्वयम् - भविष्यपुराणं भागवतपुराणम्। ब्रत्रयम् -

ब्रह्मपुराणं ब्रह्मवैवर्तपुराणं ब्रह्माण्डपुराणम्। वचतुष्टयम् - विष्णुपुराणं वामनपुराणं वराहपुराणं वायुपुराणम्। अ - अग्निपुराणम्। ना - नारदपुराणम्। प - पद्मपुराणम्। लिं - लिङ्गपुराणम्। ग - गरुडपुराणम्। कू - कूर्मपुराणम्। स्क - स्कन्दपुराणम्। इति अष्टादश पुराणानि।

पुराणामध्ये मकारने आरभ्यमाण दोन. मत्स्यपुराण आणि मार्कण्डेयपुराण। भ ने आरभ्यमाण दोन - भविष्यपुराण, भागवतपुराण। ब्र - ब्रह्मपुराण, ब्रह्मवैवर्तपुराण, ब्रह्माण्डपुराण। वचतुष्टय - विष्णुपुराण, वामनपुराण, वराहपुराण, वायुपुराण। अ - अग्निपुराण। ना - नारदपुराण। प - पद्मपुराण। लिं - लिङ्गपुराण। ग - गरुडपुराण। कू - कूर्मपुराण। स्क - स्कन्दपुराण।

महाभारतम् -

व्यासेन रचितं जयाख्यं काव्यं सम्प्रति महाभारतमित्यभिधीयते। तत्र कारणं तु-

व्यास द्वारा विरचित सुप्रसिद्ध काव्य महाभारत आहे. त्याचे कारण -

महत्वे भारवत्वे च ध्रियमानं यतोऽधिकम्।

महत्वात् भारवत्वाच्च महाभारतमुच्यते ॥४४६॥

व्यासद्वारे विरचित सुप्रसिद्ध काव्य महाभारत आहे. त्याचे कारण -
महत्त्व आणि भारवत्वामध्ये सर्वात अधिक असल्या कारणाने याला महाभारत असर म्हणतात.

मानसनमस्कृतिः -

इष्टमध्यानिष्टगतैः मनोभिः त्रिविधं भवेत् ।

नमनं मानसं प्रोक्तमुत्तमाधममध्यमम् ॥४४७ ॥

मानस नमनाने इष्ट, अध्यनिष्ट आणि मनाने असे तीन प्रकार आहेत, जे की उत्तम, मध्यम आणि अधम आहेत.

मित्रम् -

पापान्निवारयति योजयते हिताय

गुह्यं निगूहति गुणान् प्रकटीकरोति।

आपद्गतं च न जहाति ददाति काले

सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥४४८॥

पापापासून दूर आणि हिताच्या निकट घेऊन जाणारा, दोष एकांतात आणि गुणांना सर्वांच्या पुढे ठेवणारा, विपत्तिमध्ये साथ न सोडणारा असा मित्र होतो.

मित्रे च चातुर्विध्यं श्रूयते। तदुक्तम् -

औरसं कृतसम्बन्धं तथा वंशक्रमागतम्।

रक्षितं व्यसनेभ्यश्च मित्रं ज्ञेयं चतुर्विधम् ॥४४९॥

मित्राचे चार प्रकार आहेत – औरस (स्वताः उत्पन्न), कधी कोणत्या प्रसंगामध्ये भेटलेला आणि ओळख झालेली, वंशतः ज्याचा परिचय आहे, ज्यांची कधी व्यसनापासून रक्षा केली आहे.

मेघा- मतिः - धीः -

अतीतानुस्मृतिर्मेधा तत्कालग्राहिणी मतिः।

शुभाशुभविचारज्ञा प्रज्ञा धीरित्युदीरिता ॥४५०॥

अतीतविषयाणां धारणं मेधा, तत्काले विपयाणां ग्रहणं मतिः,

युक्तायुक्तविचारिणी प्रज्ञा धीः इत्यभिहिता। प्रतिभा तु नव नवोन्मे पशालिनी प्रज्ञा।

अतीतविषयांचे धारण करणारी मेधा, तत्कालामध्ये विषयाला ग्रहण करणारी मति, युक्तायुक्तविचारिणी प्रज्ञा धी आहे. प्रतिभा तर नवनवोन्मे षशालिनी प्रज्ञा आहे.

म्लेच्छः -

गोमांसखादको यस्तु विरुद्धं बहु भाषते।

सर्वाचारविहीनश्च म्लेच्छ इत्यभिधीयते ॥४५१॥

गायीचे मास खाणारा, जास्त अधिक भाषण करणारा, सर्वतः आचाराने विहीन म्लेछ असा मनाला जातो.

योगी -

सुभाषितेन गीतेन युवतीनां च लीलया।

मनो न भिद्यते यस्य स योगीति निगद्यते ॥४५२॥

सुभाषित, गीत, युवतिंची लीला या सर्वाने ज्याचे मन विचलित नाही होत तोच योगी आहे.

वर्णचतुष्टयम् -

न हि भेदोऽस्ति वर्णानां सर्वं ब्राह्ममिदं जगत्

ब्रह्मणा पूर्वसंसृष्टं कर्मभिः वर्णतां गतम् ॥४५३॥

ब्रह्मणाः संसृष्टं जगत् आदौ ब्राह्ममेव आसीत् किन्तु काले गते सति अन्ये वर्णाः उत्पन्नाः इत्युक्तं महाभारते। अतः एव श्रूयते -

न राज्यं न च राजासीत् न दण्डयो न च दाण्डिकः।
धर्मेणैव प्रजाः सर्वाः रक्षन्ति स्म परस्परम् ॥४५४॥

यथा काले गते सति ब्राह्मण्ये शैथिल्यमागतं तथा अन्ये वर्णाः उत्पन्नाः।शिष्टरक्षणार्थं दुष्टशिक्षणार्थं च क्षत्रियाः समुत्पन्नाः। व्यापारप्रधानः वैश्यवर्णः समुत्पन्नः। शिरःप्रधानं बाहुप्रधानम् ऊरुप्रधानं च कार्यं कर्तुम् असमर्थाः ये, ते शुचा द्रवन्तः एतेषां वर्णानां सेवापराः अभवन् । ते एव शूद्राः। एवं वर्णचतुष्टयं सम्बभूव । तत्तद्वर्णीयव्यक्तीनां परिज्ञानार्थं चत्वारि उपनामानि अपि प्रदत्तानि शर्मवर्मगुप्तदासाख्यानि। शर्म इत्यस्य सुखमित्यर्थः। यः वर्णः पारमार्थिकं सुखमुद्दिश्य सम्प्रवृत्तः ब्राह्मणाख्यः सः शर्म इत्युपनाम प्राप्नोत् । यश्च वर्णः जनानां शरीरवस्त्वादीनां संरक्षणार्थं सम्प्रवृत्तः क्षत्रियवर्णः तस्य वृणोति आच्छादयति शरीरादिकमिति अर्थयोगेन वर्मेति नाम प्राप्तम्। यश्च तृतीयः वर्णः वाणिज्यव्यवहारे प्रवृत्तः तस्मिन् वस्तूनां विषयाणां च गोप्यताप्राधान्यमवगम्य गुप्ताभिधानेन अभिहितः। यश्च तुरीयः वर्णः सर्वेपां वर्णानां दासभावं प्राप्तः सः दासाभिधानेन उपदिष्टः। एवं चत्वारि नामानि तत्तत्कर्मानुगुण्येन प्रदत्तानि। किन्तु काले समतिक्रान्ते वर्णव्यवस्था शिथिलतां प्राप । जातिव्यवस्था आरब्धा । यः यस्यां योनौ उत्पन्नः सः तज्जातीयः बभूव । तत्रापि साङ्कर्यवशात् अगणितविभागाः समुद्भवताः। एतर्हि तु लोके जात्यर्थे एव ब्राह्मणादयः शब्दाः प्रयुज्यन्ते। ब्राह्मणादयः शब्दाः आचारानुगुण्येन एव प्रदत्ताः इति विषयस्योपष्टम्भकाः अनेके श्लोकाः उपलभ्यन्ते। ब्राह्मणस्य विषये यथा –

जगत् पहले ब्राह्मही आहे. कालाच्या बरोबर अन्य वर्ण उत्पन्न झाले. जेंव्हा वेळेनुसार ब्राह्मण्यामध्ये शिथिलता आली तेंव्हा अन्य वर्ण उत्पन्न झाले.

शिष्टाच्या रक्षणासाठी आणि दुष्टांना शिक्षा देण्यासाठी हेतु क्षत्रिय झाले. व्यापरप्रधान वैश्य आले, शिरःप्रधान, बाहुप्रधान आणि ऊरुप्रधान काम करण्यासाठी असमर्थ यांचे सेवक झाले. या प्रकारे चार वर्ण झाले. उन्हें उपनाम पण प्राप्त झाले. जो वर्ण पारमार्थिक सुखाच्या उद्देशाने प्रवृत्त झाले तो ब्राह्मण, त्यांना शर्म हे उपनाम प्राप्त झाले. लोकांचे रक्षणा हेतु क्षत्रियांना वर्म (वृणोति आच्छदयति असि व्युत्पत्तिने), वणिज्यामध्ये वस्तुंची गोपनीयताला ध्यान ठेवून गुप्त आणि चतुर्थ वर्णीय दास हे उपनाम प्राप्त झाले. चारी नाव त्यांच्या कर्माच्या अनुसार दिले आहेत. किन्तु समयानुसार साथ वर्णव्यवस्था लीन झाली आणि जातिव्यवस्था आरब्ध झाली जो ज्या योनिमध्ये उत्पन्न झाला त्याला ती जाती प्राप्त झाली. त्याच्यात पण सांकर्या कारण अगणित भेद उत्पन्न झाले. ब्राह्मणादि शब्द आचाराच्या अनुसार दिले गेले. याच्या प्रमाणरूप कित्तेक श्लोक दिसून येतात. न केवल महाभारतमध्ये अपि तु मनुस्मृतिमध्ये पण ब्राह्मणाचे लक्षण सांगितले आहे. स्वयं बुद्ध ब्राह्मणत्वा लक्षण धम्मपदमध्ये सांगतात. बौद्ध ग्रंथाची सरणि तीन भागामध्ये विभक्त आहे. - सुत्तपिटक, विनयपिटक आणि अभिधम्मपिटक। धम्मपद हा ग्रंथ सुत्तपिटकमध्ये अन्तरभूत आहे. याच्यात २६ वर्ग आहेत. त्याच्यात् अन्तिम वर्ग ब्राह्मण आहे. जिथे २४ गाथा (पालीमध्ये स्थित श्लोकाला गाथा म्हणतात) मध्ये ब्राह्मणाचे लक्षण सांगितले आहे.

ब्राह्मणः -

जन्मना जायते शूद्रः संस्काराद्विज उच्यते।
वेदाध्ययनेन विप्रः ब्रह्म जानाति ब्राह्मणः ॥४५५॥
न जाति कारणं तात गुणाः ब्राह्मण्यकारणम्।
व्रतस्थमपि चाण्डालं तं देवाः ब्राह्मणं विदुः ॥४५६॥

॥उत्तरगीतम्॥

न कुलं वृत्तहीनस्य प्रमाणमिति मे मतिः।

अन्तेष्वपि च जातानां वृत्तमेव विशिष्यते ॥४५७॥

यस्तु शूद्रो दमे सत्ये धर्मे च सततोत्थितः।

तं ब्राह्मणमहं मन्ये वृत्तेन हि भवेद्विजः॥४५८॥

॥वनपर्व २१६-१४॥

नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च

शील स्थितिः दण्डनिदानमार्जवं ततस्ततश्चोपरमः क्रियाभ्यः॥४५९॥

॥म०भा० १२/२७७/ ३७ ॥

ब्राह्मणस्य तु देहोऽयं नोपभोगाय कल्पते।

इह कष्टाय महते प्रेत्यानन्तसुखाय च ॥४६०॥

न योनिनापि संस्कारो न श्रुतं नापि सन्ततिः।

कारणानि विजत्वस्य वृत्तमेव तु कारणम् ॥४६१॥

॥वनपर्व ३१८ ॥

धर्मश्च सत्यं च तपो दमश्च अमात्सयं हीस्तितिक्षानसूया।

दानं श्रुतं चैव धृतिः क्षमा च महाव्रता द्वादश ब्राह्मणस्य ॥४६२॥

॥उद्योगपर्व ४५-५॥

धर्म, सत्य, तप, इंद्रियांवर ताबा, यात द्वेष, लाज न बाळगणे, सहनशीलता, कोणाचे दोष न पाहणे, दानधर्म, शास्त्रांचे ज्ञान, संयम आणि क्षमा - ही ब्राह्मणाची बारा महान प्रतिज्ञा आहेत.

न केवलं महाभारते मनुस्मृतौ च ब्राह्मणस्य लक्षणमुक्तम्। स्वयं बुद्धः, ब्राह्मणत्वस्य लक्षणमब्रवीत् धम्मपदे।

बौद्धग्रन्थसरणिः त्रिधा विभक्ता। सुत्तपिटकं विनयपिटकम् अभिधम्मपिटकम् इति। अयं धम्मपदाख्यः ग्रन्थः सुत्तपिटके अन्तर्भवति।

अस्मिन् ग्रन्थे षड्विंशतिवर्गाः सन्ति। तेषु अन्तिमवर्गः ब्राह्मणवर्गाख्यः। यत्र चतुर्विंशतिगाथाभिः (पालिभाषायां विद्यमानः श्लोकः - गाथा) ब्राह्मणलक्षणं प्रपञ्चीकृतम्। तेषु काश्चन गाथाः प्रदर्शन्ते -

महाभारत आणि मनुस्मुतीमध्येच ब्राह्मणाचे लक्षण सांगितले नाहीत, स्वतः बुद्ध धम्मपदामध्ये ब्राह्मण लक्षण सांगतात.

बौद्धग्रन्थांची सारणी तीन प्रकारे विभक्त केली आहे. सुत्तपिटक, विनयपिटक आणि अभिधम्मपिटक. हे धम्मपदाख्य ग्रंथ सुत्तपिटकामध्ये आहेत. या ग्रंथामध्ये सव्वीस वर्ग आहेत. त्यातील अंतिम वर्ग हा ब्राह्मण वर्ग आहे, इथे चोव्वीस गाथेत [पालीभाषमध्ये विद्यमान श्लोक - गाथा] ब्राह्मणलक्षण निरुपित केले आहेत. त्यातील काही गाथा दाखवतात -

झायिं विरजम् आसीनं कटकिच्चम् अनासवम् ।

उत्तमत्थम् अनुप्पत्तं तमहं ब्रूमि ब्राह्मणम् ॥४६३॥

॥धम्मपद-३८६॥

ध्यायिनं विरजमासीन कृतकृत्यमनासवम् । उत्तमार्थमनुपात्तं तमहं ब्रूमि ब्राह्मणम्।

जो ध्यानी, विमल, आसनबद्ध (स्थिर), कृतकृत्य, आणि आश्रयरहित, ज्याने उत्तम अर्थ (निर्वाण) प्राप्त केला आहे, त्याला मी ब्राह्मण असे म्हणतो.

न जटाहि न गोत्तेम न जच्चा होति ब्राह्मणो।

यं हि सच्चं च धम्मो च सो सुची सो च ब्राह्मणो॥४६४॥

॥धम्मपद-३९३॥

न जटाने, न गोत्राने, न जन्माने ब्राह्मण होते. ज्याच्यामध्ये सत्य (सोळा प्रकाराने प्रतिवेधन केलेले चार आर्य सत्य) आणि (नव प्रकारचे लोकोत्तर)

धम्म आहे, तिच शुचि (पवित्र) आहे आणि तोच ब्राह्मण आहे.

न जटया न गोत्रण न जात्या भवति ब्राह्मणः। यस्य सत्यं च धर्मश्च सः शुची सश्च ब्राह्मणः।

जटा, गोत्र, जात याने ब्राह्मण संबोधित होत नाही तर जो धर्माने सत्यवादी आहे तो ब्राह्मण.

अक्कोधनं वतवन्तं सीलवन्तम् अनुस्सुतम्।

दन्तम् अन्तिमसारीरं तमहं ब्रूमि ब्राह्मणम् ॥४६५॥

॥धम्मपद-४००॥

अक्रोधनं व्रतवन्तं शीलवन्तमनुश्रुतम्। दान्तमन्तिमशरीरं च तमहं ब्रूमि ब्राह्मणम्।

जो अक्रोधी, (धुत -) व्रती, शीलवान, (कोणत्याही गोष्ठीची तृष्णा नसणार) निरभिमानी आहे, (दंभी नाही), (साही इंद्रियांना दमन करून घेतल्याने) दन्त (संयमी) आणि अंतिम शरीर धारी आहे, त्याला मी ब्राह्मण असे म्हणतो.

गम्भीरपञ्ञं मेधाविं मग्गामग्गस्य कोविदम् ।

उत्तमत्थम् अनुप्पत्तं तमहं ब्रूमि ब्राह्मणम् ॥४६६॥

॥धम्मपद-४०३॥

गम्भीरप्रज्ञं मेधाविनं मार्गामार्गस्य कोविदम्। उत्तमार्थमनुपात्तं तमहं ब्रूमि ब्राह्मणम्।

गहन प्रज्ञा असणारे, मेधावी, मार्ग अमार्गाचे पंडित, उत्तम अर्थ (निर्वाण) प्राप्त झालेले (व्यक्ति) ला मी ब्राह्मण असे म्हणतात.

ब्राह्मणादीनां धर्माः -

ब्राह्मणः क्षत्रियः वैश्यः शूद्रः इति वर्णचतुष्टयं प्रसिद्धम्। सम्प्रति तत्तद्वर्णधर्मः प्रदर्श्यते -

ब्राह्मण, क्षत्रिय, वैश्य, शूद्र इ. चार वर्ण प्रसिद्ध आहेत. प्रत्येक वर्ण विचार क्रमाने पाहूया.

ब्राह्मणधर्माः -

अध्यापनमध्ययनं यजनं याजनं तथा।

दानं परिग्रहं चैव ब्राह्मणानामकल्पयत् ॥४६७॥

॥मनुस्मृतिः १-८८॥

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।

ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्मस्वभावजम् ॥४६८॥

॥भगवद्गीता १८-४२॥

क्षान्तिः - क्षमा, आर्जवम् - ऋजुता, विज्ञानम् -अनुभवात्मकं ज्ञानम्।
अंतःकरणाचा निग्रह, इंद्रियांवर ताबा ठेवणे, धर्मासाठी कष्ट सहन करणे, अंतर्बाह्य शुद्ध राहणे, दुसऱ्यांच्या अपराधांना क्षमा करणे, मन, इंद्रिये व शरीर सरळ राखणे, वेद, शास्त्र, ईश्वर व परलोक इत्यादींवर विश्वास ठेवणे, वेदशास्त्रांचे अध्ययन-अध्यापन करणे आणि परमात्मतत्त्वाचा अनुभव घेणे, ही सर्वच्या सर्व ब्राह्मणाची स्वाभाविक कर्मे आहेत.

प्रजानां रक्षणं दानमिज्याध्ययनमेव च।

विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः॥४६९॥

॥ मनुस्मृतिः १-८९॥

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।

दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥४७०॥

॥भगवद्गीता १८-४३॥

दाक्ष्यम् -दक्षस्य भावः। सहसा प्रत्युत्पन्नेषु कार्येषु अव्यामोहेन प्रवृत्तिः। धृतिः- सर्वावस्थासु दुःखाभावः।

क्षत्रियाचे धर्म काही या प्रकारे आहे - प्रजेचे रक्षण करने, दान, अध्ययन, विषयांमध्ये अप्रसक्ति.

भगवद्गीता अनुसार शौर्य, तेज, धृति, दाक्ष्य, युद्धामध्ये पलायन न करने, दान, ईश्वरभाव, क्षात्र कर्म(क्षत्रियाचे कर्म) हे क्षत्रियाचा धर्म आहे.

शौर्य, तेज, धैर्य, चातुर्य, युद्धातून पलायन न करणे, दान देणे आणि स्वामिभाव ही सर्वच्या सर्व क्षत्रियांची स्वाभाविक कर्मे आहेत.

वैश्यशूद्रयोः धर्माः -

पशूनां रक्षणं दानमिज्याध्ययनमेव च।

वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च ॥४७१॥

॥मनुस्मृतिः १-९०॥

एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत्।

एतेषामेव वर्णानां शुशूषामनसूयया ॥४७२॥

॥ मनुस्मृतिः १-९१॥

कृषिगौरक्ष्यवाणिज्यं वैश्यकर्मस्वभावजम् ।

परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥४७३॥

॥ भगवद्गीता १८ -४४॥

पशुंचे रक्षण, दान, यजन, अध्ययन, व्यापार, ऋण, कृषि हे कार्य वैश्याचे आहेत. शूद्राने प्रभु अर्थात् उपरोक्त तिघांच्या आज्ञेचे पालन केले पाहिजे, त्यांची ही आज्ञेचे तो अनसूया न करता पालन करने. शेती, गोपालन आणि क्रय-विक्रयरूप सत्य व्यवहार ही वैश्याची स्वाभाविक कर्मे आहेत. तसेच सर्व वर्णांची सेवा करणे हे शूद्राचेही स्वाभाविक कर्म आहे.

वाचिकनमस्कृतिः -

या स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिः।

क्रियते भक्तियुक्तेन वाचिका तूत्तमा स्मृता ॥४७४॥

वाद्यविभागः -

ततं तन्त्रीगतं वाद्यं वंशाद्यं सुषिरं तथा।

चमविनद्धमानधन तालादिक मतम॥४७५॥

सङ्गीतवाद्येषु चत्वारः विभागाः। ततं सुषिरम् आनद्धं घनं चेति। तेषु ततं तन्त्रीवाद्यम् (Chordophone)। सुषिरं वायुवाद्यम् (Aerophone)। आनद्धं चर्मवाद्यम् (Membranophone)। घनं लोहवाद्यम् (Idiophone)। उदाहरणम् - ततम् -वीणा। सुषिरम् - वंशी। आनद्धम् - मृदङ्गः। घनम् - घटः।

वाद्यांचे चार विभाग केले जाते - तत, सुषिर, आनद्ध आणि घन. तत अर्थात् तंत्रीवाद्य(Chordophone), सुषिर वाद्य अर्थात् वायु द्वारे वाजला जाणारा वाद्य(Aerophone), घन अर्थात् लोहवाद्य(Idiophone)। तत -वीणा। सुषिर - वंशी(बांसुरी)। आनद्ध - मृदंग। घन - घट।

विद्यार्थी -

काकदृष्टिः बकध्यानं श्वाननिद्रा तथैव च।

अल्पाहारो जीर्णवस्त्रः (अल्पाहारी गृहत्यागी) एतद्विद्यार्थिलक्षणम्॥४७६॥

कावल्या सारखी दृष्टि, बगळ्या सारखे ध्यान, श्वाना सारखी निद्रा, अल्पाहारी, सामान्य वस्त्रधारी (गृहत्यागी) हे विद्यार्थ्याचे लक्षण आहेत.

छात्रः कथमध्ययनं कुर्यात् इति क्रमः एवं निर्दिष्टः -

यः पठति लिखति परिपृच्छति पण्डितानुपाश्रयते।
तस्य दिनकरकिरणैः नलिनीदलमिव विकसते बुद्धिः॥४७७॥

पठनं लेखनं सब्रह्मचारिभ्यः आचार्येभ्यः च परिपृच्छा पण्डितोपसर्पणम् एतैः त्रिभिः ज्ञानविस्तारः सम्भवति। आचार्यः एव सम्पूर्ण न पाठयितुं शक्नोति । सः केवलं पादमेवाध्यापयति अन्यत्तु इत्थं ज्ञातव्यं भवति -

जो पठन, लेखन, सहपाठी आणि आचार्याशी विचारणे, पण्डितांचे आश्रय घेणे हे सर्व करत आहे त्याची बुद्धि विकसित हो ज्ञानाचे विस्तार होत आहे. आचार्य संपूर्ण नाही सिकउ सकत. ते केवल पादभागच शिखवतात अन्य पाद भाग शिष्यांना स्वतः शिखाव लागत, अन्य सहपाठि सोबत आणि अन्य कालक्रमाने.

आचार्यात् पादमादत्ते पादं शिष्यः स्वमेधया।
पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च ॥४७८॥

यश्च छात्रः एवं नाधीते सर्वं किञ्चित् किञ्चित् जानाति, तादृशः कुक्कुटवृत्याश्रितः छात्रः कुक्कुटमिश्रपादः इति उपहसितः ग्रन्थेषु। कुकुटमिश्रपादलक्षणमेवमुक्तं शङ्खधरेण -

छात्र अध्ययन कसे कोणत्या क्रमाने करावे -
जे पठन, लेखन, सहपाठी आणि आचार्याला विचारणे, पण्डितांचा आश्रय घेणे हे सर्व करतो त्याची बुद्धि विकसित होऊन ज्ञानाचा विस्तार होतो. आचार्य संपूर्ण नाही शिकवू शकत. ते केवल पादभागच शिकवू शकतात. अन्य पाद भाग शिष्याला स्वयं शिकावे, अन्य सहपाठियांसोबत आणि अन्य कालक्रमाने.

गुरोर्गिरः पञ्चदिनान्यधीत्य वेदान्तशास्त्राणि दिनत्रयञ्च ।

अमी समाघ्राय च तर्कवादान् उपागताः कुक्कुटमिश्रपादाः॥४७९॥

॥ लटकमेलकम्॥

पुरुषः कस्यचित् विषयस्य वेत्ता तदा भवति यदा तेन विद्यायाः चत्वाति सोपानानि आरूढानि। विद्यायाः चतस्त्रः अवस्थाः एवं निर्दिष्टाः नैषधीयचरिते-

विदयेची चार सोपाने माहीत असतील तर पुरुष एखाद्या विषयाचा दाता होऊ शकतो. नैषधीयचरितम् या काव्यामध्ये विदयेच्या चार अवस्था सांगितल्या आहेत.

अधीतिबोधाचरणप्रचारणैः दशाश्चतस्त्रः प्रणयनुपाधिभिः।

चतुर्दशत्वं कृतवान् कुतः स्वयं न वैनि विद्यासु चतुर्दशत्वम् ॥४८०॥

॥ नैपधचरितम् १-४॥

जो छात्र असे नाही शिकत, थोड थोड जानत आहे, असा छात्र कोबंडी सारखा होतो.

तानि च सोपानानि अधीतिः बोधः आचरणं प्रसारणं चेति। अधीतिः विषयस्य अवगमनम्। बोधः तस्य दाढर्यसम्पादनम्। अधीतस्य स्वजीवने आनयनम् आचरणम्। तस्य अन्येभ्यः पाठनं प्रसारणम्।

जो कोणाता विषय शिकतो त्याला हे चार सोपानाचे अनुसरण कले पाहिजे -

हे सोपान म्हणजे अधीती, बोध, आचरण, प्रसारण इत्यादि. अध्ययन - विषयाचे ज्ञान, बोध - त्याचे दृढीकरण, आचरण - शिकलेल्या विषयांचे स्वतःच्या जीवनामध्ये आचरण करणे, प्रसार - अन्य लोकांना शिकवणे.

विषयः -

विशब्दश्च विशेषार्थः सिनोतिर्बन्धनात्मकः।

विशेषेण सिनोतीति विषयोऽर्थनियामकः॥४८१॥

वि शब्द विशेष अर्थामध्ये आहे. आणि षय इथे सि हा धातु बन्धनात्मक आहे. अतः विशेष बन्धन अर्थात् नियामकत्व हा अर्थ इथे अभिप्रेत आहे.

वेदः -

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।

एतं विदन्ति वेदेन तस्मात् वेदस्य वेदता ॥४८२॥

ये विपयाः प्रत्यक्षादिप्रमाणैः बोधमनवरोहन्ति ते विपयाः येन प्रकाशिताः भवन्ति सः वेदः।

प्रमाणान्तरैः अनधिगतस्य अबाधितस्य च अर्थस्य बोधकत्वात् वेदस्य वेदत्वं सिद्धम्। समेपां प्रमाणानां प्रत्यक्षाश्रितत्वात् प्रत्यक्षागमयोः मिथो विरोधे द्वैताद्वैतादिविषयेषु प्रत्यक्षस्य एव स्यात् प्रामाण्यमिति न शङ्कनीयम्। आगमस्य अपौरुषेयतया निरस्तसमस्तपन्दूपणतया च सम्भवत्येव ज्यैष्ठ्यम्। न हि प्रत्यक्षेण सामस्त्येन वस्तुनः ज्ञानं प्राप्यते।

तथा च प्रत्यक्षं तु व्यावहारिकावस्थायां प्रमाणम् आगमस्तु पारमार्थिकावस्थायाम् अपि। अतः सम्भवति पारमार्थिकविपयेषु प्रत्यक्षसिद्धस्य आगमप्रमाणेन बाधः न प्रत्यक्षेण आगमसिद्धस्य। न हि प्रातिभासिकरजतेन व्यावहारिकशुक्तेः बाधः किन्तु व्यावहारिकशुक्त्या हि प्रातिभासिकरजतस्य बाधः। तस्मात् आगमस्य एव ज्यैष्ठ्यम्।

वेदः न नित्यः उत्पत्तिमत्वश्रवणात् 'अस्य महतो भूतस्य निःश्वसितमेतद् ऋग्वेदः' इत्यादि श्रुतिभ्यः। अनित्यत्वं तु न क्षणावस्थायित्वमपितु प्रलयकालपर्यन्तमवस्थायित्वम्। पुनश्च वेदः अपौरुपेयः। तल्लक्षणं च सजातीयोच्चारणापेक्षाच्चारणविपयत्वमित्युक्तं वेदान्तपरिभापायाम्। ईश्वरः संगादिकाले पूर्वसर्गसिद्धवेदानुपूर्विसमानानुपूर्विसहितम् एव वेदं रचयति । वेदसृष्ट्युत्तरमेवान्येपां सृष्टिः भवति । स च वेदः न केवलं शब्दतः ग्राह्यः अर्थतोऽपि ग्राह्यः एव । अतः उक्तं यास्केन -

जो विषय प्रत्यक्षादि प्रमाणाने ज्ञात होत नाही, ते विषय ज्याने प्रकाशित होतात त्यांना वेद असे म्हणतात.

अन्य प्रमाणाने अबाधित आणि अनधिगत अर्थाच्या बोधाने वेदाचे वेदत्व सिद्ध होते. सर्व प्रमाणांचे प्रत्यक्षप्रमाण हेच आश्रयस्थान असल्याने प्रत्यक्ष आणि आगमामध्ये विरोध झाल्यावर द्वैत आणि अद्वैत इत्यादि विषयांमध्ये प्रत्यक्षाचे प्रामाण्य आहे यात काही शंका नाही. आगम तर अपौरुषेय असल्याने निरस्तसमस्तपुन्दूषणाने प्रधान आहे. प्रत्यक्षाने समस्त वस्तुचे ज्ञान प्राप्त होत नाही.

प्रत्यक्ष व्यावहारिक अवस्थामध्ये प्रमाण आहे, आणि आगम पारमार्थिक अवस्थेमध्ये. म्हणून पारमार्थिक विषयामध्ये आगमाने प्रत्यक्षाचा बाध सिद्ध आहे. प्रत्यक्षाने आगमाचे प्रातिभासिक रजताने व्यावहारिक शुक्तिचे बाध होऊ शकत नाही. अपि तु व्यावहारिक शुक्तिने प्रातिभासिक रजताच बाध संभव आहे. म्हणून आगम ज्येष्ठ आहे.

वेद नित्य नाही. उत्पत्ति श्रवण झाल्याने 'अस्य महतो भूतस्य निःश्वसितमेतद् ऋग्वेदः' इत्यादि श्रुतिने अनित्यत्व हे क्षणिक अवस्था प्राप्त झालेले नसून प्रलयकाळापर्यन्त टिकणारे आहे. वेद अपौरुषेय आहे. त्याचे लक्षण असे की सजातीय उच्चारणापेक्षा विजातीय उच्चारण असे वेदान्तपरिभाषेमध्ये म्हटले आहे. ईश्वराने सर्गाच्या आरम्भामध्ये

पूर्वसर्गसिद्ध समानानुपूर्वी सहित वेदानुपूर्वीची रचना केली आहे. वेद सृष्टिच्या नंतर अन्य सृष्टि आहे.तो वेद केवळ शब्दाने नाही तर अर्थाने देखील ग्रहण केला पाहिजे.

स्थाणुरयं भारहारः किलाभूत् अधीत्य वेदं न विजानति योऽर्थम् ।
योऽर्थज्ञः इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥४८३॥

वेदस्य विकृतिपाठाः -

वेदस्य रक्षणार्थं विभिन्नक्रमेण वेदस्य उच्चारणं प्रसिद्धमस्ति । ता एव विकृतयः इति कथ्यन्ते। ताश्च -

वेदांच्या रक्षणासाठी विभिन्न क्रमाने वेदांचे उच्चारण प्रसिद्ध आहे. त्यांना विकृती असे संबोधतात.

जटा माला शिखा रेखा ध्वजो दण्डो रथो धनः।
अष्टौ विकृतयः प्रोक्ताः वेदरक्षाप्रयोजनात् ॥४८४॥

वेदाची रक्षेसाठी विभिन्न क्रमाने वेदाचे उच्चारण प्रसिद्ध आहे. त्यांना विकृति असे म्हणतात.

वेदस्य षडङ्गानि -

शिक्षा व्याकरणं छन्दो निरुक्तं ज्यौतिष तथा।
कल्पश्चेति षडङ्गानि वेदस्याहर्मनीषिणः॥४८५॥

षडङ्गस्वरूपम् -

शिक्षादीनां षडङ्गानां स्मृता वेदोपयोगिता।
शिक्षा शिक्षयति व्यक्तं वेदोचारणलक्षणम् ॥४८६॥

वक्ति व्याकरणं तस्य संहितापदलक्षणम्।

वक्ति तस्य निरुक्तं हि पदनिर्वचनं स्फुटम् ॥४८७॥

ज्योतिश्शास्त्र वदत्यत्र कालं वैदिककर्मणाम्।

क्रमः कर्मप्रयोगाणां कल्पसूत्रेण कथ्यते॥

मन्त्राक्षराणां संख्योक्ता छन्दोविचितिषु स्फुटम् ॥४८॥

॥ शिवतत्त्वरत्नाकरः -२-२०॥

तेपां पडङ्गानां वेदपुरुपसाम्यता एवं प्रदर्शिता -

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।

ज्योतिषामयनं चक्षुनिरुक्तं श्रोत्रमुच्यते ॥४८९॥

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।

तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥४९०॥

॥पाणिनीयशिक्षा ४१-४२॥

वेदाचे षडङ्ग या प्रकारे सांगितले आहे.

जर वेदाला एक पुरुष असे मानले तर छन्द हे वेदाचे चरण आहे, कल्प हे वेदाचे हाथ आहे, ज्योतिष हे वेदाचे नेत्र आहेत, निरुक्त हे वेदाचे कान आहेत, शिक्षा हे वेदाचे नासिका आहे, व्याकरण हे वेदाचे मुख आहे. अतः जो कोणी वेदाचे संपूर्णतः यतोचित अध्ययन करतो तो ब्रह्मलोकामध्ये पूजित होतो.

उपाङ्गानि -

मीमांसा न्यायशास्त्रं च पुराणं स्मृतिरेव च।

चत्वार्येतान्युपाङ्गानि बहिरङ्गानि षट्कतः॥४९१॥

मीमांसा, न्याय, पुराण, स्मृति हे चार वेदाचे उपांग आहे.

वैद्यः -

आयुर्वेदकृताभ्यासः सर्वेषां प्रियदर्शनः।

आर्यशीलगुणोपेतः एष वैद्यो विधीयते ॥४९२॥

आयुर्वेदाचे अभ्यास केलेला, सर्व ज्यांचे दर्शन प्रिय आहे असे, चरित्रवान्, गुणांनी युक्त असा वैद्य होतो.

व्याघातः -

व्याघातो नाम परस्परविरुद्धधर्मयोः एकाधिकरणे समुच्चयः।

तस्योदाहरणमेवमुदाहरणम्

व्याघात म्हणजे परस्पर विरोधी धर्मांचे एकत्रीकरण. त्याचे उदाहरण पुढीलप्रमाणे-

यावज्जीवमहं मौनी ब्रह्मचारी च मे पिता।

माता तु मम वन्ध्यासीत् अपुत्रश्च पितामहः ॥४९३॥

जोपर्यन्त जीवन आहे तो पर्यन्त मी मौनी आहे, माझे पिता ब्रह्मचारी आहेत, माता वंध्या आहे आणि पितामह निपुत्रिक आहे.
इथे सर्वत्र हे विरुद्ध धर्माचे प्रतिपादन केले गेलेले आहे.

शरणागतः -

व्याघ्रसिंहगजैश्चोरैः शत्रुभिश्चापि विद्रुतः।

भयाच्छरणमायातः शरणागत उच्यते ॥४९४॥

व्याघ्र, सिंह, गज(हाथी), याने = अथवा चोराने भयभीत होऊन जे शरण येतात त्याला शरणागत असे म्हणतात.

शरणागतिः -

अहमप्यपराधानामालयोऽकिञ्चनोऽगतिः।

त्वमेवोपायभूतो मे भवेति प्रार्थनामतिः॥

शरणागतिरित्युक्ता सा देवेऽस्मिन् प्रयुज्यताम्॥४९५॥

॥ अहिर्बुध्न्यसंहिता ॥

मी अपराध आलयचा आहे, माझी कोणती गति नाही, आपणच माझे उपायभूत होवो असी प्रार्थना मी करतो.

शिष्टाः-

न पाणिपादचपलो न नेत्रचपलो मुनिः।

न च वागणचपल इति शिष्टस्य लक्षणम् ॥४९६॥

धर्मो नातिगतो यैस्तु वेदश्च परिहितः।

ते शिष्टा ब्राह्मणाः प्रोक्ता नित्यमात्मगुणान्विताः॥४९७॥

जो मुनि पाणिपादचपल नाही होत, ज्याचे नेत्र चपल नाही, वागङ्गाने जो चपल नाही तोच शिष्ट आहे.

शिष्टाचारः -

त्रयी वार्ता दण्डनीतिः प्रजावर्णाश्रमेज्यया।

शिष्टैराचर्यते यस्मात् शिष्टाचारः सः शाश्वतः॥४९८॥

दानं सत्यं तपोऽलोभो विधेज्या पूजन दमः।

अष्टौ तानि चरित्राणि शिष्टाचारस्य लक्षणम् ॥४९९॥

त्रयी, वार्ता, दंडनीति यांचे प्रयोग प्रजामध्ये वर्णाच्या अनुकूल केले पाहिजे, ज्याने शिष्ट आचरण करतात, ते शिष्टाचार मानले जातात.

शिष्यः -

शान्तो विनीतः शुद्धात्मा श्रद्धावान् धारणे क्षमः।

समर्थश्च कुलीनश्च प्राज्ञः सचरितो धनी॥

एवमादिगुणैर्युक्तः शिष्यो भवति नान्यथा ॥५००॥

॥ तन्त्रसारः॥

शांत, विनीत, शिद्धात्मा, श्रद्धावान्, धारणेत क्षम, समर्थ, कुलीन, प्राज्ञ, शुद्ध चरित्र वाला शिष्य होय.

शृङ्गारः -

पुंसः त्रियां स्त्रियः पुंसि संयोगे प्रति या स्पृहा।

सा शृङ्गार इति ख्याता रतिक्रीडादिकारणम् ॥५०१॥

स्त्री आणि पुरुषाला परस्पर जी प्रीति होते त्याला शृङ्गार असे म्हणताता. जे रतिक्रीडाचे कारण आहे.

शौचम् –

शुद्धता एव शौचमिति निगद्यते। शौचे द्वैविध्यं प्रसिद्धं बाह्यमान्तरं च। मृजलाभ्यां क्रियमाणं बाह्यशौचम्। अहंकारत्यागः अन्तश्शौचम्। तदेवं निरूपितम् -

शुद्धता म्हणजेच शौच होय. शौचमध्ये दोन भाग प्रसिद्ध आहेत - आंतर, बाह्य. माती तसेच पाण्याने केलेली शुद्धता म्हणजे बाह्य शुद्धता. अहंकाराचा त्याग म्हणजे आंतरिक शुद्धता.

शौचं तु विविध प्रोक्तं बाह्यमाभ्यन्तरं तथा।

मृजलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथान्तरम् ॥५०२॥

शुद्धशौचमिति प्रोक्तं मृजलाभ्यां तु लौकिकम् ॥५०३॥

शौच अर्थात् शुद्धता. ते दोन प्रकारचे आहेत - बाह्य जे मृज्जलादिने आणि आंतर शौच जे अहंकारादिचे त्याग केल्याने हो.

प्रकारान्तरेण शौचे पञ्चविभागाः अपि श्रूयन्ते । तद्यथा -

शौचाचे पांच भाग सांगितले आहे.

मलशौचं मनःशौचं शौचमिन्द्रियनिग्रहः।

सर्वभूतदयाशौचं जलशौचं तु पञ्चमम् ॥५०४॥

एतादृशशुचितायाः प्राप्तिमार्गः अपि निर्दिष्टः मनुना -

मनूंनी शुचिप्राप्ती मार्ग देखिल सांगितला आहे.

अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति ।

विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति ॥५०५॥

॥ मनुस्मृतिः ८-१०९॥

या प्रकारे शुचिताचे मार्ग पण मनुने मनुस्मृतिमध्ये सांगितले आहे. मनु म्हणतात - जलाने शरीर, सत्याने मन, विद्या आणि तपाने भूताम्त्मा आणि ज्ञानाने बुद्धि शुद्ध होती.

एभ्यः सर्वेभ्यः अपि शौचेभ्यः अर्थशौचं प्रधानमिति मनोर्मतम् -

प्रस्तुत सर्व शौचांमध्ये अर्थशौच प्रधान आहे.

सर्वेषामपि शौचानामर्थशौचं परं स्मृतम्।

योऽर्थे शुचिः स हि शुचिः न मृद्वारिशुचिः शुचिः॥५०६॥

॥मनुस्मृतिः ४-१०६॥

षड् भावभिकाराः -

उत्पत्तिसत्तापरिणामवृद्धिक्षयाः विनाशश्च इति प्रकाराः।

भावस्य जन्मस्थितिसंहतीनां विकासहेतौ खलु षड् वदन्ति ॥५०७॥

उत्पत्ति, सत्ता, परिणाम, वृद्धि, क्षय, विनाश हे सहा भावविकार आहेत.

सदाचारः -

विवेपरागरहिता अनुतिष्ठन्ति यं द्विजाः।

विद्वांसस्तं सदाचारं धर्ममूलं विदुर्बुधाः॥५०८॥

साधवः क्षीणदोषाश्च सच्छब्दः साधुवाचकः।

तेषामाचरणं यत्तु सदाचारः स उच्यते ॥५०९॥

यस्मिन्देशे य आचारः पारम्पर्यक्रमागतः।

शुतिस्मृत्यविरोधेन सदाचारः स उच्यते ॥५१०॥

द्वेष, राग इत्यादिने रहित द्विज ज्याचे अनुष्ठान करतात विद्वज्जन त्याला सदाचार असे म्हणतात, त्याला धर्माचे मूल मानले आहे.

सन्न्यासः -

कर्मत्यागेन सन्न्यासो न प्रैपोचारणेन तु।

सन्धौ जीवात्मनोरैक्यं संन्यासः परिकीर्तितः ॥५११॥

कर्माचा त्याग केल्याने संन्यास प्राप्त नाही होत, जीव आणि आत्म्याचे ऐक्य प्रस्थापित करने हेच संन्यास आहेत.

सप्त स्वराः -

सङ्गीते सप्त स्वराः प्रसिद्धाः। ते च -

संगीत शास्त्रामध्ये सात स्वर प्रसिद्ध आहेत. ते खालीलप्रमाणे

निषादर्षभगान्धाराः षड्जमध्यमधैवताः।

पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः॥५१२॥

संगीतामध्ये सात स्वर प्रसिद्ध आहेत. षड्ज, ऋषभ, गंधार, मध्यम, पंचम, धैवत, निषाद हे.

एते सप्त स्वराः प्रकृतौ एव दृश्यन्ते। तद्यथा -

हे सात स्वर प्रामुख्याने दिसून येतात.

षड्ज रौति मयूरस्तु गावो नदति चार्षभम् ।

अजाविकौ तु गान्धार क्रौञ्चो नदति मध्यमम् ॥५१३॥

पुष्पाणां धारणे काले कोकिलो रौति पञ्चमम्।

अश्वस्तु धैवतं रौति निषादं रौति कुञ्जरः ॥५१४ ॥

सप्तर्षयः -

मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः।

वसिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिनः॥५१५॥

मरीचि, अंगिरा, अत्रि, पुलस्त्य, पुलह, क्रतु, वसिष्ठ हे सात ऋषिंना सप्तर्षि असे म्हणतात.

चित्रशिखण्डिनः - सप्तर्पयः। यद्वा –

कश्यपोऽनिर्भरद्वाजः विश्वामित्रोऽथ गौतमः।

जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः स्मृताः॥५१६॥

कश्यप, अत्रि, भरद्वाज, विश्वामित्र, गौतम, जमदग्नि, वसिष्ठ हे सप्तर्षि अन्य मताने प्रसिद्ध आहे.

मन्वन्तरभेदेन ऋषयः भिद्यन्ते। समाधिः -

इमं गुणसमाहारमनात्मत्वेन पश्यतः।

अन्तःशीतलता यस्य समाधिरिति कथ्यते ॥५१७॥

अथवा

ध्यातृध्याने परित्यज्य क्रमाद्ध्येयैकगोचरम्।

निवातदीपवच्चित्तं समाधिरभिधीयते ॥५१८॥

॥ पञ्चदशी १-५५॥

चित्तमभ्यासवशेन ध्यातृध्याने परित्यज्य, ध्यातारं ध्यानं च क्रमात्परित्यज्य ध्येयैकगोचरं ध्येयमेकमेव गोचरं विषयः यस्य तत्तथाविधं भवति तदा समाधिरभिधीयते। वायुरहिते प्रदेशे वर्तमानदीपः यथा निश्चलः भवति तद्वत्।

ध्यातृ आणि ध्यानाचे त्याग करून, ध्याता आणि ध्यान यांना क्रमाने त्याग करून अभ्यासाच्या कारण मनाला ध्येयैकगोचर करने समाधि वायुरहित प्रदेशामध्ये विद्यमान दीप ज्या प्रकारे निश्चल राहते, त्या प्रमाणे मनाला स्थिर करने म्हणजे समाधि होय.

सम्बोधनम् -

स्थितस्याभिमुखीभावमात्र सम्बोधनं विदुः।

प्राप्ताभिमुख्यः पुरुषः क्रियासु विनियुज्यते ॥५१९॥

सादृश्यम् -

सामान्यान्येव भूयांसि तूल्यावयवकर्मणाम् ।

भिन्नप्रधानसामान्यव्यक्तं सादृश्यमिष्यते ॥५२०॥

सामान्य आणि तुल्य अवयव असून, भिन्न आणि प्रधान सामान्यव्यक्त साद्दश्य होते.

साधुः -

न प्रहृष्यति सम्माने नापमाने च कुप्यति।

न क्रुद्धः परुषं ब्रूयात् एतद्वै साधुलक्षणम् ॥५२१॥

॥गरुडपुराणम्॥

यथालब्धेऽपि सन्तुष्टः समचित्तो जितेन्द्रियः।

हरिपादाश्रितो लोके विप्रः साधुरनिन्दकः ॥५२२॥

निर्वैरः सदयः शान्तो दम्भाहकारवर्जितः।

निरपेक्षो मुनिर्वीतरागः साधुरिहोच्यते ॥५२३॥

जो आनंदित होत नाही, कुपित होत नाही, क्रोध करत नाही, अनुचित बोलतो तो साधु होय.

साध्वी -

पतिं या नाभिचरति मनोवाकायसयता।

या भर्तृलोकानामोति सद्भिः साध्वीति चोच्यते ॥५२४॥

॥ मनुस्मृतिः -९-२९॥

मन वाणी आणि शरीरावर पूर्णपणे नियंत्रण ठेवणारी जी स्त्री पतिसोबत प्रतिकुल आचरण नाही करत, ती स्त्री या संसारमध्ये सज्जनांद्वारे पतिव्रता मनाली जाते. तथा मरणोपरान्त ती पतीलोक प्राप्त करते.

साहसम् -

सहसा क्रियते कर्म यसित्कञ्चिब्दलर्पितैः।

तत्साहसमिति प्रोक्तं सहो बलमिहोच्यते ॥५२५॥

॥ मिताक्षरा॥

थोडया बलपूर्वक सहसा होनाऱ्या कार्याला त्याला साहस असे म्हणतात.

सुहृत् -

शुचित्वं त्यागिता शौर्य सामान्यं सुखदुःखयोः।

दाक्षिण्यं चानुरक्तिश्च सत्यता च सुहृद्गुणाः॥५२६॥

शुचित्व, त्यागाचा भाव, शौर्य, सुख आणि दुःखामध्ये सामान्य होय, दाक्षिण्य, अनुरक्ति आणि सत्यता हे मित्राचे गुण है।

स्नेहः -

दर्शने स्पर्शने वापि श्रवणे भाषणेऽपि वा।

यत्र द्रवत्यन्तरङ्ग स स्नेह इति कथ्यते ॥५२७॥

दर्शने स्पर्शने श्रवणे भाषणे वा यत्र अन्तःकरणस्य द्रवीभावः सः स्नेहः।

स्पर्श, दर्शन, श्रवण, भाषण यांच्यात जिथे अन्तःकरणचा द्रवीभाव होतो त्याला स्नेह असे म्हणतात.

स्मृतिः -

वर्णादिधर्मस्मरणं यत्र वेदाविरोधकम् ।

कीर्तनं चार्थशास्त्राणां स्मृतिः सा च प्रकीर्तिता ॥५२८॥

॥ शुक्रनीतिसारः ४-३-५४ ॥

वर्णादिचे, धर्माचे स्मरण जिथे वेदाच्या अविरुद्ध आहे, अर्थशास्त्राचे कीर्तन

जिथे आहे त्याला स्मृति असे म्हणतात.

स्मृतिकर्तारः-

मनुर्यमो वसिष्ठोऽत्रिर्दक्षो विष्णुस्तथाङ्गिराः।

उशनावाक्पतिर्व्यासः आपस्तम्बः पराशरः॥५२९॥

संवर्तश्चैव शङ्खश्च हारीतो लिखितस्तथा।

एतैर्यानि प्रणीतानि धर्मशास्त्राणि वै पुरा॥

तान्येवातिप्रमाणानि न हन्तव्यानि हेतुभिः ॥५३०॥

मनु, यम, वसिष्ठ, अत्रि, दक्ष, विष्णु, अंगिरा, उशना, वाक्पति, व्यास, आपस्तम्ब, पराशर, संवर्त, शंख, हारीत हे स्मृतिकर्ता आहे आणि यांच्या द्वारे प्रणीत धर्मशास्त्र तेच अतिप्रमाण मानले जाते. आणि त्यांचे कोणत्याही हेतुने नाश करू नये.

उपस्मृतिकर्तारः -

जाबालिर्नाचिकेतश्च स्कान्दो लौगाक्षिकश्यपो।

व्यासः सनत्कुमारश्च शन्तनुर्जनकस्तथा॥५३१॥

क्रतुः कात्यायनश्चैव जातूकर्णिः कपिञ्जलः ।

बोधायनश्च काणादो विश्वामित्रस्तथैव ॥५३२॥

पैठीनसिर्गोभिलश्चेत्युपस्मृतिविधायकाः।

अष्टादशोपस्मृतयः कर्तृनामभिरङ्किताः॥५३३॥

उपस्मृतिकर्ता ही आहे - जाबालि, नाचिकेत, स्कान्द, लौगाक्षि, कश्यप, व्यास, सनत्कुमार, शंतनु, जनक, क्रतु, कात्यायन, जातूकर्णि, कापिंचल, बोधायन, काणाद, विश्वामित्र, पैठीनसि, गोभिल।

स्वस्थः -

समदोषः समाग्निश्च समधातुमलक्रियः।
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते ॥५३४॥

त्रयः दोषाः वातपित्तकफाख्याः। अग्निः वैश्वानरादिः। धातवः त्वङ्मांसास्थिरुधिरमेदोमज्जास्नायवः। दोषादीनां समत्वं शरीरेन्द्रियमनसां प्रसन्नता च स्वस्थस्य लक्षणम्।

एकूण तीन दोष आहेत - वात, पित्त आणि कफ। अग्नि वैश्वानर आहे. धातु- त्वचा, मांस, अस्थि, रक्त, मेद, मज्जा, स्नायु. दोषादिचे समत्व, शरीर, इन्द्रिय आणि मनाची प्रसन्नता हे स्वास्थाचे लक्षण आहे.

****

विषयानुक्रमणिका

अच्- सन्धिः - २५६

अण्-इण्-व्यवस्था - १८२

अतिथिः - २८१

अतिदेशः - २८३

अधिकरणम् - १५०

अधिकरणकारकम् - २७५

अनाथः - २८४

अनादिषट्कम् - ११७

अनिर्वचनीयम् - ८२

अनुबन्धचतुष्टयम् - १३८

अनुमानम् - ३४

अनुवृत्तिः - १८९

अन्तःकरणम् १२६

अन्वयः - २४८

अपादानकारकम् - २७३

अपूर्वम् - ४९

अपूर्वादिविधिः - ४४

अर्थवादः - ४७

उत्तरम् - ३११

अलौकिकप्रत्यासत्तयः ३२

अवतारः - ३७८

अविद्या - ८३

अव्ययम् - १९१

अष्टविधविवाहाः २८५

अष्टाङ्गप्रणामः २९४

आ-आङ्-भेदः - १९२

आगमः - २९५

आचारः - २९७-१

आचार्यः - २९८

आत्मघाती - ३००

आत्मा- ३०१

आर्यः - ३०२

आश्रम - ३०३

इतिहासः - ३०७

इदमादिप्रयोगः - २५०

इष्टपूर्तदत्तकर्माणि - ३०८

ईश्वरः - ३०

कारकविभक्तिः - २०७

उपनिषदः - ३७९

उपपुराणानि - ३१४

उपवासः - ३१९

उपवीतनिवीतप्राचीनावीताः - ३२०

उपवेदाः - ३२१

उपसर्गैः द्योत्याः अर्थाः - १९६

उपाध्यायः - ३२४

ऋत्विक् - ३२७

ऋषिः - ३२८

एवकारार्थः - २५०

ओषध्यः वनस्पतयः - ३३०

करणकारकम् - २७१

कर्ता – २६८

कर्मकारकम् - २००

कर्मफलम् - ११२

कलञ्जम् - ३३१

कलियुगम् - ३३२

कुलपतिः - ३४२

कविः - ३३५

कायिकनमस्कृतिः - २२६

कारकाणि - २६७

काव्यम् - ३३७

ख्यातिपञ्चकम् - १६१

गणाः - ३४४

गर्वः - ३४७

गीतम् - २४८

गुरुः - ३५२

गुरुपरम्परा - ७८

गुरुः लघुः - ३५५

चतुष्षष्टिकलाः - ३४८

चम्पूः- ३६७

चान्द्रायणविधिः - ३६८

जपः - ३६९

जातिबाधकाः - ३३

ज्योतिश्शास्त्रम् - ३००

तन्त्रम् - ३७५

तर्कसीमा - १६९

तर्काध्ययनप्रयोजनम् - ३७

तात्पर्यनिर्णायकलिङ्गानि - १६३

दर्शनहेतवः - ११८

दर्शनानि - १३३

दिक् - ३८३

दीक्षा- ३८४

दीनः - ३८६

दृष्टान्तः - ३८७

दैवज्ञः - ३८९

द्विजः - ३९१

द्वैतम् - २८

धर्मः - ३९२

धर्मशास्त्रम् - २९०

धीरः - ३९८

धूर्तः - ४००

ध्यानम् - ४०१

नञः अर्थद्वयम् - २४४

नञः षडर्थाः - २४५

नपुंसकलिङ्गशब्दाः - २५४

नवरसाः - ४०३

नाम - ४०४

नायकाः - ४०५

नारायणः - ४१०

निसर्गः – स्वभावः - ४११

नृत्यम् - ४१२

नैमित्तिकम् - ४१३

पक्षः - ३६

पञ्चकोशाः - १०८

पञ्च यज्ञाः - ४१४

पाविंशतितत्त्वानि ५२

पञ्च सूनाः - ४१५

पतिव्रता - ४१६

परमाणुः - २८

परमार्थता - ८१

परा-पश्यन्ती-मध्यमा वैखरी- ४१७

परार्धम् - ४१८

परिमाणम् - ४१९

पशुपतिः - ४२१

पाठकगुणाः - ४२२

पाठकाधमाः - ४२३

पाणिनेः कृतिः - १७९

पुराणम् - ४२४

पुरुषः - ५९

निषेधः ४६
पुस्तकम् - ४२५
प्रकरणम् - १४६
प्रकृतिः - ४२६
प्रत्याहाराः - १८०
प्रमाणानि - १५४
प्रलयः - १२०
प्रादयः - १९३
प्रामाण्यवादः - १५९
प्रायश्चित्तम् - ४२०
बहुलम् - १९०
बान्धवः - ४२९
ब्रह्मचर्यम् - ४२१
ब्राह्मणः - ४५५
ब्राह्मणादीनां धर्माः - ४६७
भक्तिः - ४३४
भगवान् - ४३८
भारतवर्षम् - ४४०
भाष्यम् - १४४
भाष्यवित्तमः - १४५
मङ्गले त्रैविध्यम् - १४०
पुलिङ्गशब्दाः २५२
मनोहरम् – ४४१
मन्त्रः - ४४२
मन्त्रलिङ्गानि - ४५
महापुरणम् - ४४३
मानसनमस्कृतिः ४४७
मायाशक्तिद्वयम् - ९०
मित्रम् - ४४८
मेधा - मतिः - धीः - ४५०
मोक्षः - १२०
म्लेच्छः - ४५१
योगी - ४५२
रूपकाणि - ३८०
लकाराः - २३५
वर्णचतुष्टयम् - ४५३
वर्णोच्चरणविधिः - १८५
वर्णोच्चारणस्थानानि - १८३
वर्णोत्पत्तिप्रक्रिया - १८४
वाचिकनमस्कृतिः - ४७४
वाद्यविभागः - ४७५
वार्तिकम् - १४३

मनुबादीनामर्थाः - २५१
विकृतिपाठाः - ४८४
विद्यार्थी - ४०६
विद्यास्थानानि - ३५६
विधिः - ४३
विशिष्टाद्वैतम् – ३९
विशेष्यविशेषणभावः - २४६
विषयः - ४८१
विसर्गसन्धिः - २६०
वेदः - ४८२ :
वैद्यः - ४९२
व्याकरणशास्त्राणि - १०६
व्याघातः - ४९३
व्याख्यानम् - १४९
शक्तिग्रहः - १६०
शब्दवृत्तिः - १६६
शब्दार्थस्मारकलिङ्गानि - १५४
शरणागतः - ४९४
शरणागतिः - ४९५
शरीरत्रयम् – १०१
विकारः विवर्तः - ९४
शिष्टाचारः - ४९८
शिष्यः - ५००
शृङ्गारः - ५०१
शौचम् - ५०२
षडङ्गानि - ४८५
षड् भावभिकाराः - ५००
षष्ठी - २७६
षोडश पदार्थाः - १७
सकर्मकाकर्मकाद्विकर्मका - २३६
सगुणोपासनम् - ६४
सङ्गतिः - १५३
सदाचारः - ५०८
सङ्ग्रहः - १४७
सन्यासः - ५११
सनादयः - २३३
सप्त स्वराः - ५१२
सप्त पदार्थाः - २७
सप्तर्षयः - ५१५
समाधिः - ५१७

शास्त्रम् - १३५
शिष्टाः - ४९६
सम्प्रदानकारकम् - २०२
सम्बोधनम् - ५१९
संहिता - २३२
सादृश्यम् - ५२०
साधनचतुष्टयम् - ६६
साधुः - ५२१
साध्वी - ५२४
सर्वशास्त्रज्ञः - १२०
साहसम् - ५२५
सुहृत् - ५२६
सूप्रभेदाः - १८८
सूत्रम् - १४१
सृष्टिवादः - १६२
स्त्रीलिङ्गशब्दाः - २५३
स्नेहः - ५२७
समासभेदाः - २६५
सत्कार्यवादः - ५५
स्मृतिः - ५२८
स्वस्थः - ५३४
हल् - सन्धिः - २५७
हस्वाद्युचारणकाल - १८१

ग्रन्थऋणम्

- वेदान्तसारः
- अमरकोशः
- अष्टाध्यायी
- अव्ययकोशः
- अर्थसङ्ग्रहः
- उपसर्गार्थविवेचनम्
- कारिकावली
- पाणिनीयशिक्षा
- वृत्तरत्नाकरः
- वेदान्तपरिभाषा
- वैय्याकरणसिद्धान्तकारिकाः
- शिवतत्वरत्नाकरः
- तर्कसङ्ग्रहः
- दृग्दृश्यविवेकः
- धम्मपद
- न्यायकुसुमाञ्जलिः
- न्यायकोशः
- सर्वलक्षणसङ्ग्रहः
- सिद्धान्तकौमुदी
- सूक्तिसुधाकरः
- स्तोत्रगीतमाला
- ब्रह्मसूत्रम्
- भगवद्गीता
- भाषापाक
- भारतीयदर्शन (कन्नडभाषा)
- पञ्चदशी
- महाभारतम्
- मनुस्मृतिः
- मालविकाग्निमित्रम्
- मीमांसान्यायप्रकाशः
- योगसूत्रम्
- रघुवंशः
- लीलावती
- वाक्यपदीयम्
- न्यायप्रदीपः
- षड्दर्शनसमुच्चयः
- सर्वदर्शनसङ्ग्रहः
- विवेकचूडामणिः
- सांख्यकारिका
- हिन्दूदर्शनसारः
- सुभाषितरत्नभाण्डागारः